Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आ.श्री
कैलाससागरसूरि
ज्ञानमंदिर
कोबा, गांधीनगर
P 14449

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# ॥ श्री व्यवहारसूत्रम् ॥

## भाग-५ - उद्देश ८-९



संपादकः आचार्य विजय मुनिचन्द्रसूरिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પ.પૂ આચાર્યદેવશ્રી ૐકારસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



પ.પૂ આચાર્યદેવશ્રી ભદ્રસૂરીશ્વરજી મહારાજાના
કર કમળમાં સમર્પિત



આરાધનારત પ.પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ.સા.ના
કર કરમળમાં સમર્પિત

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

आ. श्रीॐकारसूरिज्ञानमंदिर ग्रंथावली - ५१/१

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम् - भाग ५

## ( उद्देशः ८-९ )

आगमप्रभाकर मुनिश्री पुण्यविजयजी सज्जीकृत सामग्रीसहायेन

संपादकः

आचार्य विजय मुनिचन्द्रसूरिः

सहायकः मुनि दिव्यरत्नविजयः

प्रकाशक

आचार्यश्री ॐकारसूरिज्ञानमंदिर, सुभाषचोक, गोपीपुरा, सूरत.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Vyavahara Sootraṁ part - 5
Editor Ac. Munichandrasoori

प्रथम संस्करण
वि. सं. २०६६, ई. स. २०१०
नकल : २५०

**प्राप्तिस्थान**

आचार्य श्रीॐकारसूरिज्ञानमंदिर
आचार्य श्रीॐकारसूरिआराधनाभवन
सुभाषचोक, गोपीपुरा, सूरत.
फोन : ९८२४१५२७२७
E-Mali : omkarsuri@rediffmail.com
mehta_sevantilal@yahoo.co.in

आचार्य श्रीॐकारसूरिगुरुमंदिर
वावपथकनी वाडी,
दशापोरवाड सोसायटी,
पालडी चाररस्ता, अमदावाद-७
फोन : (०७९) २६५८६२९३

विजयभद्रचेरिटेबल ट्रस्ट
पार्श्वभक्तिनगर, नेशनल हाईवे १४,
भीलडीयाजी जि. बनासकांठा. पीन-३८५५३५.
फोन : ०२७४४-२३३१२९, २३४१२९

मुद्रक :-
किरीट ग्राफिक्स २०९, आनंद शोपींग सेन्टर, रतनपोल, गोलवाड, अहमदाबाद-०१ फोन : ९८९८४९००९



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય

રામચન્દ્ર - ભદ્રંકર - કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન

વર્ધમાનતપોનિધિ ૧૦૦ + ૬૭ ઓળીના આરાધક

પૂ. ગણિવર્યશ્રી નયભદ્ર વિ.મ.સા.ની પ્રેરણાથી

શ્રી દેવકીનગર જૈન સંઘ બોરીવલી વેસ્ટ મુંબઈ.

શ્રી વર્ધમાનભક્તિ શ્વે.મૂ. ઈરાનીવાડી જૈન સંઘ કાંદીવલી, (વેસ્ટ) મુંબઈ.

શ્રી ધર્મવર્ધક શ્વે.મૂ.પૂ. જૈન સંઘ મધુપાર્ક

કાર્ટરરોડ નં. ૧ બોરીવલી ઇસ્ટ મુંબઈ આદિએ

જ્ઞાનદ્રવ્યમાંથી સુંદર લાભ લીધો છે.

**અનુમોદના....અનુમોદના....અનુમોદના....**



For Private and Personal Use Only

# પ્રકાશકીય

પૂ.આ.ભ. **શ્રીઅરવિંદસૂરિ** મ.સા. અને પૂ.આ.ભ.શ્રી **યશોવિજયસૂરિ** મ.સા.ના આશીર્વાદ અને માર્ગદર્શન પૂર્વક આ ગ્રંથમાળામાં નવા નવા ગ્રંથો પ્રગટ થતા રહે છે.

વ્યવહારસૂત્ર નિર્યુક્તિ-ભાષ્ય અને પૂ.આ.શ્રી મલયગિરિસૂરિ મ.સા.ની ટીકા સાથે ઘણાં વર્ષો બાદ પ્રગટ થઈ રહ્યું છે.

તાડપત્રીય વગેરે વિવિધ પ્રતો અને આગમપ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા.એ તૈયાર કરાવેલ સામગ્રીના આધારે પૂ.આ.ભ. શ્રીમુનિચન્દ્રસૂરિ મ.સા.એ સંશોધન-સંપાદન કાર્ય કર્યું છે.

વ્યવહારસૂત્ર છેદગ્રંથ છે. સાધુ-સાધ્વીજીના પ્રાયશ્ચિત્ત વગેરે વિષયો આમાં આવતા હોવાથી એનું વાંચન-પઠન અધિકારપ્રાપ્ત મુનિઓ જ ગુરુ આજ્ઞા મુજબ કરી શકે.

ગ્રંથ ઘણો વિશાળ હોવાથી એ છ ભાગોમાં બહાર પડે છે. વિહારમાં વાંચન કરતાં પૂ. મુનિ ભગવંતોની જરૂરિયાતને ધ્યાનમાં લઈ પ્રતાકારે પણ થોડી નકલો પ્રકાશિત થઈ રહી છે.

આ અતિ મહત્ત્વના ગ્રંથનું સારી રીતે સંશોધન થાય એ માટે સંપાદક આચાર્યશ્રીએ જુદા જુદા વિદ્વાન આચાર્ય ભગવંતો આદિને વિનંતી કરી હતી. સદ્ભાગ્યે વિવિધ વિદ્વાનોએ આ ગ્રંથને આત્મીયભાવે તપાસી આપ્યો છે. પૂ.આ.ભ.શ્રી રાજશેખરસૂરિ મ.સા. (પૂ. આ.ભ.શ્રી રામચન્દ્રસૂરિ મ.સા. સમુદાય), પૂ. આ.ભ.શ્રી કુલચન્દ્રસૂરિ મ.સા., પૂ.આ.શ્રી પુણ્યરત્નસૂરિ મ.સા., પૂ.આ.શ્રી યશોરત્નસૂરિ મ.સા.(પૂ. આ.શ્રી ભુવનભાનુસૂરિ મ.સા. સમુદાય), પં. મુક્તિચન્દ્ર વિ. ગણી., પં. મુનિચન્દ્ર વિ. ગણી (પૂ.આ.ભ.શ્રી કલાપૂર્ણસૂરિ મ.સા. સમુદાય) આદિએ ગ્રંથ સંશોધનમાં સહકાર આપ્યો છે. આમ અનેક વિદ્વાનોના સહકારથી સંશોધિત થતાં આ આગમગ્રંથને પ્રકાશન કરતાં અમે ગૌરવ અનુભવીએ છીએ.

અનેક સંઘોએ જ્ઞાનદ્રવ્યમાંથી પ્રકાશનનો લાભ લીધો છે. તે બધાના અમો આભારી છીએ.

**લી. ટ્રસ્ટીગણ,**

**આ.ૐકારસૂરિ આરાધના ભવન.**

## સંપાદકીય

વ્યવહારસૂત્ર(સટીક)ના આ છઠ્ઠા ભાગમાં વ્યવહારસૂત્રનો ૧૦મો ઉદ્દેશ એના ઉપરની નિર્યુક્તિ-ભાષ્ય ગાથા. ૩૮૧૦ થી ૪૬૭૫ અને તેના ઉપરની આ. શ્રી મલયગિરિસૂરિ મહારાજે રચેલી ટીકા વગેરે પ્રસિદ્ધ થઈ રહ્યા છે.

સંપાદન માટે ઉપયુક્ત હસ્તલિખિત પ્રતો વગેરેનો પરિચય અને ગ્રંથ-ગ્રંથકાર વિષેનો સંક્ષિપ્ત પરિચય વગેરે પ્રથમ ભાગના સંપાદકીયમાં આપવામાં આવ્યા છે. જિજ્ઞાસુઓએ ત્યાંથી જોઈ લેવા.

## વિશેષ

આગમપ્રકાશન સમિતિ બ્યાવર પ્રકાશિત ''त्रिणि छेदसूत्राणि'' માં વ્યવહારસૂત્ર અને હિંદીમાં અનુવાદ-વિવેચન પ્રગટ થયા છે. આમાં પૃ.૪૪૬માં ૧૦મા ઉદ્દેશના સૂત્ર૧૩ અને ૧૪ વચ્ચે એક સૂત્ર અધિક જોવામાં આવે છે તે આ પ્રમાણે છે.

''चत्तारि अंतेवासी पण्णत्ता, तं जहा- पव्वावणंतेवासी नामेगे, नो उवट्ठावणंते वासी १

उवट्ठवणंतेवासी नामेगे, नो पव्वावणंतेवासी २,

एगे पव्वावणंतेवासी वि उवट्ठावणंतेवासी वि ३,

एगे नो पव्वावणंतेवासी नो उवट्ठावणंतेवासी, धम्मंतेवासी ॥''

આ વિભાગમાં ગ્રંથના અંતે પરિશિષ્ટો આપવામાં આવ્યા છે.

## ઋણસ્વીકાર

પ્રસ્તુત વ્યવહારસૂત્રના સંશોધનમાં પાઠ શુદ્ધીકરણ વગેરેમાં જેઓએ આત્મીયભાવે સહાય કરી છે -

પૂ. આ. ભ. રાજશેખરસૂરિમ.સા., પૂ. આ.શ્રી કુલચન્દ્રસૂરિ મ.સા., આ. શ્રી પુણ્યરત્નસૂરિમ.સા. પૂ.આ.શ્રી. યશોરત્નસૂરિ મ.સા., પં. શ્રી મુક્તિચન્દ્રવિ. ગણી, પં. શ્રી મુનિચન્દ્રવિ. ગણી આદિના અમે ખૂબ ખૂબ ઋણી છીએ. આભાર.

લી.

પૂ. આ.ભ.શ્રી **ભદ્રસૂરીશ્વરજી** મ.સા.ના શિષ્યરત્ન

પૂ. મુનિરાજશ્રી **જિનચન્દ્રવિજય** મ.સા.ના વિનેય

આ. વિજય **મુનિચન્દ્રસૂરિ.**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## વિશેષ સૂચના

પોથી આકારે પ્રગટ થતાં આ ગ્રંથમાં પુસ્તક આકારના એક પેજનું મેટર બે પેજમાં લેવામાં આવ્યું છે. એટલે અનુક્રમણિકા વગેરેમાં પેજ નંબર બન્ને સંસ્કરણમાં સમાન રહે તે માટે પોથીમાં પેજ નંબર **A - B** એ પ્રમાણે આપ્યા છે.

એટલે પુસ્તકનું પેજ ૨= પોથીનું પેજ ૨**A** - ૨**B** સમજવું.

પરિશિષ્ટોમાં જ્યાં પંક્તિ નંબર દર્શાવ્યા છે. તે પોથીના **A - B** બાજુમાં સળંગ પંક્તિ નંબર ગણવાથી મળી રહેશે.

જેમ કે અવતરણસૂચિમાં 'તૃસ્ત્રોऽवात्' પૃષ્ઠ ૬ પંક્તિ ૨માં છે તે પોથીમાં ૬**A** બાજુમાં છે 'શબ્દપ્રથા' પૃષ્ઠ ૬ પંક્તિ ૧૮માં બતાવેલ છે તે ૬**B** બાજુમાં છે.



For Private and Personal Use Only

# विषयानुक्रमः भागः-५

## उद्देश : ८


| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १ | शय्यासंस्तारकाऽनुज्ञापना | १३३७ |
| ३३६३-६४ | गृहस्वरूपम् | १३३८ |
| ३३६५-६७ | संस्तारकमार्गणस्वरूपम् | १३३८-३९ |
| सूत्र २ | संस्तारक स्वरूपादिः | १३४० |
| ३३६८ | संस्तारकप्रकारादिः | १३४१ |
| ३३६९-७४ | ऋतुबद्धे संस्तारकग्रहणे प्रायश्चित्तम् | १३४०-४२ |
| ३३७५-८७ | कारणे ग्रहणे विधिः यतना च | १३४२-४७ |
| ३३८८ | आनयने यतना | १३४७ |
| ३३९१-९३ | वर्षाऋतौ फलकसंस्तारकः कार्यः | १३४७ |
| ३३९४ | संस्तारकग्रहणविधिः | १३४८ |
| ३३९५-३४०० | संस्तारकानुज्ञापने यतना | १३४९-५० |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ३४०१-४७ | संस्तारकमार्गणे आभवद्व्यवहारः | १३५०-६१ |
| ३४३९-४१ | अन्यग्रामे संस्तारकमार्गणा | १२६२ |
| ३४४२-४५ | संस्तारकस्थानानुज्ञापना | १३६३ |
| ३४४६-४७ | संस्तारकस्य एकाङ्गिकादिप्रकारे विधिः | १३६४ |
| ३४४८-५१ | संस्तारकस्य शिथिलबन्धननिषेधः | १३६४-६५ |
| ३४५२-५३ | प्रायोग्यसंस्तारकस्वरूपम् | १३६५ |
| ३४५४-५५ | वृद्धावासयोग्यसंस्तारकमार्गणा | १३६६ |
| सूत्र ५ | स्थविरस्य उपधिविशेषः | १३६६ |
| ३४५७-६२ | उपधिविशेषस्वरूपम् | १३६७-६८ |
| ३४६३-६८ | वृद्धस्य विहारे यतनादिः | १३६९-७० |
| ३४६९-७१ | एकाकिभवनकारणानि | १३७०-७१ |
| ३४७२-७७ | एकाकिवृद्धस्य उपधिं स्थापयित्वा भिक्षागमनादिः | १३७१-७३ |
| ३४७८-८५ | उपधौ हते विधिः | १३७३-७५ |
| ३४८६-८७ | वृद्धस्य भोजनविधिः | १३७५ |




For Private and Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र ६-७ | गृहस्थसत्कसंस्तारकस्य अन्यवसतौ नयने विधिः | १३७५-७६ |
| ३४९१-९७ | बहिर्नयने अनुज्ञापनाविधिः | १३७६-७९ |
| सूत्र ८-१२ | अवग्रह-अनुज्ञापनाविधिः | १३७९ |
| ३४९९-३५०१ | अननुज्ञापने प्रायश्चितम् | १३८१-८२ |
| ३५०२-०४ | अननुज्ञापने दोषाः | १३८१-८२ |
| ३५०५-१५ | कारणे पूर्वमवग्रहः | १३८२-८५ |
| सूत्र १३-१५ | परिभ्रष्टोपकरणविधिः | १३८६-६७ |
| ३५१७-३१ | विस्मृतोपकरणे विधिः | १३८७-९१ |
| ३५३२-४१ | मार्गे विश्रामणादौ दोषाः | १३९१-९४ |
| ३५४२-५० | अपवादे विश्रामाणादिः यतना च | १३९४-९७ |
| ३५५१-५५ | विस्मृतोपकरणे दृष्टे विधिः | १३९७-९८ |
| ३५५६-५९ | असंविग्न विस्मृते विधिः | १३९८-९९ |
| ३५६०-६५ | विस्मृतोपधिग्रहणे परिष्ठापने च विधिः | १३९९-१४०१ |
| ३५६५-७२ | परिष्ठापने चिह्नकरणादिः | १४०१-०३ |

| गाथा | विषयः | पेज |
|---|---|---|
| सूत्र १६ | अतिरिक्तपात्रग्रहणसामाचारी | १४०४ |
| ३५७५ | प्रमाणातिरेके न्यूने च दोषाः | १४०५-०८ |
| ३५८४-९० | मात्रकानुज्ञाकारणानि | १४०८-१० |
| ३५९१-९६ | निष्कारणं मात्रकपरिभोगे दोषाः | १४१०-११ |
| ३५९७-३६१६ | पात्रग्रहणसामाचारी | १४११-१९ |
| ३६१७-२५ | पात्रवितरणम् | १४१९-२२ |
| ३६२६-३४ | सकारणनिष्कारणं एकाकीभवनम् | १४२२-२५ |
| ३६३५-४८ | अवधावनस्वरुपम् | १४२५-२९ |
| ३६४९-५९ | उपधिहननविचारः | १४२९-३३ |
| सूत्र १७ | ऊनोदरतादिः | १४३३ |
| ३६६२-६७ | कवलसंख्या स्वरूपादिः | १४३४-३६ |
| ३६६८-७० | प्रकाम-निकामाहारदिः | १४३६-३७ |
| ३५७१-८२ | आहारप्रयोजनं सदृष्टान्तम् | १४३७-४० |


॥ अष्टम उद्देशः संपूर्णः ॥

| गाथा | विषयः | पेज |
|---|---|---|
| | **उद्देश ९** | |
| सूत्र १-८ | शय्यातरसम्बन्धिनः आहारे कल्प्याकल्प्य स्वरूपम्. | १४४१-४२ |
| ३६८३-८८ | प्रातिहारिकभोजिशय्यातरस्य पिण्डः अकल्प्यः | १४४२-४४ |
| ३६८९ | अप्रातिहारिके भद्रक-प्रान्तदोषाः | १४४४ |
| ३६९०-९१ | कालिकसूत्रप्रयोजनमो | १४४४-४५ |
| ३६९२-९४ | अप्रातिहारिकस्य ग्रहणे विधिः | १४४४-४६ |
| सूत्र ९-१६ | शय्यातरोपजीविनः पिण्डनिषेधः | १४४६-४७ |
| ३६९७-३७०२ | एकचुल्ल्यां सागारिकदोषाः | |
| | भिन्नचुल्ल्यां प्रसङ्गदोषाः | १४४८-४९ |
| ३७०३ | अपवादः | १४४९ |
| सूत्र १७-३२ | साधारण-निस्साधारणशालयोविधिः | १४४९-५१ |
| ३७०५-०६ | शालास्वरूपादिः | १४५१-५२ |
| ३७०७-१६ | साधारणादिषु कल्प्याकल्प्यम् | १४५२-५५ |
| सूत्र ३३-३६ | गोरसफलादीनां कल्प्याकल्प्यम् | १४५५ |

| गाथा | विषय: | पेज |
|---|---|---|
| ३७१८-२२ | गोरसाद्यौषधिषु कल्प्याकल्प्यम् | १४५६-५७ |
| ३७२३-३९ | फलादिषु कल्प्याकल्प्यम् | १४५७-६१ |
| ३७२५-३९ | कृत-निष्ठितादिस्वरूपम् | १४६०-६१ |
| ३७४०-४३ | बीजदुग्धादौ कल्प्याकल्प्यम् | १४६१-६२ |
| ३७४४-४७ | चैत्यद्रव्यादौ विधि: | १४६२-६३ |
| ३७४८-५१ | समवसरणादौ विधि: | १४६३-६४ |
| ३७५०-५५ | सिद्धायतनादौ यतना | १४६४-६५ |
| सूत्र ३७-४० | भिक्षुप्रतिमाविधि: | १४६५ |
| ३७५८-६४ | प्रतिमास्वरूपम् | १४६७-६८ |
| ३७६५-५७ | भिक्षापरिमाणम् | १४६८-७० |
| सूत्र ४१-४२ | मोकप्रतिमाविधि: | १४७० |
| ३७६९ | मोकप्रतिमास्वरूपम् | १४७१ |
| ३७७१-७२ | प्रतिमास्वीकारविधि: | १४७२ |
| ३७७३-७८ | मोकस्वरूपम् | १४७२-७४ |

| गाथा | विषयः | पेज |
|---|---|---|
| ३७७९-८१ | द्रव्यादिमार्गणा | १४७४ |
| ३७८२-८६ | भोजनादिविधिः | १४७५-७६ |
| ३७८७-८८ | महती मोकप्रतिमा | १४७६ |
| सूत्र ४३-४४ | मोकप्रतिमायां दत्तिस्वरूपम् | १४७६-७७ |
| ३७९०-९२ | दत्तिपरिमाणादिः | १४७८-७९ |
| ३७९३-९६ | दायकभिक्षादिभङ्गाः | १४७९-८० |
| सूत्र ४५ | उपहतप्रकाराः | १४८० |
| ३७९८-३८०१ | त्रिविधोपहृतस्वरूपम् | १४८०-८१ |
| सूत्र ४६ | अवगृहितस्वरूपम् | १४८१-८२ |
| ३८०३-०५ | अवगृहीतप्रकारादिः | १४८२-८३ |
| ३८०६-८९ | अपहृत-अवगृहितयोर्विशेषः | १४८३-८४ |


॥ नवम उद्देशः संपूर्णः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# व्यवहारसूत्रग्रन्थस्य विभागव्यवस्था

| भाग | ग्रन्थः | भाष्यगाथाटीकासहिता | पृष्ठ |
|---|---|---|---|
| १ | पीठिका | गाथा १-१८२ | १ (A) - १०८ (B) |
| २ | उद्देश १ | गाथा १८३-९६३ | १०९ (A) - ५१२ (B) |
| ३ | उद्देश २-३ | गाथा ९६४-१७१० | ५१३ (A) - ७९२ (B) |
| ४ | उद्देश ४-५-६ | गाथा १७११-२८१३ | ७९३ (A) -११६८ (B) |
| ५ | उद्देश ७-८-९ | गाथा २८१४-३८०९ | ११६९ (A) -१४८४ (B) |
| ६ | उद्देश १० | गाथा ३८१०-४६७५ | १४८५ (A) -१७२५ (B) |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीसिद्धि-विनय-भद्र-जनक-विलास-ॐकार-जिनचन्द्र-सद्गुरुभ्यो नमः

श्रीमन्मलयगिरिसूरि विरचितविवरणयुत निर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## भाग ५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥

॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ अष्टम उद्देशकः ॥



For Private and Personal Use Only

व्याख्यातः सप्तमोद्देशकोऽधुना अष्टम आरभ्यते तत्र चेदमादिसूत्रम् -

**सूत्रम्— गाहा उऊ पज्जोसविए, ताए गाहाए, ताए पएसाए ताए उवासंतराए जमिणं जमिणं सेज्जासंथारगं लभेज्जा तमिणं तमिणं ममेव सिया। थेरा य से अणुजाणेज्जा, तस्सेव सिया। थेरा य से नो अणुजाणेज्जा नो तस्सेव सिया। एवं से कप्पइ अहाराइणियाए सेज्जासंथारगं पडिग्गाहित्तए। ॥ १ ॥**

'गाहा उऊ पज्जोसविए' इत्यादि, अस्य सम्बन्धप्रतिपादनार्थमाह-



**तह चेव उग्गहम्मी, अणुयत्तंतम्मि रायमादीणं ।**
**साहम्मिउग्गहम्मी, सुत्तमिणं अट्ठमे पढमं ॥ ३३६२॥**

**तथैव** पूर्वोक्तेनैव प्रकारेण **राजादीनामवग्रहेऽनुवर्त्तमाने** अवग्रहप्रस्तावा**दष्टमे** उद्देशके **प्रथममिदं सूत्रं साधर्मिकावग्रहे** पठति एष सूत्रसम्बन्धः ॥३३६२॥ अनेन सम्बन्धेनायातस्यास्य व्याख्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**गाहा** गेहं तत्र **ऋतौ** ऋतुबद्धे काले वर्षाकाले वा **पर्युषितस्तस्मिन् गाहाए** सूत्रे स्त्रीत्वं प्राकृतत्वाद्, एवमुत्तरत्रापि। **तस्मिन् प्रदेशे** अन्तर्बहिरादिलक्षणे तस्मिन्न**वकाशान्तरे** द्वयोर्मध्यभागलक्षणे **यद् यत् शय्या संस्तारकं** शय्यासंसारकभूमिलाभः **तत् ममैव स्या**दिति ब्रूते। तत्र यदि **स्थविरा**स्तस्याशठभावमवगम्याऽ**नुजानन्ति** तदा **तस्यैव स्याद्,** अथ से तस्य शठभावमवबुध्य स्थविरा **नानुजानते** एवं तर्हि से **तस्य** [**न स्यात्,**] **कल्पते, यथारात्निकतया शय्यासंस्तारकभूमिं परिग्रहीतु**मिति सूत्राक्षरार्थः॥ सम्प्रति **भाष्यकृत्** विषमपदव्याख्यां करोति —

**गाहा घरे गिहे या, एगट्ठा होंति उग्गहे तिविहे ।**
**उउबद्धे वासासु य, वुड्ढावासे य नाणत्तं ॥ ३३६३ ॥**

**गाहा** इति **घर**मिति **गिह**मिति वा एते त्रयोऽ**प्येकार्थाः**। तत्र गृहं **त्रिविधे अवग्रहे** साधर्मिकावग्रहे भवति। तद्यथा-**ऋतुबद्धे** ऋतुबद्धसाधर्मिकावग्रहे **वर्षावास**साधर्मिकावग्रहे। तत्र ऋतुरिति ऋतुबद्धावग्रहो गृहीतः, 'पज्जोसविते' इति अनेन वर्षावग्रहः, एतयोर्द्वयोरप्यवग्रहयोरन्तःप्रविष्ट इति कृत्वा सामर्थ्यतस्तृतीयोऽपि वृद्धावासाऽवग्रहो गृहीतः। तथा चाह-**वृद्धावासे च**। तत्र त्रिष्वप्यवग्रहेषु **यन्नानात्वं** तत् प्रत्येकसूत्रेषु वक्ष्यामीति वाक्यशेषः ॥३३६३॥



For Private and Personal Use Only

**चाउस्सालादिगिहं, तत्थ पदेसा उ अंतो बाहिं वा ।**
**ओवासंतर मो पुण, अमुगाणं दोण्ह मज्झम्मि ॥ ३३६४॥**

**चतुःशालादिगृहम्,** आदिशब्दादेकशाल-द्विशाल-त्रिशालपरिग्रहः तस्य प्रदेशा अन्तर्बहिरासन्नदूरादिलक्षणाः। **अवकाशान्तरं** नाम **अमुकयोर्द्वयोर्मध्य**मिति ॥ ३३६४ ॥ तदेवं कृता **भाष्यकारेण** विषमपदव्याख्या, सम्प्रति **निर्युक्तिविस्तरः**—

**खेत्तस्स उ संकमणे, कारणे अन्नत्थ पट्ठविज्जंतो ।**
**पुव्वुद्दिट्ठे तम्मि उ, उउवासे[१] सुत्तनिद्देसो ॥ ३३६५॥**

आचार्य **ऋतुबद्धकालनिमित्तं वर्षाकालनिमित्तं** वा अन्यत् क्षेत्रं संक्रमितुमना अजायत, ततः **क्षेत्रस्य सङ्क्रमणे** कर्तव्येऽन्यस्मिन् वा आत्मनः **कारणे** समुत्पन्ने कश्चित् साधु**मन्यत्र** [प्र]स्थापयेत्। स च **प्रस्थाप्यमानः पूर्वोद्दिष्टे तस्मि**न्नवकाशे आचार्यान् विज्ञपयति, अस्मिन् प्रस्तावे अधिकृत**सूत्रस्य निर्देशो** भणनम् । इयमत्र भावना-योऽसौ प्रस्थाप्यते तेन पूर्वं

१. उडुवासे-ला.॥

क्षेत्रप्रत्युपेक्षणाय गतेन तत्क्षेत्रं गृहं[च]दृष्टं, यदि वा योऽन्यः पूर्वं क्षेत्रप्रत्युपेक्षणाय गतस्तेन तस्य कथितं यथा-अमुकः प्रदेशो निवातोऽमुकः प्रवातोऽमुकः साधारणोऽमुकः सुखावहोऽमुको दुःखावहोऽमुकः साऽऽलोकोऽमुको निरालोकः। तत प्रस्थाप्यमान आचार्यं विज्ञपयति यथा-मम श्लेष्मा प्रस्पन्दते, अथवा प्रवाते स्वपतोऽजीर्णमुपजायते, यदि वा घर्मं नाऽध्यासितुं शक्नोमि, अथवा अमुकममुकं च साधुमहं सदैव प्रतिपृच्छामि, तत एतयोर्मध्ये मम शय्यासंस्तारकभूमिमनुजानीत। यदि वा प्रस्थापितस्तत्र गत्वा तद्गृहमालोक्याऽऽत्मनः संसाधकं प्रदेशमाचार्यस्य श्लेष्मप्रस्पन्दनादिकारणप्रकाशनपुरस्सरं संदेशयति यथा अमुकाम् अमुकां मे संस्तारकभूमिमनुजानीतेति ॥ ३३६५॥

तथा चाह—

**दीवेउं तं कज्जं गुरुं व अन्नं व सो उ अप्पाहे ।**
**ते वि य तं भूयत्थं, नाउं असढस्स वियरंति ॥ ३३६६॥**

**तत्** श्लेष्मप्रस्पन्दनादि**कार्यं दीपयित्वा** प्रकाश्य **गुरुमाचार्यमन्यं वा** स्पर्द्धकपतिम् उपाध्यायादिकं **अप्पाहेति** संदेशयति। **तेऽपि च** गुरवोऽन्ये वा यत् सन्दिष्टं साक्षात्कथितं वा

**तद् भूतार्थं** यथावस्थितं **ज्ञात्वा** तस्याऽ**शठस्य** तां शय्यासंस्तारकभूमिं **वितरन्ति** अनुजानन्ति ॥ ३३६६ ॥

**अह पुण कंदप्पादीहि मग्गती तो उ तस्स न दलंति।**
**एयं तु पिंडसुत्ते, पत्तेय इहं तु वोच्छामि ॥ ३३६७॥**

**अथ कन्दर्पादिभिः मार्गयति** कन्दर्पनिमित्तमन्यद्वा किञ्चित् शठत्वमवलम्ब्य विज्ञपयति **तदा तस्य न ददति** नानुजानन्ति। अथवा 'जमिणं जमिणं सेज्जासंथारगं लभेज्जा' इत्यादेः सूत्रस्यायमर्थः- शय्या एव संस्तारकः शय्यासंस्तारकः, स च द्विधा फलकसंस्तारकः कन्थिसंस्तारको वा, तस्य योऽग्रेतनः संस्तारकः स खरकः। तत्र स्वपतः पार्श्वाणि दुःखायन्ते ततस्तेन पूर्वं मृदुकुले गत्वा मृदुसंस्तारकोऽनुज्ञापितः। तत आचार्यसमीपमागत्य विज्ञपयति यं यं शय्यासंस्तारकं [१]लभेत(यं) स स ममैव स्यात्। तत्र यदि स्थविरास्तस्याऽशठत्वमालोक्यानुजानन्ति तदा स तस्यैव स्यात्। अथ शठ इति कृत्वा तस्य नानुजानन्ति एवं [तस्य न स्यात्]

---

१. लभतं-स.।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तर्हि से तस्य कल्पते यथारात्निकतया शय्यासंस्तारकं परीग्रहीतुं, नान्यथेति। **एतत् पिण्डसूत्रं** व्याख्यातम् इहाधुना पुनः **प्रत्येक**सूत्राणि **व्याख्यास्यामि** ३३६७॥

**सूत्रम्— से य अहालहुसगं सेज्जासंथारगं गवेसेज्जा, जं चक्किया एगेणं हत्थेण ओगिज्झ जाव एगाहं वा, दुयाहं वा, तियाहं वा परिवहित्तए, एस मे वासावासासु भविस्सइ।** ॥२॥

**सूत्रम्— से य अहालहुसगं सेज्जासंथारगं गवेसेज्जा, जं चक्किया एगेण हत्थेण ओगिज्झ जाव एगाहं वा, दुयाहं वा, तियाहं वा परिवहित्तए, एस मे हेमंत-गिम्हासु भविस्सइ।** ॥३॥

**सूत्रम्— से य अहालहुसगं सेज्जासंथारगं गवेसेज्जा, जं चक्किया एगेणं हत्थेण ओगिज्झ जाव एगाहं वा, दुयाहं वा, तियाहं वा, चउया हं वा, पंचाहं वा, दूरमवि अद्धाणं परिवहित्तए, एस मे वुड्ढावासासु भविस्सइ** ॥४॥

'से य अहालहुस्सगं सेज्जासंथारगं गवेसेज्जा' इत्यादि **सोऽ**धिकृतो भिक्षु**र्यथालघुस्वक**मेकान्तलघुकं वीणाग्रहणग्राह्यं, **शय्या** सर्वाङ्गिका **संस्तारको**ऽर्द्धतृतीयहस्तदीर्घः हस्तं चत्वार्यङ्गुलानि विस्तीर्णः। अथवा तत्पुरुषः समासः शय्या एव संस्तारकः शय्यासंस्तारकः[तं] शय्यासंस्तारकं तृणमयं पट्टमयं वा **गवेषयेत्** इत्यादि। तत्र **यत् शक्नुयात् एकेन हस्तेनावगृह्य यावदेकाहं वा** अध्वानं [द्व्यहं]वा त्र्यहं वा अध्वानं गच्छन् **परिवोढुं** तत् गृह्णीयात्, **एष** एव **वर्षावासे** भविष्यति, एष वर्षासूत्रस्यार्थः। एवं हेमन्तग्रीष्मसूत्रार्थो वृद्धावाससूत्रार्थश्च भावनीयः। नवरं वृद्धावाससूत्रे चतुरहं वा पञ्चाहं वेत्यधिकं वक्तव्यम् । अधुना **निर्युक्तिविस्तरः**—



For Private and Personal Use Only

**सो पुण उउम्मि घेप्पइ, संथारो वासे वुड्ढवासे वा ।**
**ठाणं फलगादी वा, उउम्मि वासासु य दुवे वि ॥ ३३६८॥**

**स पुनः** संस्तारकस्थानरूपं ऋतुबद्धे काले वर्षावासे वृद्धवासे च यथानुरूपं गृह्यते। तद्यथा-**ऋतुबद्धे** काले अवकाशे **गृह्यते, वर्षावासे वृद्धावासे च** निवातस्थानेऽपि। तथा **ऋतुबद्धे** काले ऊर्णादिमयः संस्तारकः परिग्राह्यः पुरुषविशेषं ग्लानादिकमपेक्ष्य **फलकादि वा, वर्षावासे द्विकावपि** संस्तारकौ वक्ष्यमाणलक्षणौ गृह्णीयात् ॥ ३३६८॥

**उउबद्धे दुविहगहणे, लहुगो लहुगा य दोस आणादी ।**
**झामिय-हियवक्खेवे, संघट्टणमादि पलिमंथो ॥ ३३६९॥**

द्विविधः संस्तारकः परिशाटिरूपोऽपरिशाटिरूपश्च। तत्र परिशाटिरूपो द्विविधो झुषिरोऽझुषिरश्च। तत्र शाल्यादिपलालतृणमयो झुषिरः कुशवल्कादिरूपोऽझुषिरः। अपरिशाटिरूपोऽपि द्विविधः, एकाङ्गिकोऽनेकाङ्गिकश्च। एकाङ्गिकोऽपि द्विधा-सङ्घातितोऽसङ्घातितश्च। तत्राऽसङ्घातित एकफलकात्मकः, सङ्घातितो द्व्यादिफलकः सङ्घातात्मकः। अनेकाङ्गिकः कन्थिकाप्रस्तरात्मकः, तत्र यदि तु **ऋतुबद्धे** अझुषिरं परिशाटिसंस्तारकं गृह्णाति तदा तस्य

प्रायश्चित्तं **लघुको** मासः, झुषिरं गृह्णतश्चत्वारो **लघुकाः**, अपरिशाटिमपि गृह्णतश्चत्वारो लघुकाः, न केवलं प्रायश्चित्तं किं त्वा**ज्ञादयश्च दोषाः** । तथा यद्यग्निना स **ध्याम्यते** तदापि प्रायश्चित्तं चत्वारो लघुकाः, **व्याक्षेपेण** वा स्तेनैरप**हृते** चतुर्लघुकम्। अपरिशाटौ ध्यामिते हृते वा मासलघु। ततोऽन्यं संस्तारकं मृगयमाणानां सूत्रार्थ**परिमन्थः**। तथा तस्मिन् संस्तारके ये प्राणजातय आगन्तुकास्तदुद्भवा वा तान् **सङ्घट्टयति** परितापयति अपद्रावयति च, ततस्तन्निष्पन्नं तस्य प्रायश्चित्तमित्येष गाथार्थः ॥ ३३६९ ॥

साम्प्रतमेनामेव **भाष्यकृत्** विवृणोति—

**परिसाडि अपरिसाडी, दुविहो संथारतो समासेण ।**
**परिसाडी य झुसिरेयर, एत्तो वोच्छं अपरिसाडिं ॥ ३३७० ॥**

**द्विविधः समासेन** सङ्क्षेपेण **संस्तारकः**। तद्यथा **परिशाटिरपरिशाटिश्च**, तत्र **परिशाटिर्द्विधा झुषिरः इतरश्च**, इतरो नाम अझुषिरः। **अत ऊर्ध्वमपरिशाटिं वक्ष्ये** ॥ ३३७० ॥

प्रतिज्ञातमेव करोति-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एगंगि अणेगंगी, संघातिम एयरो य एगंगी ।**
**अझुसिरगहणे लहुतो, चउरो लघुका य सेसेसु ॥ ३३७१ ॥**

अपरिशाटिर्द्विधा **एकाङ्गिकोऽनेकाङ्गिकश्च**। तत्र **एकाङ्गिको** द्विधा **सङ्घातिम इतरश्च**। अमीषां व्याख्यानं प्रागेव कृतम् । तत्रा**ऽझुषिरस्य** संस्तारस्य **ग्रहणे** प्रायश्चित्तं **लघुको** मासः। **शेषेषु** झुषिरसङ्घातितेतरैकाङ्गिकानैकाङ्गिकेषु प्रत्येकं **चत्वारो लघुकाः** ॥३३७१॥

**लघुका य झामियम्मि, हरिए वि य होंति अपरिसाडिम्मि ।**
**परिसाडम्मि य लहुगो, आणादि विराहणा चेव ॥ ३३७२॥**

अग्निना **ध्यामिते अपरिशाटौ** स्तेनैर्वा तस्मिन्नपहृते प्रत्येकं प्रायश्चित्तं चत्वारो **लघुका भवन्ति। परिशाटौ** ध्यामिते हृते वा प्रत्येकं **लघुको** मासः, **आज्ञादयश्च** दोषाः। तथा **विराधना** च संयमस्य ॥ ३३७२॥

तामेवाभिधित्सुराह—



For Private and Personal Use Only

**विक्खेवो सुत्तादिसु, आगंतु तदुब्भवाण घट्टादी ।**
**पलिमंथो पुव्वुत्तो, मंथिज्जति संजमो जेण ॥ ३३७३॥**

अन्यसंस्तारकमार्गणे **सूत्रादिषु** सूत्रेष्वर्थेषु [च] विक्षेपो **व्याघातः** परिमन्थ इत्यर्थः। तथा-[च]ये तत्राऽऽ**गन्तुकाः** प्राणाः कीटिकादयो ये च **तदुद्भवा** मत्कुणादयः, तेषां यत् **घट्टनादि** तन्निमित्तमपि प्रायश्चित्तम्। इदानीं **परिमन्थो** व्याख्येयः, स च पूर्वमेव **विक्खेवो सुत्तादिसु** इत्यादिना ग्रन्थे**नोक्तः**। अथ कस्मात् व्याक्षेपो घट्टनादि वा परिमन्थ इत्युच्यते ? तत आह- **येन** कारणेन तेन **संयमः** उपलक्षणमेतत् सूत्रमर्थश्च **मथ्यते** तेन **परिमन्थ** इति॥ ३३७३॥



**तम्हा उ न घेत्तव्वो, उउम्मि दुविहो वि एस संथारो ।**
**एवं सुत्तं अफलं, सुत्तनिवातो उ कारणितो ॥ ३३७४॥**

**यस्मादे**ते दोषाः,तस्माद्धेतोः **ऋतुबद्धे** काले **द्विविधोऽप्येष** परिशाट्यपरिशाटिरूपः **संस्तारो न गृहीतव्यः**। अत्र पर आह-**एवं** सति **सूत्रमफलम्,** सूत्रे तृणमयस्य शय्यासंस्तारकस्याऽ-नुज्ञानाद्। आचार्य आह-**सूत्रनिपातः कारणिकः** कारणवशात् प्रवृत्तः॥ ३३७४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तदेव कारणमुपदर्शयति—

**सुत्तनिवातो तणेसुं, [१]देसि गिलाणए य उत्तमट्ठे य।**
**चिक्खिल्लपाणहरिए, फलगाणि वि कारणज्जाते॥ ३३७५ ॥**

**सूत्रस्य निपातो** निपतनमवकाश इति भावः। [**तृणेषु**] **देशे** देशविशेषे तथा **ग्लाने उत्तमार्थे च** तथा **चिक्खल्ले** कर्दमे **प्राणे** प्राणजाते भूमौ संसक्ते तथा **हरिते** हरितकाये एवंरूपे **कारणजाते** सति **फलकान्यपि** गृह्यन्ते फलकरूपोऽप्यपरिशाटिः संस्तारको गृह्यते इति गाथासङ्क्षेपार्थः॥ ३३७५॥

साम्प्रतमेनामेव विवरीषुः प्रथमत'स्तृणेषु देशे' इत्यस्य व्याख्यानमाह—

**असिवादि कारणगता, उवहीकुत्थणं अजीरगभया वा ।**
**अझुसिरमसंधि अबीए, एक्कमुहे भंगसोलसगं ॥ ३३७६॥**

१. देसा-ला.॥

For Private and Personal Use Only

**अशिवादिभिः कारणै**स्तत्र देशे **गता** ये वर्षारात्रे पानीयेन प्लाव्येत यथा सिन्धुविषयेऽथवा तत्र देशे स्वभावत उषरा भूमिस्ततो रात्रौ शीतलवातसंपर्कतोऽवश्यायपतनतो वा जलप्लावितेव सा भूमिरुपजायते, अथवा आसन्नीभूतेन पानीयेन तमवकाशमप्राप्नुवताऽपि भूमिः स्विद्यति तत्रो**पधेः कोथनं** मा भूयात् मा वा अजीर्णेन ग्लान्यमित्युपधिकोथनभयाद**जीर्णकभयाद्वा** तृणानि गृह्णन्ति साधवः, तानि च **अझुसिराणि असन्धीनि अबीजानि** च, एतान्येकमुखानि क्रियन्ते। अत्र च **अझुषिर-असंधि-अबीज एकमुख**रूपेषु चतुर्षु पदेषु **भङ्गषोडशकं** षोडश भङ्गा ते च प्रस्तारतोऽवगन्तव्याः

| | | | |
|---|---|---|---|
| । । । । | । ऽ । । | ऽ । । । | ऽ ऽ । । |
| । । । ऽ | । ऽ । ऽ | ऽ । । ऽ | ऽ ऽ । ऽ |
| । । ऽ । | । ऽ ऽ । | ऽ । ऽ । | ऽ ऽ ऽ । |
| । । ऽ ऽ | । ऽ ऽ ऽ | ऽ । ऽ ऽ | ऽ ऽ ऽ ऽ |

तत्र अझुषिरादिपदव्याख्यानार्थमाह—

गाथा ३३७३-३३७७ कारणे ऋतुबद्धेकाले संस्तारक-ग्रहणविधिः



For Private and Personal Use Only

**कुसमादि अझुषिराई, असंधबीयाई एक्कतो मुहाइ ।**
**देसीपोरपमाणा, पडिलेहा तिन्नि वेहासं ॥ ३३७७॥**

**कुशादीनि** कुश-वच्चकप्रभृतीनि तृणानि **अझुषिराणि असन्धीनि अबीजानि** च भवन्ति, तानि एक**मुखानि** कर्त्तव्यानि, तत्र भङ्गषोडशकमध्ये यत्र भङ्गे झुषिराणि तत्र प्रायश्चित्तं चत्वारो लघुकाः, बीजेषु प्रत्येकेषु पञ्च रात्रिन्दिवानि लघुकानि, अनन्तकायिकेषु गुरुकाणि, शेषेषु भङ्गेषु मासलघु, प्रथमे भङ्गे गृह्णन्तः शुद्धाः, **देशीपोरे**त्यादि, देशीत्यंगुष्ठोऽभिधीयते तस्य यत् पर्व तत्**प्रमाणानि** जिनकल्पिकानां स्थविरकल्पिकानां च तृणानि भवन्ति। इयमत्र भावना- अङ्गुष्ठस्य यत् पर्व तत्राऽङ्गुल्यग्राणि स्थापयित्वा यावद्भिस्तृणैर्मुष्टिरापूर्यते तावन्ति मुष्टिप्रमाणानि जिनकल्पिकानां स्थविरकल्पिकानां च तृणानि भवन्ति। एतेषां च तृणानां **प्रत्यु-पेक्षास्तिस्त्रः**, तद्यथा— प्रभाते मध्याह्ने अपराह्ने च। यदा च भिक्षादौ गच्छन्ति तदा **विहायसि** कुर्वन्ति॥ ३३७७॥

साम्प्रतमेतदेव किञ्चिद् व्याचिख्यासुराह—

**अंगुट्ठपव्वमेत्ता[1], जिणाण थेराण होइ संडासो ।**
**भूमीए विरल्लेउं, अवणित्तु पमज्जए भूमिं ॥ ३३७८ ॥**

**अङ्गुष्टपर्वमात्राणि** अङ्गुष्टपर्वपरिमितमुष्टिप्रमाणानि **जिनानां** जिनकल्पिकानां **स्थविराणां** स्थविरकल्पिकानां **भवन्ति,** तैश्च तृणैः संस्तारक आस्तीर्यमाणस्तावद्भवति यावत् **संडासः,** तानि च **भूमौ विरल्य** शयनार्थं विरलीकृत्य भूमिप्रमार्जनसमये **अपनीय भूमिं प्रमार्जयति॥ ३३७८॥**

सम्प्रति 'गिलाणे उत्तमट्ठे' य इति व्याख्यानार्थमाह—

**गेलन्न उत्तमट्ठे, उस्सग्गेणं तु वत्थसंथारो।**
**असतीए अझुसिराइं, खराऽसतीए उ झुसिरा वि ॥ ३३७९ ॥**

यो नाम **ग्लानो** यो वा प्रतिपन्नो**त्तमार्थः** कृतानशनप्रत्याख्यानः, तस्मिन् द्वयेऽपि **संस्तारक उत्सर्गतो वस्त्ररूपः** क्रियते, तस्य कोमलतया समाधिभावात्, **असति** अविद्यमाने वस्त्ररूपे संस्तारके **अझुषिराणि** कुश-[2]वल्ककप्रभृतीनि मृग्यन्ते। अथ तानि **खराणि** यदि



१. पोरमेत्ता-ला.॥ २. °वच्चक-मु.पु.प्रे.॥

वा न सन्ति तदा [असति] **झुसिराण्यपि** शाल्यादिपलालमयान्यानेतव्यानि ॥ ३३७९ ॥

**तद्दिवसं मलियाई, अपरिमिय सयं तुयट्ट जयणाए ।**
**उभयट्ठ उट्ठिए ऊ, चंकमणे वेज्जकज्जे वा ॥ ३३८० ॥**

**तद्दिवसं** प्रतिदिवसं **मलितानि** तृणान्युत्सार्यन्ते अन्यानि च समानीयन्ते, तानि चाऽ**परिमितानि** गृह्यन्ते यथा समाधिर्भवति तथा **सकृत्** एकवारं **तुयट्टानि** प्रस्तारितानि तिष्ठन्ति, तत्र **यतनया** करणम्, **उभयं** नाम उच्चार-प्रश्रवणं च, **तदर्थमुत्थिते** ग्लाने उत्तमार्थे वा अन्यो निषीदति, किं कारणम्? इति चेत् , प्राणिदयार्थम् , अन्यथा झुषिरभावतस्तत्रागन्तुकाः प्राणास्तृणान्युपलीयेरन् स च तावन्निषीदति यावत् स तत्र प्रत्यागच्छति। एवं **चङ्क्रमणा**र्थमभ्युत्थिते प्रवातार्थं वा बहिर्निर्गते **वैद्यकार्ये** वा बहिर्नीते यावत् स प्रत्यानीयते तावदन्यो निषीदति, तस्मिन्नागते स उत्तिष्ठति; अथवा स गुरुणामपि पूज्य इति तस्मिन् पूर्वोक्तकारणैरुत्थिते तत्रान्यस्य निषदनं न कल्पते तेषां तृणानामुपरि हस्तः कर्त्तव्यः। एतदेवाह—

**अन्नो निसिज्जइ तहिं, पाणदयट्ठाए तत्थ हत्थो वा ।**
**निक्कारणमगिलाणे, दोसा ते चेव य विकप्पो ॥ ३३८१ ॥**

**अन्यस्तत्र** संस्तारके **प्राणदयार्थं निषीदति**[गृह्यते]**हस्तो वा** तत्र क्रियते। अत्र भावना प्रागेव कृता, एतैः कारणैर्यथोक्तरूपः संस्तारकः [गृह्यते] ऋतुबद्धे काले **निष्कारणं** देशादिकारण-मन्तरेणा**ऽग्लाने** अग्लानस्य तृणमयसंस्तारकग्रहणे त एव पूर्वोक्ता **दोषा विकल्पो** विकल्प-दोषश्च। अत्र विकल्पग्रहणेन कल्पप्रकल्पावपि सूचितौ ॥ ३३८१॥

तेषां व्याख्यानमाह—

**अत्थरणवज्जितो ऊ, कप्पो[१] पकप्पो उ होइ पट्टदुगं ।**
**तिप्पभिई तु विकप्पो, अकारणेणं तणाभोगो ॥ ३३८२॥**

**आस्तरणवर्जितः कल्पः** किमुक्तं भवति? यज्जिनकल्पिका अनवस्तृते रात्रावुक्कुडुकास्तिष्ठन्ति एष कल्प इत्यभिधीयते, यत् पुनः **पट्टद्विकं भवति** संस्तारोत्तरपट्टयोरुपरि यत् सुप्यते इत्यर्थः एष भवति **प्रकल्पः**। यानि पुन**स्त्रिप्रभृतीनि सं**स्तारके प्रस्तारयति एष विकल्पः। यच्च **अकारणे** कारणमन्तरेण **तृणानां भोगः** क्रियते एषोऽपि विकल्पः॥ ३३८२॥



---

१. 'कप्पो पुण होति उपट्टदुगंति' पाठः छन्दानुसारी भवति इति ला. पृ.३२१॥

अथवा अन्यथा कल्पप्रकल्पव्याख्यानमाह—

**अहवा अझुसिरगहणे, कप्पपकप्पो[1] समावडिय कज्जे ।**
**झुसिरे व अझुसिरे वा, होइ विकप्पो अकज्जम्मि ॥ ३३८३॥**

**अथवेति** प्रकारान्तरोपदर्शने यत् कारणे **समापतिते अझुषिराणि** तृणानि गृह्णाति एष **कल्पः**, यत् पुनः **कार्ये समापतिते झुषिराण्यपि** तृणानि गृह्णाति एष **प्रकल्पः**, यत् पुनरकार्ये झुषिराणि वा अझुषिराणि वा गृह्णाति एष भवति विकल्पः ॥ ३३८३ ॥ एवं तावत् तृणानामृतुबद्धे काले कारणेन गृहीतानां यतनोक्ता सम्प्रति कारणैरेव ऋतुबद्धे काले फलकरूपस्य संस्तारकस्य ग्रहणं यतनां चाह—

**जह कारणे तणाइं, उउबद्धम्मि उ हवंति गहियाइं ।**
**तह फलगाणि वि गेण्हइ, चिक्खल्लादीहिं कज्जेहिं ॥ ३३८४॥**

१. कप्प पकप्पो व्व कज्जे झुसिरे वि- पु. प्रे. ॥

**यथा कारणे** देशादिलक्षणे **ऋतुबद्धे** काले **तृणानि गृहीतानि भवन्ति तथा** ऋतुबद्धे एव काले **चिक्खल्लादिभिः कार्यैः**, आदिशब्दात् प्राणसंसक्ति-हरितकायपरिग्रहः **फलकान्यपि गृह्णाति** ॥ ३३८४॥

तत्र यतनामाह—

**अझुसिरमविद्धमफुडिय अगरुय अणिसट्ठवीणगहणेण ।**
**आया संजम गुरुगा, सेसाणं संजमे दोसा ॥ ३३८५ ॥**



**अझुषिरो** झुषिररहितो **अविद्धो** वेधरहितो **अस्फुटितो** अराजितोऽ**गुरुको** गुरुभाररहितो-ऽ**निसृष्टः** प्रातिहारिकः, एतेषां च पञ्चानां पदानां द्वात्रिंशत् भङ्गाः, ते च प्रागिव प्रस्तारतः स्वयं ज्ञातव्याः। अत्र यः प्रथमभङ्गः सोऽनुज्ञातस्तत्र दोषाभावात् , अयं लघुकः शेषदोषविनि-र्मुक्तश्च। ततो यथा वीणालघुत्वात् दक्षिणहस्तेन सुखं विवक्षितस्थानं नीयते एवमेषोऽपि। तथा चाह— **वीणाग्रहणेन** यत्र तत्र वा नीयते इति वाक्यशेषः, शेषा एकत्रिंशत् भङ्गा नानुज्ञाताः। तत्र गुरुके **आत्म**विराधना **संयम**विराधना च, तत्र प्रायश्चित्तं चतु**र्गुरुकम्**, संयम-

विराधना पुनरेवं भवति-गुरुके हस्तात् पतिते एकेन्द्रियादीनामुपघातः, अत्र स्वस्थान-प्रायश्चित्तं, **शेषेषु संयमे दोषाः** संयमविराधना, ततस्तत्र प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः ॥ ३३८५ ॥

**अज्झुसिरमादीएहिं, जा अणिसट्ठं तु पंचिगा भयणा ।**
**अहसंथडपासुद्धे, वुच्चत्थे होंति चउलहुगा ॥ ३३८६ ॥**

**अज्झुसिरादिभिः** पदैरारभ्य **यावदनिसृष्ट**मिति पञ्चमं पदं तेषु **पञ्चसु** पदेषु प्रथमभङ्गरूपे इयं वक्ष्यमाणा **भजना** विकल्पना। तामेवाह— **अहसंथडे**त्यादि, शय्यातरेण य उपाश्रयो दत्तस्तस्मिन् यो **यथावस्तृतः** प्रथमभङ्गरूपः संस्तारकः[स]सङ्ग्रहीतव्यस्तदभावे **पार्श्वेन** कृतः, तस्याप्यभावे **ऊर्ध्व**कृत एवंक्रमेण यतनया ग्रहणं कर्त्तव्यं यदि पुनर्विपर्यासेन गृह्णाति तदा **विपर्यस्ते** गृह्यमाणे प्रायश्चित्तं **चत्वारो** लघुकाः ॥ ३३८६ ॥

**अंतोवस्सय बाहिं, निवेसणा वाडसाहिए गामे ।**
**खेत्तंतो अन्नगामा, खेत्तबहिं वा अवोच्चत्थं ॥ ३३८७ ॥**

**एवमन्तरुपाश्रयस्य** यदि संस्तारकं फलकरूपं न लभते तथा **बहि**रुपाश्रयस्य तथैव

ग्रहीतव्यम्। तत्राप्यलाभे तेनैव क्रमेण **निवेशना**दानेतव्यः, तत्राऽप्यसति **वाटकात्,** तत्राप्यलाभे **साहीतः,** तत्राप्यसति दूरादपि **ग्राम**मध्यादानेतव्यः, ग्राममध्येऽप्यसति **क्षेत्रान्त**स्तत्क्षेत्र-मध्यभागात् **अन्यग्रामा**दानेतव्यः, तत्राप्यसति **क्षेत्राद्बहि**ष्ठोऽप्यानेयः। एव**मविपर्यस्त**मानयनं कर्त्तव्यं, यदि पुनः सति लाभे विपर्यस्तमानयति तदा प्रायश्चित्तं चत्वारो लघुकाः॥ ३३८७॥

सम्प्रत्यानयने यतनामाह—

**सुत्तं च अत्थं च दुवे वि काउं, भिक्खं अडंतो उ दुए वि एसे ।**
**लाभे सइ एति दुवे वि घेत्तुं, लाभासती एग दुए व हावे ॥ ३३८८ ॥**

**सूत्रं च अर्थं च द्वावपि कृत्वा भिक्षामटन् द्वावप्येषयेत्** गवेषयेत्, तद्यथा— भिक्षां संस्तारकं च। तत्र **लाभे सति** समर्थो **द्वावपि गृहीत्वा [ एति ]**प्रत्यागच्छति, **लाभासति** भिक्षां गतस्य संस्तारकलाभाऽभावे **एकं** सूत्रमर्थो वा यदि वा **द्वावपि हापयति** संस्तारकगवेषणेन ॥ ३३८८ ॥

**दुल्लभे सेज्जसंथारे, उउबद्धम्मि कारणे ।**
**मग्गणम्मि विही एसो, भणितो खेत्तकालतो ॥ ३३८९ ॥**

**ऋतुबद्धे** काले **कारणे** समापतिते **दुर्लभे शय्यासंस्तारके** यन्मार्गणं तत्र **क्षेत्रतः कालतश्च विधिरेष भणितो**ऽनेन विधिना मार्गणं कर्त्तव्यं नान्यथेति ॥ ३३८९ ॥

**उउबद्धे कारणम्मी, अगेण्हणे लहुगगुरुगवासासु ।**
**उउबद्धे जं भणियं, तं चेव य सेसयं वोच्छं ॥ ३३९० ॥**

**ऋतुबद्धे** काले **कारणे** सति यदि संस्तारकं **न गृह्णाति** तदा प्रायश्चित्तं चत्वारो **लघुकाः**, **वर्षासु** पुनरवश्यं ग्रहीतव्यः संस्तारकस्ततस्तत्र तस्याऽग्रहणे चत्वारो **गुरुकाः**। तथा **या ऋतुबद्धे** यतना **भणिता** गवेषणादौ सा वर्षास्वपि द्रष्टव्या, **शेषं वक्ष्यामि** ॥ ३३९० ॥

प्रतिज्ञातमेव करोति—

**वासासु अपरिसाडी, संथारो सोऽवस्स घेत्तव्वो ।**
**मणिकुट्टिमभूमीए, वि तमगिण्हणे चउगुरु आणा ॥ ३३९१ ॥**

**वर्षासु** यदि **मणिकुट्टिमायां भूमौ** वसन्ति तथापि **संस्तारकोऽपरिशाटिः** फलकरूपोऽ**वश्यं गृहीतव्यस्तमगृह्णति** प्रायश्चित्तं **चत्वारो गुरुकास्**तथा **आज्ञा** उपलक्षण-मेतदनवस्थादयश्च दोषाः ॥ ३३९१ ॥

किं कारणम्? अत आह—

**पाणा सीयल कुंथू, उप्पायग दीह-गोम्हि-सिसुनागे ।**
**पणए उवहि कुत्थण, मलउदकवहो अजीरादी ॥ ३३९२ ॥**

कालस्य **शीतल**तया भूमौ **प्राणा** सम्मूर्च्छन्ति, के ते इत्याह-**कुन्थवः** प्रतीताः, **उत्पादका** नाम ये भूमिं भित्त्वा समुत्तिष्ठन्ति। **दीर्घाः** सर्पास्तेभ्य आत्मविराधना, **गोम्मी** नाम कर्णशृगाली, **शिशुनागः** अलसः। तथा शीतलायां भूमौ **पनकः** सञ्जायते, **उपधा**वपि पनकाः सम्मूर्च्छन्ति, तथा उपधेः शीतलभूमिस्पर्शतः कोथनसम्भवः। तथा सत्रे(स्ने)हधूलिलगने **मल**सम्भवः, ततो हिण्डमानस्य वर्षे पतति **उदकवधो**ऽप्कायविराधना, तथा उपधेर्मलिनत्वेनारतिसम्भवे निद्राया अलाभतो**ऽजीर्णत्व**सम्भवः, **आदि**ग्रहणात् ततो ग्लानत्वं, तदनन्तरं चिकित्सा-करणेत्यादि परिग्रहः ॥ ३३९२ ॥

**तम्हा खलु घेत्तव्वो, तत्थ इमे पंच वण्णिया भेया ।**
**गहणे य अणुण्णवणे, एगंगिय अकुयपाउग्गे ॥ ३३९३ ॥**

यस्मादेते दोषाः **तस्मादवश्यं** फलकरूपः संस्तारको **ग्रहीतव्यः। तत्र** च ग्रहणे **इमे** वक्ष्यमाणाः **पंच[1] वण्णिया भेया** । तानेवाह— **ग्रहणे अनुज्ञापनायामेकाङ्गिके अकुचे प्रायोग्ये** वा॥ ३३९३ ॥

तत्र प्रथमतो ग्रहणद्वारमाह—

**गहणं च जाणएणं सिज्जाकप्पो उ जेण समहीतो ।**
**उस्सग्गऽववाएहिं सो गहणे कप्पितो होति ॥ ३३९४ ॥**

**येन समधीतः** सम्यगधीतः **शय्याकल्पः** शय्याग्रहणविधिः तेन **जानता ग्रहणं** संस्तारकस्य कर्त्तव्यम्। यतः **स उत्सर्गाऽपवादाभ्यां ग्रहणे कल्पिको** योग्यो **भवति** ॥ ३३९४ ॥

१. पञ्च वर्णिता भेदाः-मु. ॥

गतं ग्रहणद्वारमिदानीमनुज्ञापने या यतना तामाह—

**अणुण्णवणाए जयणा, गहिए जयणा य होति कायव्वा ।**
**अणुण्णवणाए लद्धे, बेंति पडिहारियं एयं ॥ ३३९५॥**

**अनुज्ञापनायां यतना गृहीते च यतना कर्त्तव्या,** तत्राऽनुज्ञापनायामियं-**लब्धे** संस्तारके **ब्रुवते 'एतं** संस्तारकं **प्रातिहारिकं** ग्रहीष्यामो यावत् प्रयोजनं तावद्धरिष्यामः पश्चात् समर्पयिष्याम' इति ॥३३९५॥

**कालं च ठवेइ तहिं, बेंति य परिसाडिवज्जमप्पेऽहं ।**
**अणुण्णवणजयणा एसा, गहिए जयणा इमा होइ ॥ ३३९६ ॥**

यदा संस्तारको लब्धो भवति तदा **तत्र कालं स्थापयति** 'एतावन्तं कालं धरिष्यामः' तथा ब्रूते 'एष संस्तारको जराजीर्णतया परिशाटिरूपस्तमेनं वयं ग्रहीष्यामस्तत्र निर्व्याघातेनैतावता कालेन, यत् **परिशाटि** तत् **मुक्त्वा** शेष**मर्पयिष्यामः**'। एवं यदि प्रतिपद्यते तदा गृह्यते, अथ न प्रतिपद्यते तदा न ग्रहीतव्यः किन्त्वन्यो याच्यते। अथ अन्यो याच्यमानो न लभ्यते

तदा स एव परिगृह्यते केवलं परिशाटौ यतना विधेया, **एषा अनुज्ञापने यतना। गृहीते यतना इयं** वक्ष्यमाणा **भवति** ॥ ३३९६॥

तामेवाह—

**कस्स पुणप्पेयव्वो, बेति ममं जाहे तं भवे सुन्नो ।**
**अमुगस्स वि सो वि सुन्नो, ताहे घरम्मी ठवेज्जाहि ॥ ३३९७॥**

**कहि एत्थ चेव ठाणे, पासे उवरिं व तस्स पुंजस्स ।**
**अहवा तत्थेव उ ते, वि हु नीयल्लगा अम्हं ॥ ३३९८॥**

गृहीते संस्तारकः ? पुनः पृच्छति— 'कार्यसमाप्तौ **कस्य पुनरर्पयितव्य** एष संस्तारकः ?१' एवमुक्ते स यदि ब्रूते— '**ममैव** समर्पयितव्य इति' तदा वक्तव्यम् — **यदा त्वं भवति शून्यः**, किमुक्तं भवति- 'यदा यूयं न दृश्यध्वे तदा कस्य समर्पणीयः' एवमुक्ते स ब्रूयाद्- **अमुकस्य,** ततो भूयोऽपि वक्तव्यं- '**सोऽपि** यदा **शून्यो** भवति न दृश्यते इत्यर्थः, **तदा** कस्मै समर्पणीयः ?' अथ ब्रूयाद् अत्रैव **गृहे स्थापयेत्** । ततः पुनरपि पृच्छेत्- **कतरस्मिन्नवकाशे**

स्थापनीयः ? एवमुक्ते यदि स ब्रूयात् 'यतोऽवकाशात् गृहीतो**ऽत्रैव स्थाने** स्थापयेत्', यदि वा वदेत्—'अत्रैव स्थाने छन्ने प्रदेशेऽथवा यतोऽवकाशात् गृहीतस्तस्य **पार्श्वे** अथवा यस्य पुञ्जस्योपरिस्थितो गृहीतस्**तस्य पुञ्जस्यो**परि स्थापयितव्यः, यदि वा यत्र यूयं नयथ **तत्रैव** तिष्ठतु, यतो यस्योपाश्रये यूयं वसथ **तेऽपि हु** निश्चितम**स्माकं निजकाः**'। किं बहुना ? यत्र वदति तत्र नीत्वा स्थापयितव्यः ॥ ३३९७॥ ३३९८॥

**एसा गहिए जयणा, एतो गिण्हंतए उ वोच्छामि ।**
**एगो च्चिय गच्छे पुण, संघाडो गिण्हऽभिग्गहितो ॥ ३३९९॥**

**एषा** अनन्तरोदिता **गृहीते यतना, अत** ऊर्ध्वं **गृह्णति** यतनां **वक्ष्यामि**। प्रतिज्ञातमेव करोति **गच्छे पुनरेक एव सङ्घाट आभिग्रहिकः** संस्तारकं **गृह्णाति** न शेषोऽन्यथाऽव्यवस्थापत्तेः ॥ ३३९९ ॥

**आभिगहियस्स असती, वीसुं गहणे पडिच्छिउं सव्वे ।**
**दाऊण तिन्नि गुरुणा, गेण्हंतन्ने जहावुड्ढं ॥ ३४०० ॥**

गाथा ३३९९-३४०५ संस्तारकस्य मार्गणे अनुज्ञापने ग्रहणे च विधिः

**आभिग्रहिकस्याऽभावे** विष्वक् प्रत्येकं सङ्घाटकानां ग्रहणं प्रवर्त्तते। इयमत्र भावना— एकैकः सङ्घाटकः प्रत्येकमेकैकं संस्तारकं मार्गयति अभ्यधिकास्त्रयः संस्तारका आचार्यस्य योग्या मृग्यन्ते, अत्रापि सैव मार्गणे अनुज्ञापने गृहीते च यतना, यावत् कार्यसमाप्तौ क्व स्थापयितव्य इति, एवं **विष्वग्ग्रहणे सर्वान्** संस्तारकान् **प्रतीच्छ्य** प्रतिगृह्य **त्रीन्** संस्तारकान् **गुरोर्दत्त्वा शेषानन्यान् यथावृद्धं गृह्णन्ति**। इयमत्र सामाचारी— आभिग्रहिकसङ्घाटकेन आनीतानां प्रत्येकं सङ्घाटैरानीतानां वा मध्यादाचार्यस्योत्कृष्टान् त्रीन् संस्तारकान् प्रवर्त्तको दत्त्वा शेषाणां यथारत्नाधिकतया संस्तारकान् भाजयति, तेऽपि तथैव गृह्णन्ति ॥ ३४०० ॥

**णेगाण उ नाणत्तं, सगणेयरभिग्गहीण वन्नगणे ।**
**दिट्ठोभासणलद्धे, सन्नातुड्ढे पभू चेव ॥ ३४०१ ॥**

**अनेकानां स्वगणेतरा**भिग्रहि**काणां यन्नानात्वं** प्रतिविशेषो **यच्चान्यगणेन** सह स्वगणसाधूनां समुदायेन संस्तारकान् मार्गयतामाभवद्व्यवहारनानात्वं तद् वक्ष्ये, तत्र पञ्च द्वाराणि, तद्यथा-**दृष्टद्वारमवभाषणं** नाम याचनं तद्द्वारं [लब्धद्वारं]**संज्ञाति**कद्वारमूर्ध्वद्वारं प्रभुद्वारं चेति ॥ ३४०१ ॥

**दिट्ठादिएसु एत्थं, एक्केक्के होंतिमे उ छब्भेया ।**
**दट्ठूण१ अहाभावेण२, वाचि सोउं व तस्सेव३ ॥ ३४०२ ॥**
**विप्पपरिणामणकहणा४, वोच्छिन्ने चेव५ तिपडिसिद्धे य ६।**
**एएसिं तु विसेसं, वोच्छामि अहाणुपुव्वीए ॥ ३४०३ ॥**

अत्र एषु **दृष्टादिकेषु** द्वारेषु मध्ये **एकैकस्मिन्** द्वारे **इमे** वक्ष्यमाणाः **षड् भेदा भवन्ति** तद्यथा-**दृष्ट्वे**ति द्वारं, **यथाभावेने**ति द्वारं, **तस्य वा वचनतः श्रुत्वे**ति द्वारं, **विपरिणामन-कथन**द्वारं, **व्यवच्छिन्न**द्वारम्, **त्रिप्रतिषिद्ध**द्वारं च। **एतेषां** तु द्वाराणां **यथानुपूर्व्या** क्रमेण **विशेषं वक्ष्यामि**। यदपि च दृष्टादिषु द्वारनानात्वं तदपि यथावसरं **वक्ष्यते** ॥ ३४०२ ॥ ३४०३ ॥

**संथारं देहंतं, असहीणपहुं तु पासेउं पढमो ।**
**ते ताहे पडियरिऊणं, ओभासिय लद्धुमाणेइ ॥ ३४०४ ॥**

**संस्तारकं** फलकरूपं पट्टरूपं वा **देहान्तं** देहप्रमाणं, अस्वाधीनप्रभु 'न विद्यते स्वाधीनस्तत्कालप्रत्यासन्नः प्रभुर्यस्य स तथा तम् **अस्वाधीनप्रभुं दृष्ट्वा** कमपि पृच्छति 'कस्यैष

संस्तारकः ?' स प्राह— 'अमुकस्य परमिदानीमत्र स न तिष्ठति' ततः सङ्घाटकः चिन्तयति यदा संस्तारकस्वामी समागमिष्यति तदा याचिष्ये इति विचिन्त्य प्रतिसरति प्रतिनिवर्त्तते वसतावागच्छतीत्यर्थः । **ततः प्रतिनिवृत्य** तदा अन्यदा वा अवभाषिते याचिते संस्तारकं **लब्ध्वा** वसति**मानयति** ॥ ३४०४॥

अत्रैवापान्तराले वक्तव्यशेषमाह—

**संथारो दिट्ठो न य, तस्स जो पभू लघुगो अकहणे गुरुणं ।**
**एहि एव कहिए वा, अन्नेण वि आणितो तस्स ॥ ३४०५॥** दारं १॥



यदा संस्तारकं प्रेक्ष्य तस्य स्वामिनमदृष्ट्वा वसतौ प्रत्यागतस्तदा तेन गुरूणामाचार्याणां कथनीयं यथा— **दृष्टः संस्तारको न च तस्य** संस्तारकस्य **यः प्रभुः** स उपलब्ध इति एवं चेन्नालोचयति तस्य प्रायश्चित्तं **लघुको** मासः। तथा कथिते **अकथिते** वा **गुरूणां यद्यन्येन** सङ्घाटकेनाऽमुकस्य गृहे संस्तारकोऽमुकेन सङ्घाटकेन दृष्टः परं स्वामी नो लब्ध इति न याचितस्तस्माद्वयं याचित्वाऽऽनयाम इति विचिन्त्य तत्र गत्वा स्वामिनमनुज्ञाप्या**नीतः** तथापि येन पूर्वं दृष्टस्तस्य पूर्वं भवति न पाश्चात्यसङ्घाटकस्य १॥ ३४०५॥

तदेवं 'दट्ठूणेति' व्याख्यातमिदानीं 'यथाभावेनेति' व्याख्यानयति—

**बितिओ उ अन्नदिट्ठं, अहभावेणं तु लद्धमाणेति ।**
**पुरिमस्सेव उ स खलू, केई साहारणं बेंति ॥ ३४०६ ॥** दारं २।

प्रथमसङ्घाटकेन संस्तारकं दृष्ट्वा स्वामिनमनुपलभ्याऽयाचित्वैव वसतौ प्रत्यागते **द्वितीयः** सङ्घाटकोऽशठभावो**ऽन्येन** पूर्वं **दृष्टं** इत्यजानानो **यथाभावेन** तमन्यदृष्टं संस्तारकं स्वामिनमनुज्ञाप्य **लब्ध्वा समानयति** स कस्याभवति? इति चेद्, अत आह— **स खलु** नियमात् **पूर्वस्य** सङ्घाटकस्य येन पूर्वं दृष्टो न पाश्चात्यस्य येन समानीतः। **केचिद्**उभयोरपि सङ्घाटयोराभवनमधिकृत्य **साधारणं ब्रुवते** २॥ ३४०६ ॥

गतं यथाभावेनेति द्वारमिदानीं 'तस्यैव वा वचनतः श्रुत्वेति' द्वारव्याख्यानार्थमाह—

**तइतो उ गुरुसगासे, विगडिज्जंतं सुणेत्तु संथारं ।**
**अमुगत्थ मए दिट्ठो, हिंडंतो वऽन्नसीसंतं ॥ ३४०७ ॥** दारं ३।

**तृतीयः** सङ्घाटकः प्रथमेन सङ्घाटकेन क्वापि संस्तारकं दृष्ट्वा स्वामिनमनुपलभ्य वसतौ

प्रत्यागतेन **गुरुसकाशे** आचार्यस्य समीपे 'दृष्टो मया संस्तारकः परं स्वामी न दृष्टस्तत आगतं सन्तं याचिष्ये' इति **संस्तारकं विकटयमान**मालोच्यमानं **श्रुत्वा**, यदि वा भिक्षां **हिण्डमानोऽन्यस्य** सङ्घाटकस्य शास्ति कथयति यथा— '**अमुकत्र मया दृष्टः** संस्तारकः परं स्वामी नास्तीति न याचितः, स्वामिन्यागते याचिष्यामि' एवं **शिष्यमाणं** श्रुत्वा३ ॥ ३४०७ ॥

**गंतूण तहिं जायइ, लद्धम्मी बेति अम्ह एस विही ।**
**अन्नदिट्ठो न कप्पइ, दिट्ठो एसो उ अमुगेणं ॥ ३४०८ ॥**

**मा देज्जसि तस्सेयं, पडिसिद्धे एस मज्झं तु ।**
**अन्नो धम्मकहाए, आउट्टेऊण तं पुव्वं ॥ ३४०९ ॥**

**संथारगदाणफलादिलोभियं बेति देहि संथारं ।**
**अमुगं ति तिन्नि वारा, पडिसेहेऊण तो मज्झं ॥ ३४१० ॥** दारं ४।

**गत्वा तत्र** संस्तारकस्वामिनं संस्तारकं **याचते** याचित्वा **लब्धे** तं[वि]परिणामयति यथा **एषोऽस्माकं विधिः** आचारो योऽन्येन **दृष्टो** दृष्टा च संस्तारकस्वामिनं याचिष्ये इत्यध्यवसितः

सोऽन्यस्य **न कल्पते**। **एष** च संस्तारकोऽ**मुकेन दृष्टस्त**तस्त्वं मम प्रियतया **तस्य** याचमानस्य **मा** संस्तारकममुं दद्याः, ततस्तस्मिन् **प्रतिषिद्धे एष मम** भविष्यति, अत्रेयमाभावनचिन्ता- यदि विपरिणामकरणे[न] लब्धस्ततस्तस्य नाऽऽभवति किन्तु पूर्वस्यैव सङ्घाटस्य, अथवा द्वितीयो विपरिणामनप्रकारस्तमाह— गुरुसकाशे विकट्यमानमन्यस्य वा सङ्घाटस्य शिष्यमाणं संस्तारकं श्रुत्वा **अन्यः** सङ्घाटकस्तत्र गत्वा तं संस्तारकस्वामिनं **धर्मकथया** धर्मकथाकथनेनाऽऽ**वृत्त्या**-ऽऽत्मानुकूलं कृत्वा पश्चाद् विपरिणामयति। कथम्? इत्याह— **संथारगदाणे**त्यादि, संस्तारकस्वामिनं **पूर्वं संस्तारकदानफलादिलोभितं ब्रूते**- **'अमुकं** सङ्घाटकं याचमानं **त्रीन् वारान् प्रतिषिध्य** तदनन्तरं **मम संस्तारकं देहि**' एवं विपरिणामकरणतो लब्धः स पूर्वस्यैव सङ्घाटस्याभवति न पाश्चात्यस्य॥ ३४०८॥ ३४०९॥ ३४१०॥

अत्र प्रायश्चित्तविधिमाह—

**एवं विपरिणामिएण, लभति लहुगा य होंति सगणिच्चे ।**
**अन्नगणिच्चे गुरुगा, मायनिमित्तं भवे गुरुगो ॥ ३४११ ॥**

**एवमुक्तेन** प्रकारेण **विपरिणामितेन** स्वामिना यदि **लभते स्वगणसत्कः** साधुस्तदा

तस्य प्रायश्चित्तं चत्वारो **लघुकाः**, **अन्यगणसत्के** चत्वारो **गुरुकाः**। तथा स्वगणसत्को वा अन्यगणसत्को वा विपरिणम्य लब्ध्वा यदि पृष्ट सन् विपरिणामनमपलपति तदा **मायानिमित्तो** मायाप्रत्ययो **भव**त्यधिको **गुरुको** मासः ४ ॥ ३४११ ॥

सम्प्रति व्यवच्छिन्नद्वारमाह—

**अह पुण जेणं दिट्ठो, अन्नो लद्धो उ तेण संथारो ।**
**छिन्नो तदुवरिभावो, तहि जो लभति तस्सेव ॥ ३४१२ ॥** दारं ५।

**अथ पुनर्येन** सङ्घाटकेन **दृष्टः** संस्तारकस्**तेनाऽन्यो लब्धः संस्तारकः**, तस्य पूर्वदृष्टस्योपरि **भावो**ऽध्यवसायः **छिन्नो** व्यवच्छिन्नस्**ततो यः** पश्चात् **लभते तस्यैव** स आभवति नेतरस्य ५॥ ३४१२ ॥

गतं व्यवच्छिन्नद्वारम् । अधुना त्रिप्रतिषिद्धद्वारमाह—

**अहवा वि तिन्नि वारा उ मग्गितो न वि य तेण लद्धो उ ।**
**भावे छिन्नमछिन्ने अन्नो जो लभइ तस्सेव ॥ ३४१३॥** दारं ६।

**अथवा** येन दृष्टस्तेन याचितः परं न लब्धो द्वितीयमपि वारं याचितो न लब्धस्तृतीयमपि वारं न लब्धः। तत एवं **त्रीन वारान् याचितो न च तेन लब्ध**स्ततस्तस्योपरि यदि तस्य सङ्घाटकस्य **भावो व्यवच्छिन्नो** यदि वा **न व्यवच्छिन्न**स्तथापि **योऽन्यो लभते तस्या**ऽऽभवति न पूर्वसङ्घाटस्य६। तदेवं षड्भिर्द्वारैः समाप्तं प्रथमं दृष्टद्वारम् ॥३४१३॥ अधुनावभाषितद्वारमाह—

**एवं ताव दिट्ठम्मी, ओभासंते वि होंति छच्चेव ।**
**सोउं अहभावेण व, विप्परिणामे य धम्मकहा ॥ ३४१४ ॥**

**वोच्छिन्नम्मि व भावे, अन्नो वन्नस्स जस्स दिज्जाहि ।**
**एए खलु छब्भेया, उहासणे होंति नायव्वा ॥ ३४१५ ॥**

एवमुक्तेन प्रकारेण **दृष्टे** दृष्टद्वारे षट् भेदाः प्रकाशिताः, एव**मवभाषितेऽपि षड्**भेदा **भवन्ति** ज्ञातव्याः। तद्यथा-प्रथमं **श्रुत्वे**ति द्वारं, द्वितीयं **यथाभावेने**ति द्वारं, तृतीयं **विपरिणाम**द्वारं, चतुर्थं **धर्मकथा**द्वारं, पञ्चमं **व्यवच्छिन्नभाव**द्वारं, षष्ठ**मन्यो वाऽन्यस्ये**ति द्वारम् तत्र **एते खलु षड् भेदा अवभाषणे भवन्ति बोद्धव्याः** ॥ ३४१४॥ ३४१५॥

प्रथमद्वारव्याख्यानार्थमाह—

**ओभासिते अलद्धे, अव्वोच्छिन्ने य तस्स भावे उ ।**
**सोउं अन्नोभासइ, लद्धाणीतो पुरिल्लस्स ॥ ३४१६ ॥**

सङ्घाटकेन भिक्षामटता संस्तारको दृष्टः, संस्तारकस्वामी च संस्तारकं **याचितः** परं **न लब्धः**, अथ च **तस्य** सङ्घाटकस्य संस्तारकोपरि **भावो**ऽद्यापि **न व्यवच्छिद्यते,** तेन च सङ्घाटकेन गुरुसमीपमागत्यालोचितो यथा— 'अमुकस्य गृहे संस्तारको दृष्टो याचितश्च परं न लब्धो द्वितीयवारं याचिष्यते' एवमवभाषिते अलब्धेऽव्यवच्छिन्ने च तस्य संस्तारकस्योपरि भावे विकटनं **श्रुत्वा अन्यः** सङ्घाटकस्तत्र गत्वा **याचते** लभते च, स **लब्ध्वाऽऽनीत**स्सन् कस्याभवति? इत्यत आह— **पूर्वस्य** येन पूर्वमवभाषितोऽपि न लब्धस्तस्याऽऽभवति तद्विषयभावाव्यवच्छेदाद्, नेतरस्य ॥ ३४१६ ॥

**सेसाणि जहा दिट्ठे, अहभावादीणि जाव वोच्छिन्ने ।**
**दाराई जोएज्जा, छट्ठे विसेसं तु वोच्छामि ॥ ३४१७॥**

**शेषाणि यथाभावादीनि** चत्वारि द्वाराणि **यावद् व्यवच्छिन्नद्वारं यथा दृष्टे** दृष्टद्वारे पूर्वं भावितानि तथा योजयेत्, तद्यथा— एकेन सङ्घाटकेन भिक्षामटता क्वापि संस्तारको दृष्टो याचितश्च परं न लब्धः, द्वितीयसङ्घाटको यथाभावेन तत्र गत्वा तं संस्तारकमानयति स पूर्वसङ्घाटकस्याऽऽभवति न येनाऽऽनीतस्तस्य। अन्ये तु ब्रुवते– द्वयोरपि सङ्घाटकयोराभवनमधिकृत्य साधारण इति, गतं यथाभावद्वारम्। अधुना विपरिणामद्वारमुच्यते– गुरुसमीपे विकट्यमानमन्यस्य वा सङ्घाटकस्य कथ्यमानं याचितमलब्धं संस्तारकं [श्रुत्वा तत्र गत्वा संस्तारकस्वामिनं विपरिणमयति यथा 'यः संस्तारकोऽमुकेन साधुना याचितः, तं] मह्यं सम्प्रति देहि', अत्रापि पूर्वस्यैव सङ्घाटकस्य स आभवति न येनाऽऽनीतस्तस्य। गतं विपरिणामद्वारं, सम्प्रति धर्मकथाद्वारमुच्यते– अग्रेतनसङ्घाटकेन याचिते अलब्धे वान्यः सङ्घाटकस्तत्र गत्वा तं संस्तारकस्वामिनं धर्मकथाकथनेन समाकर्ष्य याचते संस्तारकं, स तथालब्धानीतस्सन् पूर्वसङ्घाटकस्याऽऽभवति न येन पश्चादानीतस्तस्येति। गतं धर्मकथाद्वारमधुना व्यवच्छिन्नभावद्वार-मुच्यते प्रथमसङ्घाटकेन संस्तारको याचितो न लब्धस्ततस्तद्विषये भावो व्यवच्छिन्नो गुरुसमीपे च गत्वा तथैवालोचितं, यथा– 'अमुकस्य गृहे संस्तारको दृष्टो याचितश्च परं न लब्धः स तिष्ठतु, द्वितीयं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वारं न कोऽपि याचिष्यते', एवं व्यवच्छिन्नं भावं ज्ञात्वा योऽन्यः सङ्घाटको याचते लभते च स तस्याऽऽभवति न पूर्वस्य। तदेवं योजितानि यथाभावादीनि चत्वार्यपि द्वाराणि अत ऊर्ध्वमाह- **षष्ठे** द्वारे 'अन्यो वाऽन्यस्येति' लक्षणे **विशेषोऽ**स्ति तं **वक्ष्यामि** ॥३४१७॥ प्रतिज्ञातमेव करोति-

**अच्छिण्णे अण्णोण्णं, सो वा अण्ण तु स देज्जाहि ।**
**कप्पइ जो उ पणइतो, तेण व अन्नेण व न कप्पे ॥ ३४१८ ॥**

येन प्रथमसङ्घाटकेन संस्तारको दृष्टो याचितश्च न च लब्धस्तस्य तद्विषये भावे **अच्छिन्ने** अव्यवच्छिन्ने अन्येन सङ्घाटकेन तत्र गत्वा याचिते **अन्यो** मनुष्यो**ऽन्यं** संस्तारकं यदि दद्यात् यदि वा **स** एव संस्तारकस्वामी **अन्यं** संस्तारकं **दद्यात्** तदा स तस्य **कल्पते**, **यस्तु प्रणयितो** याचितः संस्तारकः स **तेन** स्वामिना **अन्येन वा** मनुष्येण दीयमानो **न कल्पते** ॥ ३४१८ ॥

गतमवभाषितद्वारम्। अधुना लब्धद्वारमाह—

**लद्धद्दारे चेवं, जोए व जहसंभवं तु दाराइं ।**
**जत्तियमेत्तविसेसो, तं वोच्छामि समासेणं ॥ ३४१९ ॥**



For Private and Personal Use Only

**लब्धद्वारे**ऽप्येवमुक्तप्रकारेण श्रुत्वादीनि **द्वाराणि यथासम्भवं योजयेत् यावन्मात्रश्च विशेषस्तावन्मात्रं तं** विशेषं **समासेन प्रवक्ष्यामि** ॥ ३४१९ ॥

तत्र प्रथमं श्रुत्वेति द्वारमधिकृत्य विशेषमाह—

**ओभासियम्मि लद्धे, भणंति न तरामि एण्हि नेउं जे ।**
**अच्छउ नेहामो पुण, कल्ले वा घेच्छिहामो ति ॥ ३४२० ॥**

प्रथमसङ्घाटकेन भिक्षामटता क्वापि संस्तारको दृष्टो याचितो लब्धश्च तस्मिन् **अवभाषिते लब्धे** च साधवो **भणन्ति 'न शक्नुमः** सम्प्रति भिक्षामटन्तः संस्तारकं **नेतुं** ततस्तिष्ठतु पश्चान्नेष्यामः', एतच्च गुरुसमीपे समागत्य तेन सङ्घाटकेनाऽऽलोचितं तच्च श्रुत्वा अन्यो याचते लभते च, स आनीतस्सन् पूर्वसङ्घाटकस्याऽऽभवति न येनानीतस्तस्य। अपरः सङ्घाटकोऽग्रेतन-सङ्घाटकवृत्तान्तमविदित्वा यथाभावेन गत्वा याचते लभते च तेनाप्यनीतः पूर्वसङ्घाटक-स्याऽऽभवति न तस्य, अपरे द्वयोरपि तं साधारणमाचक्षते ॥ ३४२० ॥

विपरिणामद्वारं साक्षादाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नवरि अन्नो आगतो, तेण वि सो चेव पणतितो तत्थ ।**
**दिन्नो अन्नस्स ततो, विप्परिणामेइ तह चेव ॥ ३४२१ ॥**

प्रथमसङ्घाटकेन संस्तारके याचिते लब्धे नेतुमशक्यतया तत्रैव मुक्ते **नवरि** केवल**मन्यः** सङ्घाटक **आगतस्तेनापि तत्र स एव** संस्तारकः **प्रणयितो** याचितः संस्तारकस्वामिनोक्तं **दत्तोऽन्यस्य। ततस्तथैव** तं **विपरिणामयति** यथा— 'सर्वदैवाहं तव प्रियस्ततो मयि सति किमन्यस्मै तव दातुमुचितं ? तस्माद्यदि स आगच्छति तर्हि तस्य प्रतिषिध्य पश्चान्मह्यं दातव्य इति' एवं यदि विपरिणम्याऽऽनीतो भवति ततः स पूर्वस्याऽऽभवति नेतरस्य । तदेवमुक्तं विपरिणामद्वारमधुना धर्मकथाद्वारं-तथैव प्रथमसङ्घाटकेन संस्तारके याचिते लब्धे नेतुमशक्यतया तत्रैव मुक्ते अन्यः सङ्घाटकस्तत्र समागत्य तं संस्तारकं याचितवान्। ततः संस्तारकस्वामिनोक्तं-दत्तोऽन्यस्मै, ततो धर्मकथाकथनतस्तमावर्ज्य ब्रूते यथा तस्य प्रतिषिध्याऽयं संस्तारको मह्यं देयः, एवमानीतः पूर्वसङ्घाटकस्य स आभवति नेतरस्य। तथा येन प्रथमसङ्घाटकेन संस्तारको याचितो लब्धश्च, तस्य तद्विषये भावः कुतश्चित् कारणात् व्यवच्छिन्नः, अन्येन वाऽशठभावेन याचितो लब्धश्च तस्याऽऽभवति न प्रथमसङ्घाटकस्य तस्य तद्विषयभावव्यवच्छेदात्। तथा



For Private and Personal Use Only

प्रथमसङ्घाटकेन संस्तारके याचिते लब्धे नेतुमशक्यतया तत्रैव मुक्ते अन्यस्सङ्घाटकस्तत्र समागत्य संस्तारकं याचते तत्र यदि अन्यो मनुष्योऽन्यं संस्तारकं दद्यात् स वा प्रथमसङ्घाटकयाचितोऽन्यं तदा स तस्य कल्पते, यः पुनः प्रणयितः स तेनान्येन वा दीयमानो न कल्पते ॥ ३४२१॥

तथा च विपरिणामद्वारमुक्त्वा शेषद्वाराणामतिदेशमाह—

**अहभावाऽऽलोयण-धम्मकहण-वोच्छिन्नमन्नदाराणि ।**
**नेयाणि तहा चेव उ, जहेव ओभट्ठदारम्मि ॥ ३४२२ ॥**

**यथाभावद्वारम् आलोयण**त्ति पदैकदेशे पदसमुदायोपचाराद् आलोचनां श्रुत्वेति द्वारं **धर्मकथन**द्वारं **व्यवच्छिन्न**भावद्वार**मन्य**द्वारं चेति पञ्च **द्वाराणि** यथैव चाऽवभाषितद्वारेऽभिहितानि तथैव ज्ञेयानि षष्ठं तु विपरिणामद्वारं साक्षादुक्तम् ॥३४२२॥

गतं लब्धद्वारमिदानीं संज्ञातिकद्वारमाह—

**सन्नातिए वि एच्चिय, दारा नवरं इमं तु नाणत्तं ।**
**आयरिएणाभिहितो, गेण्हह संथारयं अज्जो! ॥ ३४२३॥**

**सुद्धदसमीठियाणं, बेती घेच्छामि तद्दिणं चेव ।**
**नायगिहे पडिणत्तो, मए उ संथारतो भंते !॥ ३४२४॥**

यान्येव श्रुत्वादीनि षड् द्वाराणि लब्धद्वारेऽभिहितानि **एतान्येव संज्ञातिकद्वारेऽपि** द्रष्टव्यानि **नवरं** भावनायां **यन्नानात्वं तदिदं** वक्ष्यमाणं, तदेवाह— **आयरिएणे**त्यादि, **आचार्येणाभिहितः आर्य! संस्तारकं गृहाण,** एवमुक्तस्सन् स संज्ञातिकानां गृहमगमत् दृष्टः संस्तारको याचितो लब्धश्च। अथवा संज्ञातिकैरयाचितैरेव स उक्तो- गृहाण संस्तारकं, ततस्तेनोक्तं 'यस्मिन् दिवसे संस्तारके स्वप्तुमारप्स्यते तस्मिन् दिवसे नेष्यामः' आचार्यश्च शुद्धदशम्यां तत्र स्थितः, स आगत्य **शुद्धदशमीस्थितानां** गुरुणामन्ते आलोचयति '**भदन्त**! **मया ज्ञातगृहे संस्तारकः प्रतिज्ञप्तो** निभालितस्तिष्ठति ततो यत्र दिने संस्तारके स्वप्स्यते तद्दिवसमेव **तस्मिन्नेव दिने ग्रहीष्यामः**' एवमालोचितं श्रुत्वा अन्यो याचते लभते च, स आनीतः पूर्वसङ्घाटकस्या- ऽऽभवति न येनानीतस्तस्य। गतं श्रुत्वा द्वारम्। अपरः सङ्घाटकोऽग्रेतनसङ्घाटकवृत्तान्तमनवज्ञाय यथाभावेन गत्वा याचते लभते च, तेनाप्यानीतः पूर्वसङ्घाटस्याऽऽभवति न तस्य **अपरे** तु द्वयोरपि संङ्घाटकयोस्तं साधारणमाचक्षते ॥ ३४२३॥ ३४२४॥

यथाभावद्वारमपि गतम्। इदानीं साक्षात् विपरिणामद्वारमाह—

**विपरिणामे तह च्चिय, अन्नो गंतूण तत्थ नायगिहं ।**
**आसन्नयरो गेण्हइ, मित्तो अन्नो वि मं मोत्तुं ॥ ३४२५ ॥**

**अन्ने वि तस्स नियगा, देहिह अन्नं च तस्स मम दाउं ।**
**दुल्लभलाभमणाउंछियम्मि दाणं हवति सुद्धं ॥ ३४२६ ॥**

**सन्नायगिहे अन्नो, न गेण्हए तेण असमणुण्णातो ।**
**सति विभवे सत्तीए, व सोवि हु न वि तेण निव्विसति ॥ ३४२७ ॥**

तेन साधुना— 'मया भदन्त! ज्ञातगृहे संस्तारकं प्रतिज्ञप्तोऽस्ति ततस्तस्मिन्नेव दिने समानेष्यते' इत्यालोचितं श्रुत्वा **अन्य आसन्नतरो** मित्ररूपो वा **ज्ञातगृहं गत्वा तत्र तथैव** संस्तारकस्वामिनं **विपरिणामयति** स वाऽन्यो विपरिणम्य **गृह्णाति इदं** वक्ष्यमाणमुक्त्वा। तदेवाह—**अन्ने** **वीत्यादि, अन्येऽपि** च **तस्य निजकाः** संस्तारकं **दास्यन्ति,** यदि वा ममामुं संस्तारकं दत्त्वा तस्य अन्यं संस्तारकं दद्याः। अथवा अस्मादृशे **अज्ञातोञ्छके** अज्ञातोञ्छवृत्ति-जीविनि यत् **दुर्लभलाभं दानं** दीयते **तद्भवति शुद्धमिह**परलोकाशंसावि-प्रमुक्तत्वात्। तथा

**ज्ञातगृहेऽन्यो**ऽसंज्ञातिक**स्तेन** संस्तारकस्वामिना **असमनुज्ञातो न गृह्णाति,** अहं पुनः संज्ञातिकस्ततोवश(श्यं)याम्येकवारमननुज्ञातस्यापि[1] संस्तारकस्य ग्रहणे, तथा **सति विभवे** यदि वा विभवाभावेऽपि **स्वशक्त्या** सोऽपि संज्ञातिकस्तेनात्मीयेन संज्ञातिकेन विना **न निर्विशति** उपभुङ्क्ते भक्तपानसंस्तारकादि तस्मात् मम दातव्य एष संस्तारक' इति एवं विपरिणम्याऽऽनीतः पूर्वसङ्घाटकस्याऽऽभवति, न येनानीतस्तस्य। गतं विपरिणामद्वारमधुना धर्मकथाद्वारमुच्यते, तथैवालोचनामाकर्ण्य अन्यस्सङ्घाटकस्तत्रागत्य धर्मकथामारभते, ततो धर्मकथया तमत्यन्तमावर्ज्य तं संस्तारकं याचते। स च धर्मकथाश्रवणोपरोधतो न निषेद्धुं शक्त इति तस्मै दत्तवान् । सोऽपि पूर्वसङ्घाटकस्याऽऽभवति, न येनाऽऽनीतस्तस्य॥ ३४२५॥ ३४२६॥ ३४२७॥

गतं धर्मकथाद्वारं, सम्प्रति व्यवच्छिन्नद्वारभावना, तस्य संज्ञातिकस्य याचितसंस्तारकविषये भावः कुतश्चित् कारणात् व्यवच्छिन्नोऽन्येन च सङ्घाटकेन अशठभावेन याचित्वा समानीतः स येनाऽऽनीतः तस्याऽऽभवति न पूर्वसंज्ञातिकस्य। अन्यद्वारभावना त्वियं- पूर्वप्रकारेण तेन संज्ञातिकेन गुरुणामन्तिके विकटने कृते तत् श्रुत्वा अन्यः सङ्घाटकस्तत्र गत्वा संस्तारकं



---

१.॰मनुज्ञा॰ पु. प्रे.॥

याचते, तत्राऽन्यो मनुष्योऽन्यं संस्तारकं यदि ददाति, यदि वा स एव पूर्वसङ्घाटकयाचित-संस्तारकस्वामी परमन्यं संस्तारकं तदा कल्पते, पूर्वयाचितस्तु अनेन अन्येन वा दीयमानो न कल्पते तथा चाह—

**सेसाणि य दाराणी, तह वि य बुद्धीए भासणियाइं ।**
**उद्धद्दारे वि तहा, णवरं उद्धम्मि णाणत्तं ॥ ३४२८ ॥**

**शेषाण्यपि** विपरिणामवर्जानि श्रुत्वादीनि **द्वाराणि तथैव** प्रागुक्तप्रकारेणैव बुद्ध्या परिभाव्य **भाषणीयानि,** तानि च तथैव भाषितानि। गतं संज्ञातिकद्वारमिदानीमूर्ध्वद्वारमाह—**ऊर्ध्वद्वारेऽपि तथा** पूर्वोक्तप्रकारेण द्वाराणि षडपि श्रुत्वादीनि योजनीयानि नवरमूर्ध्वे ऊर्ध्वकरणे **नानात्वम्** ॥ ३४२८ ॥ तदेव भावयति

**आणेऊण न तिन्ने, वासस्स य आगमं तु नाऊणं।**
**मा उल्लेज्ज हु छन्ने, ठवेइ मा वन्नो मग्गेज्जा ॥ ३४२९ ॥**

सङ्घाटकेन क्वापि गृहे संस्तारको दृष्टो याचितो लब्धश्च **आनेतु**मपि च व्यवसितः परं

**वर्षस्य आगमन**मागमनं **ज्ञात्वा** अपान्तराले वर्षं पतेदिति कृत्वा **ना**ऽऽनेतुं **तीर्णः** शक्तः, तथा **मा** वर्षेणात्र प्रस्तारित **आर्द्रीक्रियेत, मा** वा **अन्यः** सङ्घाटकः समागत्य **मार्गयेत्** याचेत इति **छन्ने** प्रदेशे कुड्येऽवष्टभ्य ऊर्ध्वीकृतः, ततो गुरुसमीपे समागत्य विकटयति तच्च श्रुत्वा अन्य उपेत्याऽऽगत्य याचते लभते च, स तेनाऽऽनीतः पूर्वसङ्घाटस्याऽऽभवति, न येनाऽऽनीतस्तस्य ॥ ३४२९ ॥

गतं श्रुत्वा द्वारमिदानीं 'यथाभाव'द्वारं विवक्षुराह—

**पुच्छाए नाणत्तं, केणुद्धकयं तु पुच्छियमसिट्ठे।**
**अन्नासढमाणीयं, पि पुरिल्ले केइ साहारं॥ ३४३०॥**

यथाभावद्वारे **पृच्छायां नानात्वं,** किं तद्? इति चेद्, उच्यते- अन्यः सङ्घाटकस्तत्र यथाभावेन गतस्तेन ऊर्ध्वकृतं संस्तारकं दृष्ट्वा चिन्तितं किमेष संयतेन ऊर्ध्वीकृत उत गृहस्थेन यथाभावतः? एवं तेन संशयानेन पृष्टः **केनायमूर्ध्वीकृत** इति। गृहस्थैश्च **न** किमपि **शिष्टं** कथितं ततोऽन्येन सङ्घाटकेनाऽशठेन अशठभावेन संस्तारको याचितो लब्ध आनीतश्च। तम**न्येनाऽशठेनाऽऽनीतमपि** संस्तारकं **पूर्वस्य** सङ्घाटकस्याभवन्तमाचक्षते, **केचित्** पुनर्द्वयोरपि

सङ्घाटकयोः **साधारणम्।** अथ पृष्टे गृहस्थैराख्यातं गृहस्थेनोर्ध्वीकृतस्तथा यथाभावेन याचितो लब्धश्चासौ सोऽप्यानीतः पूर्वसङ्घाटकस्याऽऽभवति। **अपरे** तु द्वयोरपि साधारणमाहुः ॥३४३०॥

**छन्ने उद्धोवकतो, संथारो जइवि सो अहभावा ।**
**तत्थ वि सामायारी, पुच्छिज्जइ इतरहा लहुतो ॥ ३४३१ ॥**

**यद्यपि** च **संस्तारको यथाभावात्** यथाभावेन गृहस्थैः **छन्ने** प्रदेशे **ऊर्ध्वोपकृतो** ज्ञायते चैतत् तथापि **तत्रेयं सामाचारी**- गृहस्थोऽवश्यमुक्तप्रकारेण **पृच्छ्यते, इतरथा** पृच्छाकरणाऽभावे प्रायश्चित्तं **लघुको** मासः॥ ३४३१ ॥

गतं यथाभावद्वारं, विपरिणामन-धर्मकथा-व्यवच्छिन्नभावानि द्वाराणि पूर्ववत् भावनीयानि। तदेवाह—

**सेसाइं तह चेव य, विप्परिणामाइयाइं दाराइं ।**
**बुद्धीए विभासेज्जा, एत्तो वोच्छं पभुद्दारं ॥ ३४३२ ॥**

**शेषाणि विपरिणामादीनि द्वाराणि बुद्ध्या** यथा प्रागभिहितानि **तथैव** परिभाव्य **विभाषेत** प्रतिपादयेत् गतमूर्ध्वीकृतद्वारमत ऊर्ध्वं **प्रभुद्वारं वक्ष्यामि** ॥ ३४३२॥

प्रतिज्ञातमेव निर्वाहयति—

**प्रभुद्दारे वी एवं, नवरं पुण तत्थ होइ अहभावे ।**
**एगेण पुत्तो जाइतो, बिइएण पिया उ तस्सेव ॥ ३४३३॥**

**प्रभुद्वारेऽपि एवं** पूर्वप्रकारेण श्रुत्वादीनि षड् द्वाराणि ज्ञेयानि, **नवरं पुनस्तत्र** प्रभुद्वारे **यथाभावे** यथाभावलक्षणे अवान्तरभेदे **नानात्वं भवति,** तदेवोपदर्शयति- **एकेन** सङ्घाटकेन यथाभावेन **पुत्रो याचितः,** एकेन **तस्यैव पिता** द्वाभ्यामपि दत्तः, स कस्याऽऽभवति ?॥ ३४३३॥

तत आह—

**जो पभुतरओ तेसिं अहवा दोहिं पि जस्स दिण्णं तु ।**
**अपभुंमि लहु आणा एगतरपदोसतो जं च ॥ ३४३४॥**

**तयोः** पितापुत्रयोः मध्ये **यः प्रभुतरस्तेन** यस्य दत्तस्तस्याभवति **अथवा** द्वावपि प्रभू ताभ्यां **द्वाभ्यामपि** सम्भूय **यस्य दत्त**स्तस्याऽऽभवति, यस्य तु प्रतिषिद्धस्तस्य नाऽऽभवति। अथ **अप्रभुणा** दत्तं गृह्णाति, गाथायां सप्तमी तृतीयार्थे, तदा तस्य प्रायश्चित्तं चत्वारो **लघव**स्तथा **आज्ञा**दयो दोषाः। **यच्च एकतरप्रद्वेषत** आपद्यते प्रायश्चित्तं तदपि तस्य द्रष्टव्यम्। एकतरप्रद्वेषतो नाम-यः प्रभुः स संयतस्य वोपरि प्रद्वेषं यायात्; येन वा अप्रभुणा सता दत्तस्तस्य ॥ ३४३४ ॥

**अहवा दुन्नि वि पहुणो, ताहे साहारणं तु दोण्हं पि ।**
**विपरिणामादीणि उ, सेसाणि तहेव भावेज्जा ॥ ३४३५ ॥**

**अथवा द्वावपि** पितापुत्रौ **प्रभू** द्वाभ्यामपि च पृथक् पृथक् द्वयोः सङ्घाटकयोरनुज्ञातस्**तदा** तयो**र्द्वयोरपि** सङ्घाटकयोः **साधारण**माचक्षते संस्तारकम्। तदेवं यथाभावे विशेषो दर्शितः, **शेषाणि तु विपरिणामादीनि** पञ्चापि द्वाराणि **तथैव भावनीयानि** यथा प्रागभिहितानि ॥३४३५ ॥

साम्प्रतमुपसंहारमाह—

**एस विही उ भणितो, जहियं संघाडएहि मग्गंति ।**
**संघाडेहऽलभंता, ताहे वंदेण मग्गंति ॥ ३४३६॥**

**यत्र सङ्घाटकैः** प्रत्येकं संस्तारका **मृग्यन्ते** तत्र **एष** प्रत्येकं प्रत्येकमानीतानां संस्तारकानाम् आभवनानाभवनव्यवहारविषयो **विधिरुक्तः**, यत्र पुनरेकैकः सङ्घाटको न लभते **तदा** **'वृन्दसाध्यानि कार्याणि वृन्देन कर्त्तव्यानि'** इति न्यायात् **सङ्घाटकैरलभमाना वृन्देन** समुदायेन **मार्गयति**॥ ३४३६॥

तत्र विधिमतिदेशत आह—

**वंदेणं तह चेव य, गहणण्णुवणाइतो विही एसो ।**
**नवरं पुण नाणत्तं, अप्पिणणे[१] होइ नायव्वं ॥ ३४३७॥**

**वृन्देनापि** मार्गणे **तथैव** तेनैव प्रकारेण **ग्रहणे अनुज्ञापनायामादि**शब्दादर्पणे च विधिरेष प्रागभिहितो द्रष्टव्यः, **नवरं पुनरर्पणे भवति नानात्वं ज्ञातव्यं** ॥ ३४३७॥

---

१. अप्पिणणे-ला.। अप्पणणे-मु. ॥ अप्पणिणे-पुप्रे. ॥

तदेवाह—

**सव्वे वि दिट्ठरूवे, करेहि पुन्नम्मि अम्ह एगयरो ।**
**अन्नो वा वाघाए, अप्पहिति जं भणसि तस्स ॥ ३४३८॥**

संस्तारकस्वामिनं प्रत्युच्यते-**सर्वानप्यस्मान् दृष्टरूपान्** दृष्टमूर्त्तीन् **कुरु,** अस्माक**मेकतरः पूर्णे** वर्षाकाले संस्तारकं युष्माकमर्पयिष्यति । अथास्माकमेतेषां कश्चनापि **व्याघातो** भवेत् तदा **अन्यो**ऽपि **यत्त्वं भणसि तस्य समर्पयिष्यति** ॥ ३४३८॥

**एवं ता सग्गामे, असती आणेज्ज अन्नगामातो ।**
**सुत्तत्थे काऊणं, मग्गइ भिक्खं तु अडमाणो ॥ ३४३९ ॥**

एवमुक्तप्रकारेण **तावत् स्वग्रामे** संस्तारकाऽऽनयने विधिरुक्तः। **असति** स्वग्रामे संस्तारकस्याऽभावे **अन्यग्रामादपि आनयेत्** । कथम्? इत्याह—**सूत्रार्थौ कृत्वा** सूत्रपौरुषीमर्थपौरुषीं च कृत्वा **भिक्षामटन्** संस्तारकं **मार्गयति,** यदि पुनरन्यग्रामेऽपि प्रत्येकसंघाटकस्याऽलाभस्तदा अर्थपौरुषीं हापयित्वा तत्र वृन्देन गत्वा याचन्ते ॥ ३४३९॥

**अद्दिट्ठे सामिम्मि उ, वसिउं आणेति बिइयदिवसम्मि ।**
**खित्तम्मि उ असंते, आणयणं खेत्तबहियातो ॥ ३४४० ॥**

यदि स्वग्रामे न दृश्यते संस्तारकः, दृश्यमानो वा न लभ्यते तदा स्वक्षेत्रे द्विगव्यूतप्रमाणे अन्यग्रामे गत्वा याचनीयः। अथ **न दृश्यते** तत्र संस्तारक**स्वामी** तदा गृहे **उषित्वा द्वितीयदिवसे** संस्तारकमनुज्ञाप्य गृहीत्वा **समागच्छन्ति**। अथ **स्वक्षेत्रे** न लभ्यते तदा स्वक्षेत्रे संस्तारकस्याऽभावे स्व**क्षेत्राद्बहिष्टादप्यानयनं** संस्तारकस्य द्वित्रिदिनमध्ये कर्त्तव्यम् ॥ ३४४० ॥

**सव्वेहिं आगएहिं, दाउं गुरुणो उ सेस जहवुड्ढं ।**
**संथारे घेत्तूणं, ओवासे होतऽणुण्णवणा ॥ ३४४१ ॥**

**सर्वै**रपि सङ्घाटकैः परपरतरग्रामेभ्यः **समागतैः** संस्तारकपरिपूर्णतायां सत्यां त्रय उत्कृष्टाः संस्तारका **गुरोर्दातव्याः**। ततः **शेषैर्यथावृद्धं** यथारत्नाधिकतया गृहीतव्याः, तान् **संस्तारकान् गृहीत्वा** तदनन्तर**मवकाशे भवत्यनुज्ञापना**। एतावता ग्रहणमिति द्वारं समाप्तमनुज्ञापनाद्वारं समापतितमित्यावेदितम् ॥ ३४४१ ॥

**जो पुव्वमणुण्णवितो, पेसिज्जंतेण होति ओगासो ।**
**हेट्ठिल्ले सुत्तम्मी, तस्सावसरो इहं पत्तो ॥ ३४४२॥**

**यः पूर्वमधस्तने** प्रथमे पिण्डसूत्रे **प्रेष्यमाणेनावकाशोऽनुज्ञापितस्तस्यावसर इह प्राप्तः** ॥३४४२॥

ततः स भण्यते—

**नाऊण सुद्धभावं, थेरा वियरंति तं तु ओगासं ।**
**सेसाण वि जो जस्स उ, पाउग्गो तस्स तं देंति ॥ ३४४३॥**

तत्र प्रेष्यमाणस्यावकाशमनुज्ञापयतः **स्थविरा** आचार्याः **शुद्धं भावं ज्ञात्वा तमेवावकाशं वितरन्ति** अनुजानते **शेषाणामपि योऽ**वकाशो **यस्य** साधोः **प्रायोग्यस्तस्य तं ददति** ॥ ३४४३ ॥

अत्र विधिमाह—

**खेल-निवात-पवाते, काल-गिलाणे य सेहपडियरए ।**
**समविसमे पडिपुच्छा, आसंखडिए अणुण्णवणा ॥ ३४४४ ॥**

यस्य **खेलः** श्लेष्मा प्रस्पन्दते स गुरुन् अनुज्ञापयति- भगवन्! मम भूयान् श्लेष्मा पतति ततोऽन्यदवकाशान्तरमनुजानीत। ततः तस्यान्योऽवकाशो दातव्यः। तथा **निवाते** घर्मेण पीड्यमानो यदि प्रवातमनुज्ञापयति तर्हि तस्य प्रवातो दातव्यः। **प्रवाते** वातेन पीड्यमानस्य निवातः। **काल**ग्राही द्वारमूलमनुज्ञापयति, स तत्र स्थाप्यते। **ग्लानस्य** समीपे **प्रतिचारकः**, शिक्षाद्वयं ग्राहयिता **शैक्षकस्य** समीपे। **समविषमायां** भूमौ यस्य पार्श्वाणि दुखयतः सोऽध्यास्यायां भूमौ स्थाप्यते। यो यं पुनः पुनः **प्रतिपृच्छति** स तस्य पार्श्वे। **आसंखडिकः** स स्वतरकस्य पार्श्वे। एव**मनुज्ञापना** साधूनां भवति। आचार्येण च शुद्धभावमवगम्य तथैवानुज्ञायते ॥ ३४४४॥

उपसंहारमाह—

**एवमणुण्णवणाए, एयं दारं इहं परिसमत्तं ।**
**एगंगियादिदारा, एत्तो उड्ढं पवक्खामि ॥ ३४४५॥**



**एवमुक्तप्रकारेण** साधूना**मनुज्ञापनायां** भणिताया**मेतत्** अनुज्ञापनालक्षणं **द्वारमिह परिसमाप्तम्,** अत ऊर्ध्वं तु **एकाङ्गिकादीनि द्वाराणि** प्रवक्ष्यामि ॥ ३४४५॥

प्रतिज्ञातमेव निर्वाहयति—

**असंघातिमेव फलगं, घेतव्वं तस्स असइ संघायं ।**
**दोमाइ तस्स असती, गेण्हेज्ज अहाकडा कंबी ॥ ३४४६ ॥**

पूर्व**मसङ्घातिममेव फलकं ग्रहीतव्यम्** । **तस्याऽसति** अभावे **सङ्घातिमं,** किंविशिष्टम्? इत्याह-**द्व्यादि** द्व्यादिफलकात्मकं द्विफलकात्मकमादिशब्दात् त्रिफलकात्मकं, चतुःफलकात्मकं वा गृह्णीयादिति योगः। **तस्य** फलकसङ्घातात्मकस्य संस्तारकस्याऽ**भावे यथाकृताः कम्बीर्गृह्णीत,** गृहीत्वा तन्मयः संस्तारको विधीयते । तत्र या नमन्ति कम्ब्यस्ताः सान्तराः क्रियन्ते, निरन्तराभिः प्राणजाते विराधना, एतच्च फलकेष्वपि द्रष्टव्यम् ॥ ३४४६ ॥

तथा चाह—

**दोमादि संतराणि उ, करेइ मा तत्थ ऊ नमंतेहि ।**
**संघरिसेणण्णोण्णे, पाणादिविराहणा होज्जा ॥ ३४४७ ॥**

**द्व्यादीनि** फलकानि नमनशिलानि **सान्तराणि करोति** किमर्थम्? इत्याह-तत्र द्व्यादिफलकात्मके संस्तारके **नमद्भिः** फलकैर**न्योन्यं संघर्षणे प्राणादीनां विराधना भवेत्।**

प्राणा द्वित्रिचतुरिन्द्रियाः, आदिशब्दात् जीवादिपरिग्रहः ॥ ३४४७ ॥ गतमेकाङ्गिकद्वारमिदानी-मकुचद्वारं, 'कुच स्पन्दने' न कुचतीत्यकुचः, इगुपान्त्यलक्षणः कप्रत्ययः। यस्तथाबद्धस्सन् न स्पन्दते सोऽकुचो ग्राह्यः, यस्तु कुचबन्धनः स परिहार्यः।

तथा चाह—

**कुयबंधणम्मि लहुगा, विराहणा होइ संजमायाए ।**
**सिढिलिज्जंतम्मि जहा, विराहणा होइ पाणाणं ॥ ३४४८ ॥**

**पवडेज्ज व दुब्बद्धे, विराहणा तत्थ होइ आयाए ।**
**जम्हा एए दोसा, तम्हा हु कुयं न बंधेज्जा ॥ ३४४९ ॥**

कुचं शिथिलं बन्धनं यस्य तस्मिन् **कुचबन्धने** संस्तारके गृह्यमाणे प्रायश्चित्तं चत्वारो **लघुकाः**। तथा **विराधना भवति संयमे आत्मनि** च, यतस्तस्मिन् **शिथिल्यमाने** शिथिलबन्धनतया प्रस्पन्दमाने **प्राणानां विराधना भवति** एषा संयमविराधना। **दुर्बद्धे** स

तस्मात् **प्रपतेत् तत्र भवत्यात्मविराधना, यस्मादेते दोषास्तस्मात्** यथा **कुचं** शिथिलं भवेत् तथा **न बध्नीयात्** किन्तु गाढबन्धनबद्धं कुर्यात् ॥ ३४४८ ॥ ३४४९ ॥

**तद्दिवसं पडिलेहा, ईसिं उक्खित्तु हेट्ठ उवरिं च ।**
**रयहरणेणं भंडं, अंके भूमीए वा काउं ॥ ३४५० ॥**

**तद्दिवसं** प्रतिदिवसं दिने दिने इत्यर्थः। **भाण्डं** संस्तारकादिलक्षणम् **ईषदुत्क्षिप्य अङ्के** उत्सङ्गे **भूमौ वा कृत्वा अध उपरि च रजोहरणेन** तस्य **प्रत्युपेक्षा** कर्त्तव्या ॥ ३४५० ॥

**एवं तु दोन्नि वारा, पडिलेहा तस्स होइ कायव्वा ।**
**सव्वे बंधे मोत्तुं, पडिलेहा होइ पक्खस्स ॥ ३४५१ ॥**

एवमुक्तेन प्रकारेण **द्वौ वारौ** प्रातरपराह्णे च **तस्य** संस्तारकस्य **प्रत्युपेक्षा भवति कर्त्तव्या, पक्षस्य** पक्षस्यान्ते पुनः **सर्वान् बन्धान् मुक्त्वा छोटयित्वा प्रत्युपेक्षा भवति** कर्त्तव्या ॥ ३४५१ ॥

गतमकुचद्वारमधुना प्रायोग्यद्वारमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**उग्गंममादीसुद्धो, गहणादी जो उ वन्नितो एस ।**
**एसो खलु पाउग्गो, हेट्ठिमसुत्ते व जो भणितो ॥ ३४५२॥**

य **उद्गमादिदोषशुद्ध** उद्‌गमोत्पादनादिदोषविशुद्धो **यो** वा **एषोऽनन्तरमुपवर्णितो ग्रहणादौ** ग्रहणेऽनुज्ञापनायां च शुद्ध एकाङ्गिकोऽकुचश्च, यदि वा **यो भणितोऽधस्तनसूत्रे** ऋतुबद्धे प्रत्येकसूत्रे द्वात्रिंशद्‌भङ्गेषु मध्ये प्रथमभङ्गवर्त्ती **एस खलु प्रायोग्यो** वेदितव्यः ॥ ३४५२॥

**कज्जम्मि समत्तम्मी, अप्पेयव्वो अणप्पिणे लहुगा ।**
**आणादीया दोसा, बिइयं उट्ठाणहियदड्ढो ॥ ३४५३ ॥**

**कार्ये समाप्ते** स नियमात् संस्तारको**ऽर्पयितव्योऽनर्पणे** प्रायश्चित्तं चत्वारो **लघुकाः आज्ञादयश्च दोषाः**, अत्रापि **द्वितीय**पदमपवादपदं-यदि रोगस्यो**त्थानं** प्रवर्त्तते, स्तैनैर्वापहृतोऽग्निना वा कथमपि **दग्धस्त**दा नार्पणमिति ॥ ३४५३॥

तदेवं भावितं वर्षावाससूत्रं, सम्प्रति वृद्धावाससूत्रभावनार्थमाह—



For Private and Personal Use Only

**वुड्डावासे चेवं, गहणादिपदा उ होंति नायव्वा ।**
**णाणत्त खेत्तकाले, अप्पडिहारी य सो नियमा ॥ ३४५४ ॥**

**वृद्धावासेऽप्येवं** पूर्वोक्तेन प्रकारेण **ग्रहणादीनि पदानि भवन्ति ज्ञातव्यानि**। किमुक्तं भवति? यथा प्राक् वर्षावासे ग्रहणाऽनुज्ञापनैकाङ्गिकाऽकुच-प्रायोग्यलक्षणानि पञ्च द्वाराण्य-भिहितानि तथा वृद्धावासेऽप्यनुगन्तव्यानि **तुशब्दो** विशेषणे, स चैतत् विशिनष्टि वृद्धावासे ऋतुबद्धेऽप्येष एव विधिरिति, नवरमत्र **नानात्वं क्षेत्रे काले** च तथा **नियमादप्रतिहारी स** वृद्धावासयोग्यः संस्तारको संग्रहीतव्यः ॥ ३४५४॥

सम्प्रत्येतदेव स्पष्टं विभावयिषुराह—

**काले जा पंचाहं, परेण वा खेत्त जाव बत्तीसा ।**
**अप्पडिहारी असती, मंगलमादीसु पुव्वुत्ता ॥ ३४५५॥**

इह वर्षावासे संस्तारकस्याऽऽनयने कालत उत्कर्षेण त्रीणि दिनान्युक्तानि, अत्र वृद्धावासे **काले** कालमधिकृत्य **यावत् पञ्चाहं** पञ्च दिनानि, ततः **परेण वा** आनयनं द्रष्टव्यम्।

**क्षेत्रतो यावत् द्वात्रिंशत्** योजनानि, तथा **अप्रतिहारिणोऽसति** अभावे संस्तारकस्य यानि **मङ्गलादीनि पूर्वमुक्तानि तानि** प्रयोक्तव्यानि ॥ ३४५५॥

**सूत्रम् — थेराणं थेरभूमिपत्ताणं कप्पति दंडए वा, भंडए वा, छत्तए वा, मत्तए वा, लट्ठिया वा, भिसे वा, चेले वा, चेलचिलमिलिं वा, चम्मे वा, चम्मकोसे वा, चम्मपलिच्छेयणए वा, अविरहिए ओवासे ठवेत्ता गाहावइकुलं पिंडवायपडियाए पविसित्तए वा निक्खमित्तए वा ।**

**कप्पइ णं सन्नियट्टचारीणं दोच्चं पि उग्गहं अणुन्नवेत्ता परिहरित्तए** ॥ ५॥

'थेराणं थेरभूमिं पत्ताण'मित्यादि, अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह

**वुड्ढो खलु समधिकतो, अजंगमो सो य जंगमविसेसो ।**
**अविरहितो वा वुत्तो, सहायरहिए इमा जयणा ॥३४५६॥**

अनन्तरसूत्रे **वृद्धः खलु समधिकृतो**ऽनेनापि सूत्रेण वृद्ध एवोच्यते, स्थविरवृद्धशब्द-योरेकार्थत्वात् ततः पूर्वसूत्रादनन्तरमस्य सूत्रस्योपन्यासः। नवरं **स** पूर्वसूत्रे वृद्धः **अजंगमो**

जङ्घाबलपरिहीन उक्तोऽत्र तु **जङ्गमविशेषः** न सर्वथा जङ्घाबलपरिहीनो वक्तव्यः, अथवाऽयं विशेषः-पूर्वसूत्रे योऽधिकृतो वृद्ध उक्तः स सहायै**रविरहित उक्तो**ऽत्र तु यः सहायविरहितस्तस्य सामाचारी प्रतिपाद्या तथा चाह- **सहायरहिते इय**मधिकृतसूत्रप्रतिपाद्या **यतना** ॥ ३४५६ ॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**स्थविराणां** जरसा जीर्णानां **स्थविरभूमिं प्राप्तानां** सूत्रार्थतदुभयोपेतानामित्यर्थः, **कल्पते दण्डकं** दण्डविदण्डादिभेदभिन्नं, **भण्डकम्** अनेकविधानि उपकरणानि, **छत्रकं** प्रतीतं, **मात्रक**मुच्चारादिसत्कं, **लष्टिका** दण्डविशेषः। **चेलं** कल्पादि, **चर्म** तलिकादिरूपं, [**चर्मकोशः**]चर्मपरिच्छेदनकं वध्रा एतान् **अविरहिते अवकाशे स्थापयित्वा गृहपतिकुलं पिण्डपातप्रतिपाताय प्रवेष्टुं वा निष्क्रमितुं वा। कल्पते सन्निवृत्तचाराणां** भिक्षाचर्यातः प्रत्यागतानां स्थविराणां **द्वितीयमपि वारमवग्रहमनुज्ञाप्य परिहर्त्तुं** धारणया परिभोगेन वा, इत्येष सूत्राक्षरार्थः॥ विशेषव्याख्या तु **भाष्य**कृता क्रियते, तत्र यानि पदानि व्याख्येयानि तानि दर्शयति—

**दंडविदंडे लट्ठी, विलट्ठिचम्मे य चम्मकोसे य ।**
**चम्मस्स य जे छेया, थेरा वि य जे जराजुण्णा ॥ ३४५७॥**

**दण्डो विदण्डः यष्टिर्वियष्टिः चर्म चर्मकोशः चर्मणश्च ये छेदास्ते** चर्मपरिच्छेदनकास्ते च व्याख्येयाः। तत्र प्रथमतः **स्थविरपदमाचक्षते स्थविरा अपि च ये जराजीर्णा**स्ते द्रष्टव्याः ॥३४५७॥

**आयवताणनिमित्तं, छत्तं दंडस्स कारणं वुत्तं ।**
**कीस ठवेई पुच्छा, स दिग्घथूरो य दुग्गट्ठा ॥ ३४५८॥**

**आतप** उष्णेन परितापना तस्य **त्राणार्थं छत्रकं** गृह्णाति, **दण्डस्य** उपलक्षणमेतत्, दण्डादीनां ग्रहणे **कारणं** पूर्वं **निशीथे कल्पे** च भणितम्, अथ स **कस्मात्** दण्डं **स्थापयति** एषा **पृच्छा**। अत्रोत्तरं— **स** दण्डको **दीर्घः स्थिरश्च** ततस्तं **दुर्गे** व्याघ्रादिवारणनिमित्तं परिवहति ॥ ३४५८॥

सम्प्रति भाण्डादिपदव्याख्यानार्थमाह—

**भंडं पडिग्गहो खलु, उच्चारादी य मत्तगा तिन्नि ।**
**अहवा भंडगगहणे, णेगविहं भंडगं जोग्गं ॥ ३४५९ ॥**

**भाण्डकं खलु पतद्ग्रहमुच्यते, उच्चारादौ** च आदिशब्दात् प्रश्रवणे श्लेष्मणि चेति परिग्रहः, **त्रीणि मात्रकाणि** भवन्ति। तद्यथा-उच्चारमात्रकं प्रश्रवणमात्रकं श्लेष्ममात्रकं चेति। **अथवा भाण्डकग्रहणेनाऽनेकविधं** साधुयोग्यं **भाण्डकं** गृहीतं द्रष्टव्यम् ॥ ३४५९ ॥

**चेलग्गहणे कप्पा, तस-थावरजीवदेहनिष्पन्ना ।**
**दोरेयरा व चिलिमिलि, चम्मं तलिगा व कत्ति व्व ॥ ३४६० ॥**

**चेलग्रहणेन त्रसस्थावरजीवशरीरनिष्पन्नाः**, और्णिक सौत्रिकरूपा इत्यर्थः, **कल्पाः** परिगृह्यन्ते, **चिलिमिलि** नाम जवनिका, सा **दवरकमयी इतरा वा** द्रष्टव्या, **चर्म** नाम **तलिका** उपानत्**कृत्ति**र्वा औपग्रहिकोपकरणविशेषरूपा ॥ ३४६० ॥

**अंगुट्ठ अवरपण्हिं, नहकोसिगछेयणं तु जे वद्धा ।**
**ते छिन्नसंधणट्ठा, दुखंडसंधाण हेउं वा ॥ ३४६१ ॥**

चर्ममयः कोशः चर्मकोशः सोऽङ्गुष्ठस्य यदि वा **अवरपार्ष्णिः** पार्ष्णिका तस्याः परिरक्षणाय ध्रियते। अथवा **नखरदनादे**रौपग्रहिकोपकरणविशेषस्य चर्ममयः **कोशश्च**र्मकोशः, **ये तु वध्रास्ते** चर्मपरिच्छेदनकमित्युच्यन्ते, **ते च छिन्नसन्धानार्थम्, अथवा द्विखण्डसन्धानहेतोः** ध्रियन्ते। तदेवं विषमपदानि व्याख्यातानि ॥ ३४६१ ॥

सम्प्रति दण्डाद्युपकरणस्थापनचिन्तां चिकीर्षुराह—

**जइ उ ठवेति असुन्ने, न य बेइ दिज्जहेत्थ ओहाणं ।**
**लहुगो सुन्ने लहुगा, हियम्मि जं जत्थ पावति उ ॥ ३४६२ ॥**

**यदि त्वशून्ये** अविरहिते प्रदेशे दण्डाद्युपकरणं **स्थापयति न च** कस्यापि सम्मुखमेवं **ब्रूते— अत्र दद्यादवधान**मुपयोगमिति तदा तस्य प्रायश्चित्तं **लघुको** मासः। अथ **शून्ये** स्थापयति तदा चत्वारो **लघुकाः**। तथा शून्ये मुक्ते स्तेनैश्चापहृ**ते यद् यत्र** जघन्ये मध्यमे उत्कृष्टे वा उपकरणे प्रायश्चित्तमुक्तं तत् **प्राप्नोति**॥ ३४६२ ॥

अत्र परस्यावकाशमाह—

**एयं सुत्तं अफलं, जं भणियं कप्पति त्ति थेरस्स ।**
**भन्नइ, सुत्तनिवातो, अतीव महल्लस्स थेरस्स ॥ ३४६३ ॥**

चोदकः प्राह- यद्येवमशून्ये शून्ये च प्रदेशे उपकरणदोषस्तर्हि **एतत् सूत्रमफलम**विषयं, यदुक्तं **कल्पते**ऽविरहितेऽवकाशे स्थापयित्वा **इत्यादि**, सूरिराह-**भण्यते** अत्रोत्तरं दीयते, अस्य **सूत्रस्य निपातो-ऽतिमहतो**ऽतिशयेन गरीयसः **स्थविरस्य** ॥ ३४६३ ॥

**गच्छाणुकंपणिज्जो, जेण ठवेऊण कारणेणं तु ।**
**हिंडइ जुण्णमहल्लो, तं सुण वोच्छं समासेणं ॥ ३४६४ ॥**

सोऽतिवृद्धो महान् **गच्छस्यानुकम्पनीयः** परं **येन कारणेन** स **जीर्णः महान्** एकाकीभूतो अविरहिते प्रदेशे उपकरणं **स्थापयित्वा** भिक्षां **हिण्डते**, तत् कारणं समासेन वक्ष्ये, **तच्च वक्ष्यमाणं शृणु** ॥ ३४६४॥

प्रतिज्ञातमेव निर्वाहयति—

**सो पुण गच्छेण समं, गंतूण अजंगमो न चाएइ ।**
**गच्छाणुकंपणिज्जो, हिंडइ थेरो पयत्तेणं ॥ ३४६५ ॥**

**स पुनरजङ्गमो गच्छेन समं गन्तुं न शक्नोति** ततः स **गच्छस्यानुकम्पनीय** इति कृत्वा **स्थविरो** वक्ष्यमाणेन **प्रयत्नेन** यतनया **हिण्डते** ॥ ३४६५ ॥

तमेव प्रयत्नमाह—

**अतक्कियउवहिणा ऊ, थेरा भणिया अलोभणिज्जेण ।**
**संकमणे पट्ठवणं, पुरतो समगं च जयणाए ॥ ३४६६ ॥**

यमुपधिं न कोऽपि तर्कयति विशेषतः परिभावयति तेन **अतर्कणीयेनोपधिना** अत एवा**ऽलोभनीयेन** लोभगोचरतामतिक्रान्तेन परिधाप्य मासकल्पप्रायोग्यस्य वर्षावासप्रायोग्यस्य वा क्षेत्रस्य **सङ्क्रमणे** कर्त्तव्ये आचार्येण ते **स्थविरा** अतिमहान्तो **भणिताः**– पुरतः समकं वा यतनया चल्यतां, तत्र यदि प्रतिभासते तर्हि **पुरतोऽ**ग्रे साधुभिः सह तस्य **प्रस्थापनं** क्रियते, अथ न शक्नोति पुरतो गन्तुं तदा **समकं नीयते** कथम् ? इत्याह– **यतनया** ॥ ३४६६ ॥

तामेव यतनामाह—

**संघाडग एगेण व, समगं गिण्हंति सभए ते उवहिं ।**
**कितिकम्म दवं पढमा, करेंति तेसिं असति एगो ॥ ३४६७॥**

यदि गच्छेन समं व्रजति ततः सुन्दरमेव सकलस्यापि गच्छस्य तत्साराकरणात्। अथ समकं गन्तुं न शक्नोति तदा साधुसङ्घाट**केन** समं, साधुसङ्घटकस्याऽभावे **एकेन वा** साधुना **समं** व्रजति, तत्र यौ तौ सहायौ दत्तौ तौ तस्योपकरणं **गृह्णीतः** परिवहतः यदा तु चौरभयेन **सभयं** स्थानं तदा समस्तमपि **उपधिं** कल्पादिलक्षणं गृह्णीतः, गृहीत्वा स्थविरो यथाजातः कृत्वा अग्रे क्रियते, ततः सभयस्थानलङ्घने **कृतिकर्म** विश्रामणां तस्य कुरुतः, कृत्वा **द्रवं** पानीयं समर्पयतः, तदनन्तरं **प्रथमा**लिकां कारयतः, **तयो**र्द्वयोः साध्वो**रभावे एकः** समस्तं प्रागुक्तं करोति ॥ ३४६७॥

**जइ गच्छेज्जाहि गणो, पुरतो पंथे य सो फिडिज्जाहि ।**
**तत्थ उ ठवेज्ज एगं, रिक्कं पडिपंथिगप्पाहे ॥ ३४६८ ॥**

गाथा ३४६७-३४७४ वृद्धस्य एकाकिभवन-कारणानि १३७० (A)

अथैकोऽपि सहायो न विद्यते तदा स स्थविर एकाक्यपि पुरतः प्रवर्त्त्यते, तत्र **यदि** सार्थादिवशतस्त्वरितं गच्छन् स **गणः पुरतो गच्छेत्**, यदि वा **पथि** परिरयादिना **स स्फिटितो** भवेत्, **तत्र** एकं साधुं **रिक्त**मुपकरणरहितं **स्थापयेत्**। अथ तत्र शरीरापहारिस्तेनभयं दुष्टव्याघ्रादिश्वापदभयं वा ततः स मोक्तुं न शक्यते तर्हि अग्रेतनस्थानात् प्रतिनिवर्त्तमानं **पथिकमप्याहे** इति सन्देशापयेत् यथा-अग्रे साधुसमुदायो व्रजन्नास्ते तस्मात् त्वरितमागम्यतामिति॥ ३४६८॥ सम्प्रति यथा स स्फिटितो भवति तथा प्रदर्शयति-

**सारिक्खकड्ढणीए, अहवा वातेण होज्ज पुट्ठो उ ।**
**एवं फिडितो होज्जा, अहवा वी परिरएणं तु ॥ ३४६९ ॥**
**कालगए व सहाए, फिडितो अहवा वि संभमो होज्जा ।**
**पढमबिइतोदएण व, गामपविट्ठो व जो होज्जा ॥ ३४७०॥**

पथि गच्छतो मार्गद्वयं तत्र येन पथा गच्छो गतस्तस्मादन्यस्मिन् पथि केचित् साधुसदृशाः पुरतो गच्छन्तो दृष्टास्ततः साधव एते गच्छन्तीति सादृश्यमिति **सादृश्यकर्षिन्या** विप्रलब्धस्सन्

तेन पथा गच्छेत् , **अथवा** अपान्तराले स **वातेन स्पृष्टः स्यात्** ततो गन्तुं न शक्नोति। **एवममुना** प्रकारेण स **स्फिटितो भवेत्** । **अथवा** तथाविधमहागर्तायाः पर्वतस्य नद्या वा **परिरयेण** स स्थविरो व्रजन् गच्छात् स्फिटितः स्याद्, यदि वा यस्तस्य **सहायो** दत्तः स **कालगत** इति **स्फिटित** एकाकी सञ्जातः। **अथवा सम्भ्रमे** श्वापदसम्भ्रमे वा त्वरितं सार्थेन सह पलायमाने गच्छे स्थविरः शनैर्व्रजन् [1]गच्छात् स्फिटितो भूयाद्। यदि वा **प्रथमेन** क्षुत्परीषहेन **द्वितीयेन** तृट्परीषहेन पीडितः सन् **यः** स्थविरो **ग्रामं** व्रजिकां वा **प्रविष्टो भवेत्,** गच्छश्च स्तेनादिभयेन सार्थेन समं त्वरितं व्रजति [एवं] स गच्छात् स्फिटति ॥ ३४६९ ॥ ३४७० ॥

**एएहिं कारणेहिं, फिडितो जो अट्ठमं तु काऊण ।**
**अणहिंडंतो मग्गति, इतरे वि य तं विमग्गंति ॥ ३४७१ ॥**

एतैरनन्तरोदितैः **कारणैर्यो** गच्छात् **स्फिटितः** सोऽष्टमं षष्ठं चतुर्थं वा **कृत्वा** भिक्षाम[ न]टन् गच्छं **मार्गयति** अन्वेषयति, **इतरेऽपि च** गच्छसाधवस्तं स्थविरं **विमार्गयन्ति**। अथ ते गच्छसाधवः सार्थेन समं व्रजन्तो यदि सार्थं मुञ्चन्ति तदा स्तेनैरपह्रियन्ते, वनदावेन



१. गच्छन्- सं. ।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा दह्यन्ते, दुष्टेन वा श्वापदेन केनापि गृह्यन्ते, ततो गवेषयितुं न शक्नुवन्ति तर्हि स्थविरेणावश्यमुक्तप्रकारेण मार्गणा कर्त्तव्या ॥ ३४७१ ॥

**अह पुण न संथरेज्जा, तो गहिएणेव हिंडते भिक्खं ।**
**जइ न तरेज्जाहि ततो, ठवेज्ज ताहे असुन्नम्मि ॥ ३४७२ ॥**

यदि चतुर्थेन षष्टेनाष्टमेन वा गवेषणं कर्तुं **न संस्तरेत् ततस्तदा** तत् उपकरण**मशून्ये** प्रदेशे **स्थापयेत्,** तत्रापि यानि वर्जनीयानि स्थानानि तानि प्रदर्शयति स्थापयेत्॥ ३४७२ ॥

**अह पुण ठविज्जिमेहिं, तु सुन्नग्गिकम्मकुच्छिएसुं वा ।**
**नाणुण्णवेज्ज दीहं, बहुभुंज परिच्छए पत्तं ॥ ३४७३ ॥**
**तिसु लहुग दोसु लहुगो, खद्धाइयणे चउलहू होंति ।**
**चउगुरुग संखडीए, अप्पत्तपडिच्छमाणस्स ॥ ३४७४ ॥**

[१]अत्राद्यगाथापदानां द्वितीयगाथोक्तप्रायश्चित्तैः सह यथासङ्ख्येन योजना, सा चैवम्-**अथ**

१. आत्रद्यपदगाथानां सं. ।।



For Private and Personal Use Only

**पुनः स्थापयेदेषु**[१] वक्ष्यमाणेषु स्थानेषु, गाथायां तृतीया सप्तम्यर्थे, ततः प्रायश्चित्तसम्भवः। तत्र यदि **शून्ये** स्थापयति चतुर्लघु, **अग्निकर्मिका**यामपि शालायां स्थापने चतुर्लघु, अग्निना यदि कथमप्युपकरणस्य दाहस्तदा तन्निष्पन्नमपि प्रायश्चित्तं, **जुगुप्सिते** जुगुप्सितगृहेषु स्थापयतश्चतुर्लघुः। तस्मादेतानि स्थानानि वर्जयित्वा वक्ष्यमाणेषु स्थानेषु स्थापयेद्, यत्र स्थापयति ते अनुज्ञापयितव्या **अननुज्ञापने** मासलघु, **दीर्घां** भिक्षाचर्यां करोति मासलघु, **बहु** यदि **भुङ्क्ते** तदा प्रायश्चित्तं **चत्वारो लघवः** भवन्ति, **खद्धाइयणे** इति खद्धस्य प्रचुरस्य अदने भक्षणे सतीत्यर्थः। तथा **अप्राप्तां संखडिं प्रतीक्षमाणस्य** प्रायश्चित्तं **चत्वारो गुरुकाः**॥ ३४७३॥ ॥ ३४७४॥

सम्प्रति येषु स्थापयेत् तानि दर्शयति—

**असतीएऽमणुन्नाणं, सव्वोवहिणा व भद्दएसुं वा ।**
**देसकसिणे व घेत्तुं, हिडंइ सइ लंभे आलोए ॥ ३४७५॥**



---

१. स्थापयेद्येषु- सं. ।।

यदि समनोज्ञाः सन्ति तर्हि तेषूपकरणं स्थापयितव्यं, तेषा**मसति** अभावे **अमनोज्ञाना**मपि असाम्भोगिकानामप्युपाश्रये स्थापयेत्। यदि वा **सर्वेणाप्युपधिना** गृहीतेन हिण्डते यदि शक्तिरस्ति, अशक्तौ पार्श्वस्थादिष्वपि स्थापयति। यदि **वा** यथा**भद्रकेषु** गृहेषु स्थापयेत्, **देसकसिणे वा घेत्तु**मिति समस्तस्योपधे**र्देश**भूतानि यानि **कृत्स्नानि** परिपूर्णानि कल्पादीनि तानि **गृहीत्वा** भिक्षा**मटति,** अशक्तौ तान्यपि मुक्त्वा परिभ्रमति, तत्र **सति लाभे** तेषु गृहेषु भिक्षामटति येष्वटन् उपकरणं **पश्यति** ॥ ३४७५॥

**असतीए अविरहियम्मि, [1]णंतिक्कादीण अंतिए ठवए ।**

**देज्जह ओहाणं ति य, जाव उ भिक्खं परिभमामि ॥ ३४७६॥**

**असति** अविद्यमाने लाभे **अविरहिते** प्रदेशे **नैत्यकादीनां** नैत्यिको ध्रुवकर्मिको लोहकारादिः, आदिशब्दात् मणिकारशङ्खकारादिपरिग्रहः, तेषा**मन्तिके स्थापयेत्**। ब्रूते च— '**दद्यादेतस्योपकरणस्याऽवधानं यावदहं भिक्षां परिभ्रमामि**' ॥ ३४७६॥

**ठवेति गणयंतो वा, समक्खं तेसि बंधेउं ।**

**आगतो रक्खिवया भोत्ति, तेण तुब्भच्चिया इमे ॥ ३४७७॥**

१. णंतक्कादीण सं. ॥

तेषां ध्रुवकर्मिकप्रभृतीनां **समक्षं गणयन् बद्ध्वा स्थापयति वा**शब्दः स्थापनाविषय-प्रकारान्तरसूचने, **आगत**श्च सन् द्वितीयमपि वारमवग्रहमनुज्ञापयति, कथम्? इत्याह— **भो!** इत्यामन्त्रणे, 'युष्माभी **रक्षितान्यमूनि तेन युष्मदीयानी**त्यनुजानीत मां गृह्णन्तमिति'॥ ३४७७॥

**दट्ठूण वऽन्नहा गंठिं, केण मुक्को त्ति पुच्छती ।**
**रहियं किं घरं आसी, को परो व इहागतो? ॥ ३४७८॥**

इह यदा तेषां समक्षमुपकरणं बद्ध्वा स्थापयति तदा साभिज्ञानं ग्रन्थिं बध्नाति ततः आगतः सन् तं प्रलोकयति मा केनाप्युन्मुच्य किञ्चित् हृतं स्यात्, तत्र यदि तथैव ग्रन्थिं पश्यति ततः पूर्वोक्तप्रकारेण द्वितीयमवग्रहमनुज्ञापयति। अथ **ग्रन्थिमन्यथा पश्यति** ततो ब्रूते— '**केना**ऽयं ग्रन्थिरुन्मुक्तश्छोटितः?' **इति पृच्छति,** तथा '**किमिति** क्षेपे **रहितं** शून्यं **गृहमासीत्? को वा अपर इह समागतः**' इति ॥ ३४७८॥

**नत्थि वत्थुं सुगंभीरं, तं मे दावेह मा चिरा ।**
**न दिट्ठो वा कहं एंतो, तेणतो [1]उंवओ इहं ॥ ३४७९॥**

गाथा ३४७५-३४८१ एकाकि-वृद्धस्य उपकरण-स्थापनविधिः १३७३ (A)

१. उभयो-ला.॥

ममोपकरणमध्ये **यद्वस्तु सुगम्भीर**मतिशोभनं **तन्नास्ति तस्माद्दर्शय** तद्वस्तु **मा चिर**कालीकुरु। अथ [स ब्रूते]'न गृहीतं मया नापि कोप्यागच्छन् दृष्टः' तत आह— **न दृष्टो** वा **कथमत्रागच्छन् स्तेनक** उ[1]पयाति **उत्परकः**, अवश्यं स दृष्टः स्वयं वा गृहीतमिति भावः ॥ ३४७९ ॥

**धम्मो कहिज्ज तेसिं, धम्मट्ठा एव दिन्नमन्नेहिं ।**
**तुब्भारिसेहिं एयं, तुब्भेसु य पच्चतो अम्हं ॥ ३४८० ॥**

**धर्मस्तेषां** ध्रुवकर्मिकप्रभृतीनां **कथ्यते,** कथयित्वा च पर्यन्ते सण्टङ्कमानीयमिदमुच्यते— **धर्मार्थमेव युष्मादृशैरन्यैरेतत्** उपकरणं मह्यं **दत्तं युष्मासु** च विषये **अस्माक**मतीव **प्रत्ययो** विश्वासः ॥ ३४८० ॥

ततः किम्? इत्याह—

**तो ठवियं णे एत्थं, दिज्जउ तं सावया इमं अम्हं ।**
**जइ देंती रमणिज्जं, अदेंते ताहे इमं भणति ॥ ३४८१ ॥**

१. उवयति-सं. ।

'यत एवं **तस्मात्** भोः! **श्रावकाः!** यन्नोऽस्माकमत्र **स्थापितं तदिदमस्माकं दीयताम्,** एवमुक्ते **यदि ददति** ततो **रमणीयं** सुन्दरम्, अथ **न ददति** ततोऽददतस्तान् **इदं** वक्ष्यमाणं **भणति**॥ ३४८१॥

तदेवाह—

**थेरो त्ति काउं कासु[1] मा अवण्णं, संती सहाया बहवो ममन्ने ।**
**जे उग्गमेहिंति ममेय मोसं, खित्ताइदि नाउं इति बेंतऽदेंते ॥ ३४८२॥**

**स्थविर इति कृत्वा मा अवज्ञां कार्षुः** यतः **सन्ति ममान्ये बहवः सहाया ये क्षेत्रादि ज्ञात्वा** क्षेत्रकालादिकमवबुध्य **ममेतत् मोषमुद्गमयिष्यन्ति इति** एतत् तान् **अददतः** प्रति ब्रूते ॥३४८२॥

**उवहीपडिबंधेणं, सो एवं अच्छई तहिं थेरो ।**
**आयरियपायमूला, संघाडेगो व अह पत्तो ॥**

---

१. कुरु-पु.प्रे.ला.॥

**उपधिप्रतिबन्धेन स स्थविरस्तत्र एव**मुक्तप्रकारेण **तिष्ठति** तावत् याव**दाचार्यपादमूलात् सङ्घाटक एको वा** साधुः समागच्छति। **अथ** सोऽपि **प्राप्त**स्तर्हि यत् तैः कर्त्तव्यं तदुपदर्शयति ॥३४८३॥

**ते वि य मग्गंति ततो, अदेंते साहेंति भोइयाईणं ।**
**एवं तु उत्तरुत्तर, जा राया अहव जा दिन्नं ॥ ३४८४ ॥**

**तेऽपि** आचार्यपादमूलादागताः साधवस्तान् ध्रुवकर्मिकादीन् **मार्गयन्ति** याचन्ते, **ततो** यदि न ददति तर्हि तान् **अददतो भोजिकादीनां** नगरप्रधानपुरुषादीनां **साधयन्ति** कथयन्ति। अथ तत्रापि न किमप्यनुशासनं तर्हि ततोऽपि बृहतां बृहत्तराणां कथनीयम् , **एवमुत्तरोत्तरस्य** कथनं तावत् **यावत् राजा, अथवा यावद्दत्तं** भवति तावत् कथनीयम् ॥ ३४८४॥

**अह पुण अक्खुय चिट्ठे, ताहे दोच्चोग्गहं अणुण्णवए ।**
**तुब्भच्चयं इमं ति य, जेणं भे रक्खियं [१]तुमए ॥ ३४८५॥**

---

१ इणमो - P ला. पाठान्तरम्. ॥

**अथ पुनस्तत्** उपकरण**मक्षतं तिष्ठति तदा द्वितीयमवग्रहमनुज्ञापयति** यथा—'इदं समस्तमप्युपकरणं **युष्मदीयं येनेदं युष्माभी रक्षितं** तस्मान्मां गृह्णन्तमनुजानीतेति' एतावता 'कप्पति ण्हं सन्नियट्टचाराणां दोच्चं पि उग्गहं अणुण्णवित्तेति' व्याख्यातम् ॥ ३४८५ ॥

**घेत्तूवहिं सुन्नघरम्मि भुंजे, खिन्नो व तत्थेव उ छन्नदेसे।**
**छन्नासति भुंजइ कच्चगे तो, सव्वो वि[1] उं भाणे करेत्तु कप्पं ॥ ३४८६ ॥**

**गृहीत्वा उपधिं शून्यगृहे** गत्वा **भुङ्क्ते**। अथ मार्गपरिश्रमेण भिक्षाटनेन च **खिन्नः** परिश्रान्तस्तर्हि **तत्रैव छन्ने** आवृते **प्रदेशे** भुङ्क्ते, अथ **छन्न**प्रदेशो **नास्ति** तर्हि **कच्चगे** चड्डुगे[2] **सर्वं** भाजनादपवृत्त्य **भाजनस्य** च **कल्पं कृत्वा भुङ्क्ते** ॥ ३४८६ ॥

**मज्झे दवं पिबंतो, भुत्ते वा तेहिं चेव दावेंति ।**
**निच्छे वामेयत्तण, एवमेव य कच्चए डहरे ॥ ३४८७॥**

**मध्ये** भोजनमध्यभागे किञ्चिद्भुक्ते इत्यर्थः। **द्रवं पिबन्** पातुकाम **भुक्ते वा** परिपूर्णे

१. वि तुब्भाण- ला.॥ २. चट्टगे - सं. ॥

**तैरेव** गृहस्थै**र्दापयति** मात्रकात् पानीयमपवर्त्तापयति अपवर्त्ताप्य द्वाभ्यां हस्ताभ्यामञ्जलिं कृत्वा पिबति। अथ **नेच्छति** गृहस्थोऽपवर्त्तयितुं ततो **वामहस्तेन** स्वयमपवर्त्य एकेन हस्तेनाञ्जलिं कृत्वा पिबति। तथा यदि क्षुल्लगे चड्डुगे न सर्वं भक्तं माति तदा यः पानीयपानविषये विधिरुक्तः स एवात्रापि द्रष्टव्यः। तथा चाह—**एवमेव** अनेनैव प्रकारेण **डहरे** क्षुल्लके कच्चके द्रष्टव्यम् ॥ ३४८७॥

**अप्पडिबज्झंतगमो, इयरे वि गवेसए पयत्तेणं ।**
**एमेव अवुड्डस्स वि, नवरं गहिएण अडणं तु ॥ ३४८८॥**

एवं यतनां कुर्वतो व्रजिकादि**ष्वप्रतिबध्यमानस्य** प्रतिबन्धमकुर्वतो **गमो** गमनं गच्छे भवति। **इतरेऽपि** च गच्छसाधवस्तं स्थविरं **प्रयत्नेन गवेषयन्ति**। गाथायामेकवचनं प्राकृतत्वात्। योऽ**प्यवृद्धः** कारणतः कथमप्येकाकी भवेत्तस्या**प्येवमेव** अनेनैव प्रकारेण यतना द्रष्टव्या, **नवरं** भिक्षार्थ**मटनं गृहीतेनो**पकरणेन तस्य द्रष्टव्यम् ॥ ३४८८॥

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा पाडिहारियं वा, सागरियसंतियं वा सेज्जासंथारगं दोच्चं पि ओग्गहं अणणुन्नवेत्ता बहिया नीहरित्तए ॥ ६ ॥**

**कप्पइ निग्गंथाण वा निग्गंथीण वा पाडिहारियं वा, सागारसंतियं वा सेज्जासंथारगं दोच्चंपि ओग्गहं अणुन्नवेत्ता बहिया नीहरित्तए ॥ ७॥**

'नो कप्पइ निग्गंथाण वा निग्गंथीण वा' इत्यादि, अस्य सूत्रस्य सम्बन्धमाह—

**संथारएसु पगए, अंतरा छत्तदंडकत्तिल्ले ।**
**जंगमथेरे जयणा, अणुकंपऽरिहे समक्खाया ॥ ३४८९॥**

**दोच्चं च अणुण्णवणा, भणिया इमिगा वि दोच्चऽणुन्नवणा ।**
**निय उग्गहम्मि पढमं, बिइयं तु परोग्गहे सुत्तं ॥ ३४९०॥**

**संस्तारकेषु** पूर्वसूत्रेष्वधिकृतेषु **अन्तरा छत्र-दण्ड-कृत्तिवति जङ्गम-स्थविरे** समस्तस्यापि गच्छस्या**ऽनुकम्पार्हे यतना** अनन्तरसूत्रेण **समाख्याता**। सम्प्रति पुनः संस्तारकोऽनेन सूत्रेण भण्यते, एष सूत्रसम्बन्धः। अथवा अन्यथा सूत्रसम्बन्धः, तमेवाह— **दोच्चं चेत्यादि, द्वितीयावग्रहानुज्ञापना** जङ्गमस्थविरस्यानन्तरसूत्रेण **भणिता, इयमपि** अनेनापि सूत्रेणाभिधीयमाना **द्वितीयावग्रहानुज्ञापना,** ततो द्वितीयावग्रहानुज्ञापनाप्रस्तावादिदं सूत्रं

पूर्वसूत्रादनन्तरमुक्तं, नवरं **प्रथम**मनन्तरं सूत्रं **निजक**स्यात्मीयस्योपकरणस्या**वग्रहे**ऽनुज्ञापना-विषयं **द्वितीय**मधिकृतं **तु सूत्रं परस्य** परकीयस्य शय्यातरसत्कस्यान्यसत्कस्य वा इत्यर्थः, **अवग्रहे** अनुज्ञापनायाम् एवमनेन सम्बन्धेनायातस्यास्य व्याख्या —

**नो कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा प्रातिहारिकं** शय्यासंस्तारकं **शय्यातरसत्क**मन्य सत्कं वा **द्वितीयमप्यवग्रहमननुज्ञाप्य बहिर्निर्हर्तुं** नेतुम्। **अनुज्ञाप्य** पुनः **कल्पते** इति सूत्रसङ्क्षेपार्थः॥ सम्प्रति **निर्युक्तिविस्तरः**—

**परिसाडिमपरिसाडी, पुव्वं भणिया इमं तु नाणत्तं ।**
**पडिहारिय सागारिय, तं चेवंतो बहिं नेति ॥ ३४९१॥**

**परिशाटिः** यादृशः संस्तारको भवति यादृशश्चा**ऽपरिशाटिरे**तौ द्वापि **पूर्व**मस्मिन्नेवाष्टमो-द्देशके **भणिता इदं त्वत्र नानात्वं**, तदेवाह— **प्रातिहारिकं सागारिक**सत्कं **तमेव** शय्यासंस्तारक**मन्तः**स्थितं **बहि**र्नयति ॥ ३४९१॥

एतदेव सविस्तरं भावयति—

**परिसाडिपरिसेहो, पुणरुद्धारो य वण्णितो पुव्वं ।**
**अपरिसाडिग्गहणं, वासासु य वन्नियं नियमा ॥ ३४९२॥**

पूर्वं **परिशाटेः** शय्यासंस्तारकस्य **प्रतिषेधः** कृतः यथा—न कल्पते परिशाटिः शय्यासंस्तारक इति, ततः **पुनरुद्धारो**ऽपवादः **पूर्व**मेव **वर्णितो** यथा ऋतुबद्धे काले निष्कारणं संस्तारका न कल्पन्ते, [कारणे पुनः कल्पन्ते]तथा पूर्वमेवैतदपि **वर्णितं** यथा **वर्षासु** वर्षाकाले **नियमादपरिशाटेः** शय्यासंस्तारकस्य ग्रहणं कर्त्तव्यमिति ॥ ३४९२॥



**पुण्णम्मि अंतो मासे, वासावासे विमं हवति सुत्तं ।**
**तत्थेवण्णं गवेसेइ[1], असती तं चेवऽणुण्णवए ॥ ३४९३ ॥**

**अन्तर्ग्रामस्य** नगरस्य वा मध्ये **पूर्णे मासे** पूर्णे **वर्षावासे वा** बहिरवस्थातुकामाना**मिद**मधिकृतं **सूत्रं भवति,** यथा- न कल्पन्ते अभ्यन्तराणि तृण-फलकानि यैर्दत्तानि तानि अनापृच्छ्य बहिर्नेतुमिति। तत्र प्रथमतस्**तत्रैव** बहिःप्रदेशे **अन्यं** तृण-फलकादिमयं शय्यासंस्तारकं

१. गविस्से- ला. ।।

**गवेषयेत्, असति** बहिः संस्तारकस्याऽलभ्यमानत्वेनाभावे **तमेव** सागारिकसत्कमन्यसत्कं वा शय्यासंस्तारक**मनुज्ञापयेत्,** यथा— 'बहिर्याचितः शय्यासंस्तारकः परं न लब्धस्ततो यूयमनुजानीताऽऽत्मीयं संस्तारकं येन बहिर्नयामः' इति। यदि नानुज्ञापयति तदा तृणमय-संस्तारकविषये प्रायश्चित्तं मासलघु, फलकमयसंस्तारकविषये चतुर्लघु ॥ ३४९३ ॥

अत्रैवापवादमधिकृत्य विकल्पानाह—

**अहवा अवस्सघेत्तव्वयम्मि दव्वम्मि किं भवे पढमं? ।**
**नयणं समणुण्णा विवच्चओ वा जहुत्तातो ॥ ३४९४ ॥**

**अथवे**त्यपवादमधिकृत्य प्रकारान्तरोपदर्शने । यदि नियमात् तत्संस्तारकद्रव्यं बहिर्नेतव्यं, न शक्यते तद्विना मोक्षसाधनं कर्तुमिति, तर्हि **प्रथमतः किं** कर्त्तव्यं नयनं समनुज्ञा वा? आचार्य आह— **अवश्यं नयनलक्षणे** अपवादे प्राप्ते पूर्वं **नयनं** कर्त्तव्यं पश्चा**दनुज्ञापना,** यदि वा पूर्वमनुज्ञापना कर्त्तव्या पश्चान्नयनं **विपर्ययो वा यथोक्तात्** । किमुक्तं भवति? नापि पूर्वमनुज्ञापयेत् नापि नीत्वा पश्चादनुज्ञापयेत्। तत्र यः पूर्वमनुज्ञापनं पश्चान्नयनमित्येकान्तशुद्धो भङ्गः, एष च

भङ्गस्तदा द्रष्टव्यो यदा ये दोषा मासकल्पे वर्णितास्ते अन्तः सन्ति बहिर्न विद्यन्ते, बहिश्च तृणफलकादीन्यनुज्ञाप्यमानानि न लभ्यन्ते तदा अभ्यन्तराणि येषां सत्कानिताननुज्ञाप्य नीयन्ते। अथान्तः अशिवादीनि कारणानि निर्गमनमुहूर्त्तश्चातिप्रत्यासन्नो न च बहिस्तृणफलकादीनि लभ्यन्ते तदा पूर्वं नयनं पश्चादनुज्ञापनं, यथा- बहिर्याचितानि तृणफलकादीनि परं न लब्धानि ततो युष्मदीयान्येव तत्र नीतानीत्यस्माकं तान्यनुजानीत। यदा तु कारणवशतो बहिरवश्यं गन्तव्यम् , बहिश्च तृण-फलकादीनि न लभ्यन्ते न च तानि विना साधवः संस्तरीतुं शक्नुवन्ति, न च येषामभ्यन्तराणि तृणफलकादीनि ते अनुजानन्तः सम्भाव्यन्ते न वाऽननुज्ञाप्य तेषु बहिर्नीतेषु तेषाम**भिभव**स्तदा न पूर्वमनुज्ञापनं नापि नीत्वा पश्चादनुज्ञापनमिति। तदेवं पूर्णे मासकल्पे पूर्णे वर्षाकल्पे चायं विधिरुक्तः, एवमपूर्णेऽपि द्रष्टव्यम् ॥ ३४९४॥

तथा चाह—

**एवमेव अपुण्णम्मि वि, वसहीवाघाए अन्नसंकमणे ।**
**गंतव्वुवासयाऽसति, संथारो सुत्तनिद्देसो ॥ ३४९५॥**

**एवमेव** अनेनैव प्रकारेण **अपूर्णे** मासकल्पे अपूर्णे वा वर्षाकल्पे द्रष्टव्यं, कथम्? इत्याह—**वसतेर्व्याघाते** सति **उपाश्रयाऽभावे गन्तव्य**मवश्यं जातं, तत्राऽन्यक्षेत्रसङ्क्रमणे तत्र संस्तारकालाभे पूर्वप्रकारेण **संस्तारको** नेतव्यः। एष **सूत्रनिर्देशः** एष सूत्रविषय इति भावः ॥ ३४९५॥

तत्र पूर्वं नयनं पश्चादनुज्ञापनमिति भङ्गमधिकृत्य विधिमाह—

**नीहरिउं संथारं, पासवणुच्चारभूमिभिक्खादी ।**
**गच्छेऽहवा वि झायं, करेइमा तत्थ आरुवणा ॥ ३४९६ ॥**

यदि कारणवशतः पूर्वमननुज्ञाप्य तृणफलकादिमयः संस्तारको बहि**र्नीतो** यदिवान्तर्वसतेर्व्याघाते बहिरन्यां वसतिं गत्वा तत्र संस्तारकोऽननुज्ञाप्य नीत्वा स्थापितस्तर्हि शेषव्यापारपरित्यागेन नियमतः पश्चादनुज्ञापना कर्त्तव्या। अथ **नीत्वा प्रश्रवणभूमिमुच्चारभूमिं भिक्षादौ** वा **गच्छेद्, अथवा स्वाध्यायं करोति तत्रेयं** वक्ष्यमाणा **आरोपणा** प्रायश्चित्तम् ॥ ३४९६॥

तामेवाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एएसुं चउसुं पी, तणेसु लहुगो य लहुग फलगेसु ।**
**रायदुट्ठग्गणहे[1], चउगुरुगा होंति नायव्वा ॥ ३४९७ ॥**

**एतेषु** प्रश्रवणभूम्यादिषु **चतुर्षु** स्थानेष्वननुज्ञाप्य प्रवृत्तौ **तृणेषु** तृणमयसंस्तारकविषये प्रायश्चित्तं **लघुको** मासः, **फलकेषु** विषये चत्वारो **लघुकाः**, **राजद्विष्टानां** राजप्रतिषिद्धानां तृणफलकादीनामननुज्ञाप्य **ग्रहणे चत्वारो गुरुकाः भवन्ति ज्ञातव्याः** ॥ ३४९७ ॥

**सूत्रम्— नो कप्पइ निग्गंथाण वा निग्गंथीण वा पाडिहारियं वा, सागारिसंतियं वा सेज्जा संथारगं सव्वप्पणा अप्पिणित्ता दोच्चं पि ओग्गहं अणणुन्नवेत्ता अहिट्ठित्तए ॥८ ॥**

**कप्पइ निग्गंथाण वा निग्गंथीण वा पाडिहारियं वा, सागारिसंतियं वा सेज्जासंथारगं सव्वप्पणा अप्पिणित्ता दोच्चं पि ओग्गहं अणुन्नवेत्ता अहिट्ठित्तए ॥ ९ ॥**

**नो कप्पइ निग्गंथाण वा निग्गंथीण वा पुव्वामेव ओग्गहं ओगिण्हिता तओ पच्छा अणुन्नवेत्तए ॥ १० ॥**

सूत्र ८-१२ गाथा ३४९५-३४९८ द्वितीयावग्रहानुज्ञापना-विधिः


---
१. रायदु० ला. ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**कप्पइ निग्गंथाण वा निग्गंथीण वा पुव्वामेव ओग्गहं अणुन्नवेत्ता तओ पच्छा ओगिण्हित्तए ॥११॥**

**अह पुण एवं जाणेज्जा—इह खलु निग्गंथाण वा निग्गंथीण वा नो सुलभे पाडिहारिए सेज्जासंथारए त्ति कट्टु एवं णं कप्पइ पुव्वामेव ओग्गहं ओगिण्हित्ता तओ पच्छा अणुन्नवेत्तए ।**

**"मा[1] दुहओ अज्जो! बिइयं" ति वइ अणुलोमेणं अणुलोमेयव्वे सिया ॥ १२॥**

"नो कप्पइ निग्गंथाण वा निग्गंथीण वा" इत्यादि, "जाव अणुलोमेणं अणुलोमेयव्वे सिया"॥ ३४९७॥

इति अस्य सूत्रस्य सम्बन्धमाह—

**उग्गहसमणुण्णासुं, सेज्जा-संथारएसु य तहेव ।**
**अणुवत्तंतेसु भवे, पंते अणुलोमवति सुत्तं ॥ ३४९८ ॥**

---

१. मा वहउ- आ. प्र. ब्यावर, श्युब्रींग ॥



For Private and Personal Use Only

अवग्रहः संस्तारकाश्च स्वामिना अनुज्ञाता एव ग्रहीतव्या इत्युत्सर्गत उपदेशः, तदेव**मवग्रहसमनुज्ञासु शय्यासंस्तारकेषु तथैव** समनुज्ञातव्ये**ष्वनुवर्त्तमानेष्वि**दमपि सूत्रं समनुज्ञातसंस्तारकादिग्रहणे भवति। अपवादतोऽननुज्ञाप्य संस्तारकग्रहणे यदि संस्तारकस्वामी प्रान्तो रुष्टो भवेत् तस्मिन् **प्रान्ते अनुलोमवाक्** वक्तव्या ॥ ३४९८॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या— **न कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा प्रातिहारिकं शय्यासंस्तारकं सर्वात्मना अर्पयित्वा द्वितीयमप्यवग्रहमननुज्ञाप्याधिष्ठातुम्, अनुज्ञाप्य पुनः कल्पते**। एवं सागारिकसत्केऽपि शय्या-संस्तारके द्वावालापकौ वक्तव्यौ॥

तथा **न कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा पूर्वमेवावग्रहमवग्रहीतुं ततः पश्चादनुज्ञापयितुम्। कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा पूर्वमेवावग्रहमनुज्ञापयितुं पश्चादत्र ग्रहीतु**मिति। **अथ पुनरेतत् जानीयात् इह खलु निर्ग्रन्थानां निर्ग्रन्थीनां वा न सुलभः शय्या-संस्तारक इति कृत्वा एव**ममुना प्रकारेण **ण्ह**मिति वाक्यालङ्कारे **कल्पते पूर्वमेवावग्रहमवग्रहितुं ततः पश्चादनुज्ञापयितुम्।** तत्रैवंकरणे शय्यासंस्तारकस्वामिना सह संयतानां कलहे आचार्याः संयतान् **ब्रुवते— 'मा** आर्या! **द्विधातः** कुरुत द्वावपि कुरुत

एकं वसतिं प्रतिगृह्णीथ अपरं परुषाणि भाषध्वे तस्मात् क्षमध्वम्' इत्येवं वचसा **अनुलोमेन** अनुकूलेनाऽ**नुलोमयितव्यः स्या**दिति ॥

**सेज्जासंथारदुगं, अणणुण्णवेऊण ठायमाणस्स ।**
**लहुगो लहुगो लहुगा, आणादी निच्छुभण पंतो ॥ ३४९९॥**

**शय्यासंस्तारकद्विकं** परिशाट्यपरिशाटिरूपं शालादिषु चावग्रह**मननुज्ञाप्य तिष्ठतः** प्रायश्चित्तं लघुकादि, तद्यथा-शालादिष्ववग्रहमननुज्ञाप्य तिष्ठतो **लघुको** मासः, परिशाटौ मासलघु , अपरिशाटौ चत्वारो **लघुकाः**, तथा **आज्ञादय** आज्ञाभङ्गादयो दोषाः। तथा **प्रान्तको**ऽपि रुष्टः सन् **निच्छुभणं** निष्काशनं कुर्यात् ॥ ३४९९ ॥

**एवमदिण्णवियारे, दिण्णविचारे वि सभपवादीसु ।**
**तणफलगाणुण्णाया, कप्पडियादीण जत्थ भवे ॥ ३५००॥**

**एवमदत्तविचारे** शालादौ द्रष्टव्यं, **दत्तविचारं** नाम- यत्र कार्पटिकादिर्न कोऽपि वार्यते तच्च **सभा वा प्रपा** वा मण्डपको वा यान्यपि च तत्र **तृणफलकादीनि** तान्यप्य**नुज्ञातानि**।

गाथा ३४९९-३५०३ अनुज्ञापना कार्या

तथा चाह- **यत्र कार्पटिकादीनां** तृणफलकादीन्यनुज्ञातानि **भवन्ति** तेष्वपि दत्तविचारेषु सभा- प्रपादिषु यानि तृणफलकादीनि तान्यपि ॥ ३५०० ॥

किम् ? इत्याह—

**ताण वि उ न कप्पंती, अणणुण्णवियम्मि लघुकमासो उ ।**
**इत्तिरियं पि न कप्पति, जम्हा उ अजातितोग्गहणं ॥ ३५०१ ॥**

**तान्यपि अननुज्ञापिते** स्वामिनि ग्रहीतुं **न कल्पन्ते,** यदि पुनरननुज्ञाप्य गृह्णाति तदा प्रायश्चित्तं **लघुको मासः**। कस्मादेवम् ? अत आह— यस्मा**दित्वरमपि** क्षणमात्रमपीत्यर्थः **अवग्रहणमयाचितं न कल्पते** । उक्तं च—

*इत्तिरियं पि न कप्पति, अविदिन्नं खलु परोग्गहादीसु ।*
*चिट्ठित्तु निसीयतु व, तइयव्वयरक्खणट्ठाए ॥ ३५०१ ॥*

तथा अननुज्ञापने तिष्ठत इमे च दोषाः—

**जावंतियदोसा वा, अदत्तनिच्छुभण दिवसरातो वा ।**
**एए दोसे पावइ, दिन्नवियारे वि ठायंतो ॥ ३५०२॥**

**अननुज्ञाते दत्तविचारेऽपि** यदि **तिष्ठति** तदा **यावन्तिकदोषाः** तथा **अदत्तेति**, अदत्तादान-ग्रहणदोषश्चोपजायते, तथा कदाचित् स सभादिस्वामी प्रान्तो ब्रूयात्— केनामीषामत्र स्थानं दत्तं? न ह्यमीषां योग्यमिति, ततो रुष्टस्सन् **दिवसे रात्रौ वा निष्काशनं** कुर्यात्, यस्मात् दत्तविचारेऽप्येवमननुज्ञाप्य तिष्ठन् **एतान् दोषान् प्राप्नोति** तस्मात् तत्रापि पूर्वमनुज्ञाप्य पश्चात् कल्पते स्थातुम्, एवं सति यावन्तिकदोषो न भवति, स्वामिसत्कं कृत्वा तदनुज्ञापनाददत्तादानं निष्काशनं च न भवति ॥ ३५०२॥

**किंतु अदिन्नवियारे, कोट्ठारादीसु जत्थ तणफलगा ।**
**रक्खिज्जंते तहियं, अणणुन्नाए न ठायंति ॥ ३५०३ ॥**



आस्तां दत्तविचारे अनुज्ञापनमन्तरेण न तिष्ठन्ति प्रागुक्तदोषसम्भवात्, किन्तु **अदत्तविचारे**-ष्वपि गाथायामेकवचनमपिशब्दलोपश्चाऽऽर्षत्वात् , न दत्तो विचारः प्रवेशो यत्र तान्यदत्तविचाराणि तेष्वपि, केष्वित्याह-**कोष्ठागारादिषु** कोष्ठागारं धान्यस्य तृणादीनां वा, आदिशब्दाच्चतुः

शालादीनि तथा देवकुलं गोष्ठिकादीनां वा गृहाणि यत्र गोष्ठिकादयः समवायं कुर्वन्ति तानि दत्तविचाराणि भवन्ति, अदत्तविचाराणि गृह्यन्ते, तेषु कोष्ठागारादिषु **यत्र** येषु **तृण-फलकानि** रक्ष्यन्ते तथाहि–प्रतीतमेतत् कोष्ठागारादिषु मा कोऽपि किमपि हार्षीदिति प्राहरिकमोचनेन तृणानि फलकानि धान्यानि च प्रयत्नेन रक्ष्यन्ते तत्र **तेष्वननुज्ञातेषु** साधवो **न तिष्ठन्ति** ॥ ३५०३ ॥

किमर्थम्? इति चेदत आह—

**दोसाण रक्खणट्ठा, चोएइ निरत्थयं ततो सुत्तं ।**
**भण्णइ कारणियं खलु, इमे य ते कारणा होंति ॥ ३५०४ ॥**

**दोषाणां** प्रायश्चित्तप्रसङ्गतो भङ्गादिरूपाणां **रक्षणार्थं** रक्षणाय तत्र न तिष्ठन्ति, अत्र **परश्चोदयति** –यद्येवं **ततः** सूत्रम् "इह खलु निग्गंथाण वा निग्गंथीण वा नो सुलभे पाडिहारिए" इत्यादि निरर्थकम्, अविषयत्वात्, सूत्रे हि अनुज्ञापनमन्तरेणापि पूर्वमवग्रहग्रहणमनुज्ञातमिति। सूरिराह **भण्यते** उत्तरं दीयते- इदं **खलु** सूत्रं **कारणिकं** कारणैर्निर्वृत्तं तानि च **कारणानि इमानि** वक्ष्यमाणलक्षणानि **भवन्ति** ॥ ३५०४॥ तान्येवाह—

**अद्धाणे अट्ठाहिय, ओमऽसिवे गामाणुगामि विवेले ।**
**तेणा सावय मसगा, सीयं वासं दुरहियासं ॥ ३५०५॥**

**अध्वनि** मार्गे गताः साधवः, तत्राऽन्यत्र याचिता वसतिः परं न लब्धा, अथवा **अष्टाहिकं** द्रष्टुमागताः, यदि वा ग्लानादीनां कारणेन, यदि वा **अवमौदर्यमशिवं** वा भविष्यतीत्यन्यदेशं संप्रस्थिता विकाले प्राप्ताः, अथवा **ग्रामानुग्रामं** विहरन्ति व्यतिकृष्टमन्तरमपान्तराले इति कृत्वा सार्थवशेन वा **विवेले** विकाले प्राप्ताः, अन्या च वसतिर्न रोचते वसतिमन्तरेण च **स्तेन**भयं वा **श्वापद**भयं वा, **मशका** वा **दुरध्यासाः**, **सीतं** वा दुरध्यासं पतति यथा उत्तरापथे **वर्षं** वा घनं निपतन् तिष्ठति, तत एतैः कारणैरदृष्टेप्यधिकृतवसतिस्वामिनि मा अन्ये पथिका कर्पटिका वा तिष्ठन्त्विति तथैव कायिक्यादिभूमीः प्रत्युपेक्ष्य पूर्वमवग्रहं गृहीत्वा पश्चाद्वसतिस्वामिनमनुज्ञापयन्ति ॥ ३५०५ ॥

गाथा ३५०४-३५१० कारणे पूर्वमग्रहः पाश्चाद् अनुज्ञापना

एतदेव सविशेषमाह—

**एएहिं कारणेहिं, पुव्वं पेहेत्तु दिट्ठऽणुण्णाए ।**
**ताहे अयंति दिट्ठे, इमा उ जयणा तहिं होइ ॥ ३५०६॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतैरनन्तरोदितैः **कारणैः पूर्व**मुच्चारादिभूमीः **प्रत्युपेक्ष्य दृष्टः** परिजनोऽ**नुज्ञाप्यते ततस्तस्यां** वसतौ **आयान्ति** साधवः, **तत्र दृष्टे** परिजने अनुज्ञाप्यमाने **इयं** वक्ष्यमाणा **यतना भवति** ॥ ३५०६ ॥

तामेवाह—

**पेहेत्तुच्चारभोमादी, ठायंती वोत्तुं परिजणं ।**
**अच्छामो जाव सो एइ, जातीहामो तमागयं ॥ ३५०७ ॥**

**प्रेक्ष्य** प्रत्युपेक्ष्य **उच्चारभूम्यादि परिजनमुक्त्वा** साधवस्तत्र **तिष्ठन्ति**। कथमुक्त्वेत्यत आह— **आस्महे** तावत् **यावत् स** गृहस्वामी **समागच्छति** ततस्त**मागतं याचिष्यामहे** ॥ ३५०७ ॥

स चागतो येन विधिना समनुज्ञापयितव्यस्तं विधिमाह—

**वयं वन्नं च नाऊण, वयंते वग्गुवादिणो ।**
**सभंडा वेयरे सेज्जं, [1]अफंदंति निरंतरं ॥ ३५०८ ॥**

---

१ अप्फंदंती ला. ॥



For Private and Personal Use Only

**वयो वर्णं च** गृहस्वामिनो [ज्ञात्वा] वल्गु शोभनं वदन्तीत्येवंशीला **वल्गुवादिनो** वसतिस्वामिनं वक्ष्यमाणं **वदन्ति, इतरे च सभाण्डाः** सोपकरणाः सन्तो **निरन्तरं वसतिमास्पन्दन्ते** व्याप्नुवन्ति ॥३५०८॥

कथं वदन्ति? इत्यत आह—

**अब्भासत्थं गंतूण, पुच्छए दूरपत्तिमा जयणा ।**
**तद्दिसमेंतपडिच्छण, पत्ते य कहेंति सब्भावं ॥ ३५०९ ॥**

यदि **अभ्यासस्थो** निकटवर्त्ती भवति तदा **गत्वा** वसतिस्वामिनं **पृच्छति,** अथ **दूरप्राप्त**स्तत्रेयं **यतना-तां दिशमागच्छतः प्रतीक्षणं** कर्त्तव्यं, **प्राप्ते च** तस्मिन् **सद्भावं कथयन्ति,** यथा'बहिः स्तेनादिभयात् युष्माकमुपाश्रये वयं स्थिताः' ॥ ३५०९॥

तथेदं वदन्ति—

**बिले व वसिउं नागा, पातो गच्छामो सज्जणा ।**
**निरत्थाणं बहिं दोसा, जाते मा होज्ज तुज्झवी ॥ ३५१०॥**

'अहो **सज्जन**! **बिले नागा इव** वयं युष्मदुपाश्रये उषित्वा **प्रातर्गच्छाम**' एवं याचितो यदि ददाति ततः सुन्दरमथ न ददाति तदाऽनुलोमेन वचसानुलोमयितव्यः, धर्मकथा तस्य कथ्यते, निमित्तादिकं वा प्रयुज्यते, तथाऽप्यददति परुषमपि वक्तव्यं, कथम्? इत्याह- **निरस्तानां** निष्काशितानामस्माकं ये स्तेन-मसक-श्वापदादिभिरुपधिशरीरमरण**दोषा** जायेरन् मा ते **तवाप्युपरि** पतेयुरिति ॥ ३५१० ॥

एतदेव सविस्तरमभिधित्सुराह—

**जइ देइ सुंदरं तू, अह उ वएज्जाहि नीह मज्झ गिहा ।**
**अन्नत्थ वसहि मग्गहा, तहियं अणुसट्ठिमादीणि ॥ ३५११ ॥**

**यदि** 'बिले व वसिउं नागा' इत्यादिभणनानन्तरं वसतिं **ददाति** ततः **सुन्दरम्, अथ वदेत्— 'मम गृहान्निर्गच्छताऽन्यत्र वसतिं याचध्व**मिति', तदा **तत्रानुशिष्ट्यादीनि** क्रियन्ते, अनुशिष्टिरनुशासनं क्रियते, आदिशब्दाद्धर्मकथा कथ्यते इति परिग्रहः॥ ३५११ ॥

**अणुलोमणं सजाती, सजातिमेवेति तह वि उ अठंते ।**
**अभियोगनिमित्तं वा, बंधणगोसे य ववहारो ॥ ३५१२ ॥**

तथा अनुलोमेन वचसा **अनुलोमनं** कर्त्तव्यम्, अथ तथापि न ददाति तर्हि '**सजातिः सजातिमनुकूलयतीति**' न्यायमङ्गीकृत्य ये तस्य स्वजना यानि च मित्राणि तैरनुलोमयितव्यः। **तथाप्यतिष्ठति अभियोगो** मन्त्रादिना कर्त्तव्यः, **निमित्तं वा** प्रयोक्तव्यं, **बन्धनं** वा सर्वैरपि साधुभिस्तस्य कर्त्तव्यं, ततः **प्रभाते व्यवहारः** कर्त्तव्यः ॥ ३५१२ ॥

**मा णे छिवसु भाणाइ, मा भिंदिस्ससि णेऽजया।**
**दुहतो मा य बोलेंति, थेरा वारेंति संजए ॥ ३५१३ ॥**

यदि साधूनां भाण्डकं बहिर्नेतुं व्यवसितस्तदा स भण्यते— '**मा नो**ऽस्माकं **भाजनानि स्पृश** हे! **अयत! मा** वा **नो**ऽस्माकं भाजनानि **भिन्द्धि**', यदि पुनस्तं संयता निर्द्धर्मादिवचोभिराक्रोशन्ति तदा **स्थविरा** आचार्याः **संयतान् वारयन्ति**–'**मा** आर्या! **द्विधातो बोलं** कार्षुः, एकां तावत् वसतिं प्रतिगृह्णीथ द्वितीयं परुषाणि भाषध्वे तस्मात् मा एवं भणत यत् करोति तत् क्षमध्वमिति'॥ ३५१३ ॥

**अहवा बेंति अम्हे ते, सहामो एस ते बली ।**
**न सहेज्जाऽवराहं, तेण होज्ज न ते खमं ॥ ३५१४ ॥**

**अथवा इदं ब्रुवते— वयं तवापराधं सहामहे एष पुनर्बलीयान्** तवापराधं **न सहेत,** असहिष्णुना च **तेन** यत् **क्रियते** तन्न **ते क्षमं** भवेत् ॥ ३५१४॥

एवमुक्तो यदि सोऽतिरोषेण न तिष्ठति निष्काशयति प्रहारैर्वा धावति तदा स बलीयान् यत् करोति तत् दर्शयति—

**सो य रुट्ठो व उट्ठित्ता, खंभं कुड्डं व कंपते ।**
**पुव्वं स नातिमित्तेहि, तं गमंति पहूण वा ॥ ३५१५॥**

**स** बलीयान् **रुष्ट इव** न तु परामर्शतो रुष्ट **उत्थाय स्तम्भं** वा **कुड्यं वा** मुष्टिप्रहारेण **कम्पयति** कम्पयंश्च ब्रूते—'एवं शिरः पातयिष्यामि यदि न स्थास्यसि', एतच्च पर्यन्ते उच्यते; अन्यथा **पूर्वमेव ज्ञातिभिर्मित्रैर्वा प्रभुणा तं गमयन्ति** तथाऽप्यतिष्ठत्यनन्तरोदितं क्रियते ॥३५१३ ॥

**सूत्रम्— निग्गंथस्स णं गाहावइकुलं पिंडवायपडियाए अणुपविट्ठस्स अहालहुसए**

उवगरणजाए परिब्भट्ठे सिया । तं च कोई साहम्मिए पासेज्जा, कप्पइ से सागारकडं गहाय जत्थेव अण्णमण्णं पासेज्जा तत्थेव एवं वएज्जा— "इमे भे अज्जा! किं परिण्णाए?" स य वएज्जा— "परिण्णाए" तस्सेव पडिणिज्जाएयव्वे सिया।

से य वएज्जा— "नो परिण्णाए" तं नो अप्पणा परिभुंजेज्जा नो अण्णमण्णस्स दावए, एगंते बहुफासुए थंडिले परिट्ठवेयव्वे सिया ॥ १३ ॥

निग्गंथस्स णं बहिया विचारभूमिं वा, विहारभूमिं वा निक्खंतस्स अहालहुसए उवगरणजाए परिब्भट्ठे सिया ।

तं च केइ साहम्मिए पासेज्जा, कप्पइ से सागारकडं गहाय जत्थेव अण्णमण्णं पासेज्जा, तत्थेव एवं वएज्जा— "इमे भे अज्जा! परिण्णाए?" से य वएज्जा— "परिण्णाए" तस्सेव पडिणिज्जाएयव्वे सिया।

से य वएज्जा— "नो परिण्णाए" तं नो अप्पणा परिभुंजेज्जा, नो अण्णमण्णस्स दावए, एगंते बहुफासुए थंडिले परिट्ठवेयव्वे सिया ॥ १४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निग्गंथस्स णं गामाणुगामं दूइज्जमाणस्स अण्णयरे उवगरणजाए परिब्भट्ठे सिया ।**

**तं च केई साहम्मिए पासेज्जा, कप्पइ से सागारकडं गहाय दूरमवि अद्धाणं परिवहित्तए, जत्थेव अण्णमण्णं पासेज्ज तत्थेव एवं वएज्जा—**

**"इमे भे अज्जा । किं परिण्णाए ?"**

**से य वएज्जा— "परिण्णाए" तस्सेव पडिणिज्जाएयव्वे सिया।**

**से य वएज्जा—"नो परिण्णाए" तं नो अप्पणा परिभुंजेज्जा, नो अण्णमण्णस्स दावए, एगंते बहुफासुए थंडिले परिट्ठवेयव्वे सिया ॥ १५ ॥**

'निग्गंथस्स णं गाहावतिकुलमि'त्यादि सूत्रत्रयम्, अस्य सम्बन्धमाह—

**गहित[1]ऽन्न रक्खणट्ठा, वइसुत्तमिणं समासतो भणियं ।**
**उवहीसुत्ता उ इमे, साहम्मियतेणरक्खट्ठा[2] ॥ ३५१६ ॥**

**अन्य**कार्पटिकादि**रक्षणार्थं गृहीते**ऽवग्रहे **वाक्सूत्रमिदम**नन्तरं **समासतो भणितम्, इमानि** च **पुनरुपधिसूत्राणि साधर्मिकस्तेनरक्षणार्थ**मुपन्यस्तानीत्येष सूत्रसम्बन्धः ॥ ३५१६ ॥ अनेन

१. गहिएण र॰ पु.पे.॥ २. रक्खणट्ठा - पु. प्रे.॥



For Private and Personal Use Only

सम्बन्धेनायातस्यास्य व्याख्या—

**निर्ग्रन्थस्य ण**मिति वाक्यालङ्कारे **गृहपतिकुलं पिंडवायपडियाए** इति पिण्डं भक्तं पानं वा पातयिष्यामीति बुद्ध्या, यथा— महाराष्ट्रं[1] सुत्तं पाडेउं निग्गतो आनेष्यामीति बुद्ध्या निर्गत इत्यर्थः, **अनुप्रविष्टस्य यथालघुस्वक**मेकान्तलघुकं जघन्यं मध्यमं वा इत्यर्थः। **तमुपकरणजातं परिभ्रष्टं** पतितं **स्यात्, तच्च कश्चित् साधर्मिकः पश्येत् कल्पते से** तस्य **सागारकृतं** नाम यस्यैवेदमुपकरणं तस्यैवेदं देयमिति बुद्ध्या **गृहीत्वा यत्रैवान्यमन्यं** साधर्मिकं **पश्येत् तत्रैव एवं वदेत्– 'इदं भो आर्य ! किं परिज्ञातं ?' स च यदि वदेत् 'परिज्ञातं'** ततस्त**स्यैव प्रतिनिर्यातव्यं** समर्पणीयं **स्यात्**। किमुक्तं भवति ? यदि तस्य सत्कं तर्हि तस्मै दीयते, अथ ब्रूयादमुकस्य सत्कं तदा तस्येति, **स च वदेत् न परिज्ञातं** न कोऽपि तज्जानातीति भावः, तर्हि **तन्नात्मना परिभुञ्जीत न अन्यस्यान्यं दर्शयेत्** किन्त्वे**कान्ते बहुप्रासुके स्थण्डिले परिष्ठापयितव्यं स्यात्** ।

**एवं निग्गंथस्स णं बहिया विचारभूमिं वा विहारभूमिं** वा **निक्खंतस्से**त्याद्यपि सूत्रं भावनीयम्। तथा **निर्ग्रन्थस्य णमिति** प्राग्वत् **गामाणुगामं दूइज्जमाणस्से**ति विहरतोऽन्यतरत्

१. महा–पु. प्रे. नास्ति॥

उपकरणजातं परिभ्रष्टं स्यात् तच्च कश्चित् साधर्मिकः पश्येत् , **कल्पते से तस्य सागारकृतं गृहीत्वा दूरमप्यध्वानं परिवोढुं जत्थेवे**त्यादि प्रागवत्। एष सूत्रत्रयसङ्क्षेपार्थः ॥

सम्प्रति भाष्यकृत् यथालघुस्वकग्रहणं तृतीयसूत्रगतमन्यतरग्रहणं च व्याख्यानयति—

**दुविहो य अहालहुसो, जहन्नतो मज्झिमो य उवही उ ।**
**अन्नयरग्गहणेण उ, घेप्पइ तिविहो उ उवही उ ॥ ३५१७॥**

**यथालघुस्वक उपधिर्द्विविधो** भवति— **जघन्यो मध्यमश्च, अन्यतरग्रहणेन तु त्रिविधोप्युपधिः परिगृह्यन्ते** ॥ ३५१७॥

तदेवं कृता विषमपदव्याख्या भाष्यकृता, सम्प्रति निर्युक्तिविस्तरः—

**अंतो परिट्ठावंते, बहिया व विचारमादिसु लहुगो ।**
**अन्नयरं उवगरणं, दिट्ठं संका न घेच्छंति ॥ ३५१८॥**

**किं होज्ज परिट्ठवियं, पम्हुट्ठं वा वि तो न गिण्हंति ।**
**किं एयस्सन्नस्स व, संकिज्जइ गिण्हमाणो वि ॥ ३५१९॥**

अन्तर्ग्रामादीनां मध्ये **बहिर्विचारभूमौ** विहारभूमौ वा **परिष्ठापयति**[1] विस्मरति "**पम्हुट्ठं ति वा परिट्ठवियं ति वा एगट्ठमिति**" वचनात् , प्रायश्चित्तं लघुको मासः। कस्मादीदृशं प्रमादं करोतीति हेतोः, कः पुनर्दोषो यदि विस्मृतम्? अत आह–**अन्यतरत्** जघन्यं मध्यममुत्कृष्टं वा **उपकरणं दृष्टं** ततो जाता **शङ्का,** शङ्कातश्च **न** केचनापि **ग्रहीष्यन्ति**। शङ्कामेव स्पष्टतरां भावयति— किं **होज्जे**त्यादि, साधवस्तदन्यतरद् उपकरणमन्तर्बहिर्वा दृष्ट्वा शङ्कन्ते–**किमेतत् परिष्ठापितमुत** कस्यापि **विस्मृतं भवेत्**? एवं शङ्कमानास्तदुपकरणं विस्मृतं **न गृह्णन्ति,** यतो **गृह्णन्नपि** जनैः **शङ्क्यते,** तथाहि— तत् पतितं गृह्णन्तं संयतं कोऽपि दृष्ट्वा शङ्केत–**किमेतस्य अन्यस्य वा?** किमुक्तं भवति? किमात्मीयं पतितं गृह्णाति किं वा परकीयं कस्य अपि दानार्थम्? एवं शङ्कासम्भवे तस्य प्रायश्चित्तं चत्वारो लघुकाः, अथ निःशङ्कितं परेषां स्यात् तदा चतुर्गुरुकम्। एवं शङ्कासम्भवतो न गृह्णन्ति ॥ ३५१८॥ ३५१९॥

तस्मिंश्चागृह्यमाणे इमे दोषाः—

**थिग्गलधुत्ता पोत्ते, बालगचीराइएहिं अहिगरणं ।**
**बहुदोसतमा कप्पा, परिहाणी जा विणा तं च ॥ ३५२०॥**

१. परिस्थाप॰ पु. प्रे.। एवमन्यत्रापि अनेकस्थानेषु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत् पतितं यथालघुस्वकमुपकरणं गृहस्थैर्दृष्टं ततस्ते तद् गृहीत्वा अन्यस्य छिद्रवतो वस्त्रस्य **थिग्गलकं** कुर्वन्ति, तथा **प्रक्षाल्य पोतकानि** वहिकापट्टादिरूपाणि कुर्युः, यदि वा उत्तानशायिनां **बालकानां** योग्यानि **चीवराणि** विदधीरन्। इत्येवमादिभिः प्रकारैर्यथालघुस्वक-स्योप-करणस्याऽग्रहणे अधिकरणम्। यदा तु पतिताः **कल्पा** न गृह्यन्ते तदा ते **बहुदोषतमाः** प्रभूततमं तेष्वधिकरणमिति भावः। **तच्च** उपकरणं **विना** अन्यदुपकरणं याचमानस्य **परिहानिः** सूत्रार्थयोः, ये च तृणग्रहणाग्निसेवनादयो दोषास्तेऽपि प्रसजन्ति ॥ ३५२० ॥

**एते अन्ने य बहू, जम्हा दोसा तहिं पसज्जंती ।**

**आसन्ने वा अंतो वा, तम्हा उवहिं न वोसिरिए ॥ ३५२१ ॥**

**एते** अनन्तरोदिता **अन्ये च यस्माद्बहवो दोषास्तत्र** पतिते **प्रसजन्ति** तस्मात् ग्रामादीनां बहिरासन्ने प्रदेशे **अन्तर्वा उपधिं न व्युत्सृजेत्** न विस्मरणतः पातयेत् ॥ ३५२१ ॥

अधुना यः शङ्कातः शङ्क्यमानो न गृह्णाति तं प्रत्युपदेशमाह—



---

१. °पटादि° सं. ॥

For Private and Personal Use Only

**निस्संकियं तु नाउं, विच्चुयमेयं तु ताहे घेत्तव्वं ।**
**संकादिदोसविजढा, नाउं वप्पंति जस्स तयं ॥ ३५२२ ॥**

यदा **एतत्** उपकरणं कस्यापि **विच्युतं** विस्मरणतः पतितमिति **निःशङ्कितं ज्ञातं** भवति **तदा** नियमतो **ग्रहीतव्यं,** गृहीत्वा च **शङ्कादिदोषरहिता** मा मम विषये कस्यापि शङ्का स्यादित्यादि दोषवर्जिता **यस्य तत्** उपकरणं तस्य **ज्ञात्वा समर्पयन्ति** ॥ ३५२२ ॥

एतच्च यद्विषये कर्त्तव्यं तानाह—

**समणुण्णेयराणं, वासंजती संजयाण वा ।**
**इयरे उ [1] अणुवदेसो, गहियं पुण घेप्पए तेहिं ॥ ३५२३ ॥**

**समनोज्ञानां** साम्भोगिकीनाम् **इतरासाम**साम्भोगिकीनां संविग्नानां **संयतीनां संयतानां वा** सत्कमुपकरणं पतितं गृहीत्वा यस्य सत्कं तस्य दातव्यं, ये तु **इतरे** पार्श्वस्थादय-स्तेषामयमनुपदेशः, तेषां सत्कं पतितं गृहीत्वा यस्य सत्कं तस्मै देयमिति **नाऽस्माकमुपदेशो**-

१ **अणुण्णव° सं ॥**

ऽधिकरणप्रवृत्तेः, **तैः** पुनः पार्श्वस्थादिभिः संविग्नानां विहारिणामेतदुपकरणमिति ज्ञात्वा यत् पतितं **गृहीतं** तदानीतं **पुनर्गृह्यते** ॥ ३५२३ ॥

अत्रैव द्वितीयपदमाह—

**बिइयपदे न गेण्हेज्जा, विविंचियदुगुंछिए असंविग्गे ।**
**तुच्छमपयोयणं वा, अगेण्हता होयऽपच्छित्ती ॥ ३५२४ ॥**

**द्वितीयपदे** अपवादपदे **न गृह्णीयात्** पतितं **विविञ्चितं** परिष्ठापितमिति कृत्वा **जुगुप्सित**मशुचिस्थानपतितम् **असंविग्नानां** वा एतदुपकरणमिति ज्ञात्वा, तथा **तुच्छं** मुखपोतिकादि तदपि कुथितत्वादिना कारणेन **अप्रयोजनमगृह्णतो( न् )भवत्यप्रायश्चित्ती** ॥ ३५२४ ॥

साम्प्रतमेनामेव गाथां विवृणोति—

**अंतो विसगलजुण्णं, विविचियं तं च दट्ठु नो गेण्हे ।**
**असुइट्ठाणे वि चुतं, बहुधा वालादिछिन्नं वा ॥ ३५२५ ॥**

अन्तर्ग्रामादीनां मध्ये **विसकलं** खण्डाखण्डीकृतं **जीर्णं विवेचितं** परिष्ठापितमिति ज्ञातव्यं **तच्च दृष्ट्वा न गृह्णीयात्**, तथा **अशुचिस्थानेपि च्युतं बहुधा वा व्यालादिभिः** श्वप्रभृतिभिः

**छिन्नं** न गृह्णीयात् ॥ ३५२५ ॥

**हीणाहियप्पमाणं, सिव्वणिचित्तल विरंगभंगी वा ।**
**एएहि असंविग्गोवहित्ति दट्ठुं विवज्जंती ॥ ३५२६ ॥**

**हीनाधिकप्रमाणं** नाऽऽगमोक्तप्रमाणोपपन्नं तथा **सीवनिकया चित्रलं**-चित्रं च तत् सीवनिकाचित्रलम्। तथा विविधरङ्गेन-रागद्रव्येण भङ्गिः-विच्छित्तिर्यत्र तद् **विरङ्गभङ्गि**, तद्वा दृष्ट्वा, **एतैः** कारणैरय**मसंविग्नानामुपधिरिति ज्ञात्वा विवर्जयन्ति** ॥ ३५२६ ॥

**एमेव य बीयपदे, अंतो उ परिठविज्जइ इमेहिं ।**
**तुच्छो अतिजुण्णो वा, सुन्ने वावी विविंचिज्जा ॥ ३५२७ ॥**

**एवमेव** अनेनैव प्रकारेण **एभिर्वक्ष्यमाणैः** कारणैर्ग्रामादीना**मन्तर्द्वितीयपदेन परिष्ठापयेत्** पतितं न गृह्णीयात् , कैः ? इत्याह—**तुच्छः** मुखपोत्तिका-पादप्रोञ्छनादिकः कुथितत्वादिना अकिञ्चित्करः, यदि वा अतिजीर्णो हस्तेन गृह्यमाणोऽनेकधा विशरारु जायते, शून्ये वा विविक्ते प्रदेशे पतितो यत्र विस्मरणासम्भवः। ततः एतैः कारणैः परिष्ठापित एष उपधिरिति कृत्वा **विविच्याद्** न गृह्णीयादिति भावः ॥ ३५२७ ॥



For Private and Personal Use Only

**एमेव य बहिया वी, वियारभूमीए होज्ज पडियं तु ।**
**तस्स वि एसेव गमो, होइ य नेयो निरवसेसो ॥ ३५२८ ॥**

**एवमेव** अनेनैव प्रकारेण ग्रामादीनां **बहिरपि विचारभूमौ पतितं भवेत् तस्याप्येष एवाऽनन्तरोदितो गमः** प्रकारो **निरवशेषो ज्ञेयो** ज्ञातव्यो भवति ॥ ३५२८ ॥

तदेवं सूत्रद्वयं भावितमधुना तृतीयसूत्रभावनार्थमाह—

**गामो खलु पुव्वुत्तो, दुइज्जंते उ दोन्नि उ विहाणा ।**
**अन्नतरग्गहणेणं, दुविहो तिविहो व उवही उ ॥ ३५२९ ॥**

**ग्रामः खलु पूर्वमुक्त**स्तस्मादनुकूलोऽन्यो ग्रामोऽनुग्रामो ग्रामश्चानुग्रामश्च ग्रामानुग्रामं समाहारत्वादेकवचनम्, तद् **दूयमानस्य** गच्छतः तस्मिन् गच्छति **द्वे विधाने** 'ऋतुबद्धे काले गन्तव्यम् तथा पादाभ्यामिति' आभ्यां द्वाभ्यां प्रख्या ॥ ३५२९ ॥

सम्प्रति **निर्युक्तिविस्तरः**—

**पंथे उवस्सए वा, पासवणुच्चारमाइयंते वा ।**
**पम्हुसती एएहिं, तम्हा मोत्तूणिमे ठाणे ॥ ३५३०॥**

ततः उपकरणं **पथि** व्रजतः कथमपि पतेत् , ग्रामानुग्रामं वा गच्छन् **यत्रोपाश्रये** उषितस्तत्र विस्मरणतः पतितं भवेत्, विश्राम्यतो वा क्वचित् पतितं स्यात्, **उच्चारं प्रश्रवणं** वा कुर्वतः स्यात् पतितम्, आचमतो वा विस्मृतम्, **एतैः** कारणै**र्विस्मरणतः** पतनसम्भवः,**ततो** येषु स्थानेषु विश्राम्यत उच्चारं प्रश्रवणं वा कुर्वतो दोषा भवन्ति ता**नीमानि स्थानानि वर्जयेत्** ॥ ३५३०॥

तान्येवाह—

**पंथे वीसमण-निवेसणादि सो मासो होति लहुओ उ ।**
**आगंतर संठाणे, लहुगा आणादिगा दोसा ॥ ३५३१॥**

**पथि** यदि **विश्राम्यति निविशति** वा, **आदि**शब्दादूर्ध्वस्थितो वा तिष्ठति, सुप्तो वा, उच्चारं प्रश्रवणं वा व्युत्सृजति, तदा सर्वत्र असामाचारीनिष्पन्नं प्रायश्चित्तं **मासलघु** । यदि

पुनरागन्तृणां **स्थाने** सभादौ विश्रामणादि करोति तदा सर्वत्र प्रत्येकं प्रत्येकं चत्वारो **लघुकाः**, **आज्ञादयश्च दोषाः** ॥ ३५३१ ॥

सम्प्रति पथि विश्रामणादौ दोषानाह—

**मिच्छत्त१ अन्नपंथे२, धूली उक्खिणण३ उवहिणो विणासो४ ।**
**ते चेव य सविसेसा, संकादि विविंचमाणे वी ॥ ३५३२ ॥** दारगाहा।

स साधुः पथि विश्राम्यति धिग्जातीयाश्चान्ये जातिमदावलिप्तास्तेन पथा समागता भवेयुः, ततः स साधुश्चिन्तयेद्–मा मन्निमित्तमेते उद्वर्त्तमाना हरितकायादिविराधनां कार्षुरिति स साधुः पथ उत्थाय अन्यत्र तिष्ठेत् तत्र च इमे दोषा 'जानन्त्येते श्रमणवादिनः आत्मनः सारमतोऽयमस्मान् दृष्ट्वा उद्वृत्त' इति। तथा साधुना धिग्जातीयानां पथो दत्त तत एतेषामपि गुरवो धिग्जातीयाः प्रधानाश्च। एतच्चाऽभिनवधर्माणः श्रुत्वा दृष्ट्वा वा **मिथ्यात्वं** गच्छेयुः, ये च मिथ्यादृष्टयस्ते गाढतरं मिथ्यात्वं प्रतिपद्येरन्। तथा **अन्नपंथेत्ति** तं साधुं पथि स्थितं दृष्ट्वा पथिका उद्वृत्य व्रजन्ति, ते चोद्वर्त्तमाना हरितकायादीनां विराधनां कुर्वन्ति । तथा केचित् तं पथि स्थितं दृष्ट्वा ब्रुवते–'अहो! निर्लज्जः श्रमणः पन्थानं रुद्ध्वा स्थितः'। तच्च श्रुत्वा कोऽप्यसहनः कलहं कुर्यात्, ततो युद्धे समापतिते भाजनभेदोऽनागाढादिपरितापना च स्यात् । तथा पादनिक्षेपेण

**धूल्या उत्खननं** भवति तेन च **उपधेर्विनाशो** मलिनत्वभावात्। **ते एवा**नन्तरोदिता दोषाः **सविशेषा शङ्कादयो विविञ्चत्यपि** उच्चारादि त्यजत्यपि । तथाहि-उच्चारादि पथि कुर्वतो लोकस्य शङ्कोपजायते किमनेन गुदं निर्लेपितमुत न? इति आदिशब्दात् किमेष स्तेनकः किंवा श्रमणोऽभिचारको हेरिको वा इत्यादिपरिग्रहः। एष द्वारगाथासङ्क्षेपार्थः ॥ ३५३२॥

साम्प्रतमेनामेव गाथां विवरीषुः प्रथमतो मिथ्यात्वद्वारं विवृणोति—

**पंथे न ठाइयव्वं, बहवे दोसा तहिं पसज्जंति ।**
**अब्भुट्ठिता त्ति गुरुगा, जं वा आवज्जई जत्तो ॥ ३५३३ ॥**

**पथि** साधुना विश्रमणनिमित्तं **न स्थातव्यं**, यतस्तत्र **बहवो दोषाः प्रसजन्ति**। तानेवाह-साधुना धिग्जातीयानां पथि प्रदत्ते **अभ्युत्थिता** एते अभ्युत्थानमेतेषां कृतमिति लोकप्रतिपत्तौ तस्य प्रायश्चित्तं चत्वारो **गुरुकाः**, **यच्च** स्वयं[१] दृष्ट्वा **यतो** वा श्रुत्वा मिथ्यात्व**मापद्यते** अभिनवधर्मा मिथ्यादृष्टिर्वा गाढतरं मिथ्यात्वमधिगच्छति तन्निष्पन्नं च तस्य प्रायश्चित्तं, धिक्जातीयानां चाऽऽत्मबहुमानसम्भवः॥ ३५३३॥



---

१. °त्वमाग° सां॥

तथा चाह—

**जाणंति अप्पणो सारं, एए समणवादिणो ।**
**सारमेएसि लोगोऽयं, अप्पणो न वियाणई ॥ ३५३४॥** दारं १।

ये आत्मानं **श्रमणमिति वदन्ति** ते **आत्मनः सारं** परमार्थतत्त्वं **जानन्ति** यथा अस्मभ्यम**एते** गरीयांस इति, **यस्त्वेतेषामयं लोकः** स **सार**मर्थतत्त्व**मात्मनो न विजानाति** अविदितपरमार्थत्वात्॥ ३५३४॥

गतं मिथ्यात्वद्वारमधुना अन्यपथद्वारमाह—

**अण्णपहेण वयंते, काया सो चेव वा भवे पंथो ।**
**अचियत्तऽसंखडादी, भाणाईविराहणा चेव ॥ ३५३५ ॥** दारं २।

तं साधुं पथि स्थितं दृष्ट्वा पान्था **अन्येन पथा व्रजन्ति** तथा च सति **काया** हरितकायादयो विराध्यन्ते, तथा **स एव [ वा ]भवति पन्था**स्ततो महान् प्रवर्त्तनादोषः। तथा पथि स्थितं दृष्ट्वा कस्यापि **अचियत्तम्** अप्रीतिरुपजायते ततः स ब्रूते-'अहो मुण्डः पन्थानं रुद्ध्वा स्थितः'। तत् श्रुत्वा कोऽप्यसहनो**ऽसंखडं** कलहं कुर्यात्, **आदि**शब्दात् युद्धमपि तथा च

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सति **भाजनविराधना, आदि**शब्दादनागाढादिपरितापना भवति शरीरविराधना **च**॥ ३५३५॥
सम्प्रति 'धूली उक्खणण उवहिणो विणासो इति' व्याख्यानयति—

**सरक्खधूली चेयण्णे पत्थिवाणं विणासणा ।**
**अचित्तरेणुमइलम्मि, दोसा धुव्वणऽधोव्वणे ॥ ३५३६ ॥** दारं ३-४।

सह रजसा श्लक्ष्णधूलिरूपेण वर्त्तते इति **सरजस्का** सा चासौ **धूलि**श्च, तस्या**श्चैतन्यो**ऽस्यां चेतनायामित्यर्थः, पादनिक्षेपेण उत्खनने शरीरादिसंस्पर्शतः **पार्थिवानां** पृथिवीकायानां **विनाशनं** भवेत्। अथ सो **अचित्तो रेणु**स्तर्हि तेनाऽचित्तेन रेणुना **मलिने** उपधौ यदि **प्रक्षालयति** तथापि दोषाः प्राणविराधनापत्तेर्बकुशत्वसम्भवाच्च, **अप्रक्षालने**ऽपि दोषाः प्रवचनहीलनाद्यापत्तेः॥ ३५३६॥

अन्यच्च—

**वेगाविद्धा तुरंगादी, सहसा दुक्खनिग्गहा ।**
**परंमुहं मुहं किच्चा, पंता ठाणं पणोल्लए ॥ ३५३७॥**

**वेगाविद्धा** वेगेनाऽऽगच्छन्तस्तुरङ्गादयः, आदिशब्दाद्बलीवर्दादिपरिग्रहः, **सहसा** दुःखेन निगृह्यन्ते निवार्यन्ते इति **दुःखनिग्रहाः**, निवारयितुमशक्या इति भावः। ततः शरीरविराधना



For Private and Personal Use Only

भाजनविराधना च। तथा केचित् **प्रान्ताः पराङ्मुखं मुखं कृत्वा** तं पथि स्थितं साधुं **प्रणुदेयुः**, गाथायामेकवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययोऽपि भवति ॥ ३५३७॥

किञ्च—

**पम्हुट्ठमवि अन्नत्था, जइच्छा कोवि पेच्छती ।**
**पंथे उवरि पम्हुट्ठं, सेप्पं गेण्हंति अद्धगा ॥ ३५३८ ॥**

पथोऽन्यत्र **विस्मरणतः** पतितमपि **यदृच्छया** यदि कथमपि **कोऽपि प्रेक्षते, पथि पुनः परिभ्रष्टं क्षिप्रमध्वगा गृह्णन्ति,** तस्मात् पथि न विश्रमितव्यम् ॥ ३५३८॥

**एवं ठितोवविट्ठे, सविसेसतरा भवंति उ निवण्णे ।**
**दोसा निद्दपमायं, गते य उवहिं हरंतऽण्णे ॥ ३५३९ ॥**

**एवममुना** प्रकारेण **स्थिते** ऊर्ध्वस्थानेनाऽवतिष्ठमाने तथा **उपविष्टे** दोषा वक्तव्याः, **निवण्णे** शयाने **सविशेषतरा दोषा भवन्ति**। तथाहि-पूर्वोक्तास्तावत् तथैव द्रष्टव्याः, अन्यच्च शयाने कथमपि **निद्राप्रमादं गते उपधिमन्ये** पथिकादयो **हरन्ति,** तस्मात् पथि न

शयितव्यमिति॥ ३५३९॥

सम्प्रति 'ते चेव य सविसेसा संकादिविविंचमाणे वी 'इत्येतद्व्याख्यानार्थमाह—

**उच्चारं पासवणं, अणुपथे चेव आयरंतस्स ।**
**लहुगो य होइ मासो, चाउम्मासो[1] सवित्थारो ॥ ३५४० ॥**

**उच्चारं प्रश्रवणं** वा अध्वगानाम**नुकूले पथि आचरतो**ऽसामाचारीनिष्पन्नं प्रायश्चित्तं **लघुको भवति मासः**। अथ तं तथोच्चारं प्रश्रवणं वा कुर्वन्तमवलोक्य केचिदन्यं पन्थानं कुर्वन्ति तदा **चत्वारो मासा** लघुकाः। **सवित्थारो** त्ति यच्च स्त्र्यादिभिः सह सङ्घट्टनादि प्राप्नोति तन्निष्पन्नमपि तस्य प्रायश्चित्तमिति भावः॥ ३५४०॥

तथा—

**छड्डावणमन्नपहो, दवाऽसती दुब्भिगंध कलुसप्पो ।**
**तेणो त्ति व संकेज्जा, आदियणे चेव उड्डाहो ॥ ३५४१ ॥**

---

१. स चाउम्मासाइ वित्थारो-सं.॥

कोऽपि सखरो राजकुलमान्यः प्रान्तः प्रश्रवणमुच्चारं पथि कुर्वन्तं दृष्ट्वा कोपात् तमेव श्रमणमास्कन्द्य तमुच्चारं **छर्दापयेत्,** अपरैरन्यपन्था क्रियते, तत्र चोक्तं प्रायश्चित्तम्। तथा पथि **द्रवाऽभावे दुरभिगन्ध** उच्छलेत् तत्रापि प्रवचनोड्डाहः। तथा कोऽपि **कलुषात्मा शङ्केत स्तेनक इति,** उपलक्षणमेतत् हेरिको अभिचारको वा इत्यपि शङ्केत । तत **आदाने** ग्रहणे प्रवचनस्य **उड्डाहः**। तस्मात् पथि विश्रामणादि न कर्त्तव्यम् ॥ ३५४१॥

अत्रैवापवादमाह—

**अच्चायवदूरपहे, असहू भारेण खेदियप्पा वा ।**

**छन्ने वा मोत्तु पहं, गामसमीवे य छन्ने वा ॥ ३५४२॥**



**अतिशयेनाऽऽतप** उष्णं पतति वृक्षाश्च **पथो दुरे** वर्त्तन्ते [१]यथा सन्नपल्लीमार्गं प्रतिपन्नानामेक एवाऽध्वनि विश्रमणयोग्यो वृक्षः, एवमधिकृतेऽप्यध्वनि विश्रमणहेतुरेक एव वृक्षोऽन्यत्र सर्वमाकाशं, तेन कारणेन पथ्यपि वृक्षस्याधस्तात् विश्राम्येत। **असहो** नाम नातिदूरे वृक्षाः सन्ति परं तत्र गन्तुं न शक्नोति ततः सोऽपि पथि वृक्षस्याधो विश्रामणं कुर्यात् । **अथवा** उपधि**भारेण खेदितात्मा** अतिशयेन परिश्रान्तस्ततः पथ उद्वर्त्तितुं न शक्नोतीति पथ्येव

**१. यथा सणपल्ली॰ पु. प्रे. मु.॥**

विश्राम्यति। तदेवं पथ उभयोः पार्श्वयोर्दूरेण वृक्षसम्भवे द्वितीयपदमुक्तम् । इदानीं समन्ततो वृक्षछन्ने प्रतिपादयति-**छन्ने वा मोत्तु पह**मिति, यत्र पन्था उभयोः पार्श्वयोः वृक्षैश्छन्नस्तत्र, वा विभाषायां, यदि निर्भयं ततः पन्थानं मुक्त्वाऽन्यत्र विश्रामणादि करोति । अथ भयं तदा पथ्येवेति। एतद्दूरेऽभिहितं, **ग्रामसमीपे** पुनर्निर्भयमिति वृक्ष**छन्ने** वा पथि पथ उद्वृत्य विश्रामणादि करोति ग्रामसमीपे यस्य तस्य वृक्षदेवकुलादेः छायासम्भवात् ॥ ३५४२॥

तेन पुनः साधुना पथः कियद्दूरे उद्वर्त्तितव्यम्? अत आह—

**पंथे ठितो न पेच्छति, परिहरिया पुव्ववन्निया दोसा ।**
**बिइयपए असतीए, जयणाए चिट्ठणादीणि ॥ ३५४३॥**

तावति दूरे उद्वृत्य स्थातव्यं यत्र पथिकः पथा व्रजन् **पथि** ऊर्ध्वं **स्थितो** वा साधुमुद्वृत्तं **न पश्यति**। एवं च **पूर्ववर्णिता दोषाः** समस्ता अपि **परिहृताः**। **द्वितीयपदे** अपवादपदे पुनरुद्वर्त्तने **असति** उद्वर्त्तनाभावे पथ्यपि **यतनया** वक्ष्यमाणया **स्थानादीनि** करोति, स च तथा कुर्वन् तीर्थकराज्ञाया[१] प्रवृत्तेः शुद्ध इति ॥ ३५४३॥

गाथा ३५४२-३५४७ अपवादे पथि विश्रामणादिः यतना च



---

१. °राज्ञया-पु. प्रे. मु.॥

साम्प्रतमुद्वर्त्तनाभावं यतनां चाह—

**संकट्ठहरियछाया, असती गहितोवही ठितो उड्ढे[1] ।**

**उट्ठेइ व अप्पत्ते, सहसा पत्ते ततो पट्ठिं ॥ ३५४४॥**

**संकष्टो** नाम पन्था स उच्यते यो वाट्योरपान्तराले, तत्रोद्वर्त्तनस्यासम्भवः अथवा चतसृष्वपि दिक्षु समन्ततो **हरित**कायः, अथवा पन्थानमतिरिच्याऽन्यत्र सर्वथा **छाया न विद्यते,** ततः एतैः कारणैरुद्वर्त्तनाऽसम्भवे पथ्येव **गृहीतोपधिः** गृहीतोपकरणो मुहूर्त्तमात्र**मूर्द्ध्वस्थितो** मार्ग एव छायायां विश्राम्येत् । यदा तु पथिकानागच्छतः पश्यति तदा तेषु तं प्रदेश**मप्राप्ते**ष्वेव **उत्तिष्ठति** यथा ते जानन्ति पूर्वमेव उत्थित इति। अथ **सहसै**व ते पथिका अदृष्टा एव **संप्राप्तास्तदा** तेषां **पृष्टं** दत्त्वा उत्तिष्ठति यथा ते जानन्ति यथैष आत्मव्यापारेणोत्थित इति एवं मिथ्यात्वादिदोषाः परिहृता भवन्ति ॥ ३५४४॥

**भुंजणपियणुच्चारे, जयणं तत्थ कुव्वती ।**

**उदाहडा उ जे दोसा, पुव्वं तेसु जतो भवे ॥ ३५४५॥**

गाथा ३५४२-३५४७ अपवादे पथि विश्रामणादिः यतना च



---

१. अत्थे-पु. प्रे. मु.॥

भोजने पाने उच्चारे च यतनां तत्र पथि करोति। कथम्? इत्याह-उदाहृता ये पूर्वं दोषास्तेषु यतो भवेत् यथा ते न भवन्ति तथा यतेतेति भावः ॥ ३५४५॥

**गंतव्व पलोएउं, अकरण लहुतो य दोस आणादी ।**
**पम्हुट्ठे वोसट्ठे, लहुतो आणादिणो चेव ॥ ३५४६॥**

विश्रम्य उच्चारं प्रश्रवणं वा कृत्वा यदा गन्तव्यं भवति तदा सिंहावलोकनेन पश्चादवलोक्य गन्तव्यं, यदि पुनरवलोकनं न करोति तदा प्रायश्चित्तं तस्य लघुको मासः। अधिकरणदोषाश्च प्रागुक्ताः। कथमपि विस्मरणतः पतिते सम्भवन्ति आज्ञादयश्च आज्ञाभङ्गादयश्च दोषाः। तथा यदि कथमपि विस्मरणतः पतितं स्यात् ततस्तद्ग्रहणाय प्रतिनिवर्तितव्यम् । यदि मन्यते किं तेनेति व्युत्सृजति तदा मासलघुकम् आज्ञाभङ्गादयश्च दोषाः॥ ३५४६॥

एतदेवाह—

**पम्हुट्ठे गंतव्वं, अगमणे लहुगो य दोस आणादी ।**
**निक्कारणम्मि तिन्नि, उ पोरिसी कारणे सुद्धो ॥ ३५४७॥**

**पम्हुट्ठे** कथमपि विस्मरणतः पतिते सिंहावलोकनेन च दृष्टे नियमतस्तदानयनाय पश्चात् **गन्तव्यम्, अगमने** प्रायश्चित्तं **लघुको** मासः अधिकरण**दोषाश्च** प्रागुक्ता **आज्ञादय**श्च। तथा **निष्कारणमिति** कारणस्याऽभावो निष्कारणं, तस्मिन्, यदि नास्ति निवर्त्तमानस्य प्रत्यवाय इत्यर्थः, तदा अवश्यं निवर्त्तितव्यं, **तिन्नि उत्ति**, यदि प्रथमायां **पौरुष्यां** विस्मरणतः पतितं चरमायां च पौरुष्या स्मृतं तत्र यदि निष्प्रत्यवायमन्तरा च वासोऽस्ति तदा निवृत्त्य गृहीत्वा आनेतव्यम्। अथ सूर्यास्तसमयवेलायां स्मृतं यथा अमुकं मे विस्मरणतः पतितमिति तदा आद्यान् त्रीन् यामान् उषित्वा चतुर्थे यामे प्रतिनिवृत्त्यानेतव्यं प्रत्यवायाभावे। **कारणे** तु प्रत्यवायलक्षणे अनिवर्त्तमानोऽपि **संशुद्धः**॥ ३५४७॥

एतदेव भावयति—

**चरमाए वि नियत्तइ, जइ वासो अत्थि अंतरा वसिमे ।**
**तिन्नि व जामे वसिउं, नियत्तई निरच्चाए चरमे ॥ ३५४८॥**



प्रथमायां पौरुष्यां विस्मरणतः पतिते तदानयनाय **चरमायामपि** पौरुष्यां **निवर्त्तते**, यदि **वसिमे अन्तरा वासो**ऽस्ति। अथ चरमायां दिनपौरुष्यां पतितं तदा रात्रे**स्त्रीन् यामान्**

**उषित्वा चरमे** यामे निरत्यये प्रत्यवायाभावतो निर्भये **निवर्त्तते**॥ ३५४८॥

'कारणे शुद्धो' इति व्याख्यानार्थमाह—

**दूरं सो वि य तुच्छो, सावयतेणा नदी व वासं वा ।**
**इच्चाइकारणेहिं, करेंति उस्सग्ग मो तस्स ॥ ३५४९॥**

**दूर**मतिशयेन गतानां स्मरणपथमवतीर्णः पतित उपधिः, **सोऽपि वा** उपधिरतिशयेन **तुच्छः** मुखपोतिकादिरूपोऽतिजराजीर्णश्चेति भावः। अथवा अपान्तराले व्याघ्रादीनि **श्वापदानि स्तेना** वा शरीरापहारिण उपकरणापहारिणो वा, **नदी** वाऽपान्तराले, **वर्षं वा** पतति, आदिशब्दात् म्लेच्छभयं वा अशिवं वेत्यादि परिग्रहः, **इत्यादिभिः कारणै**स्तस्य विस्मरणतः पतितस्योपकरणस्य **उत्सर्गं** 'वोसिरामि' त्ति त्रिभणनपूर्वकं परित्यागं **करोति** । एवंकरणे अधिकरणादयो न भवन्ति ॥ ३५४९॥

**एवं ता पम्हुट्ठो, जेसिं तेसि विही भवे एसो ।**
**जे पुण अन्ने पेच्छे, तेसिं तु इमो विही होई ॥ ३५५० ॥**

**एव**मुक्तेन प्रकारेण तावत् **येषामु**पधि**र्विस्मरणतः** पतितस्ते**षामेषो**ऽनन्तरोदितो **विधिर्भवति, ये पुनरन्ये** साधर्मिकाः **प्रेक्षन्ते तेषामयं** वक्ष्यमाणो **विधिर्भवति**॥ ३५५०॥

तमेवाह—

**दट्ठु अगेण्हणे लहुगो, दुविहो उवही उ नायमण्णातो ।**
**दुविहा णायमणाया, संविग्ग तहा असंविग्गा ॥ ३५५१॥**

द्विविध उपधिरौघिक औपग्रहिकश्च, तस्य द्विविधस्यापि पतितस्य **दृष्ट्वा अग्रहणे** प्रायश्चित्तं **लघुको** मासः ये च पूर्वमुक्ता अधिकरणादयो दोषास्तेऽपि तस्य प्रसजन्ति। स **चोपधिर्भूयो द्विधा -ज्ञातोऽज्ञातश्च** । तत्र ज्ञातो नाम येषां स उपधिस्तेषां ज्ञायते, अज्ञातो यो न ज्ञायते यथा अमुकस्य सम्बन्धीति। ते **ज्ञाता द्विविधा** भवेयुः- संविग्ना वा असंविग्ना वा, योऽपि चोपधिर्येषां सत्कतया न ज्ञायते तेऽ**प्यज्ञाता** द्विविधाः **संविग्ना असंविग्नाश्च** ॥ ३५५१॥

**मोत्तूण असंविग्गे, संविग्गाणं तु नयण जयणाए ।**
**दो वग्गा संविग्गे, छब्भागा नायमण्णाए ॥ ३५५२॥**

**मुक्त्वा असंविग्नान्** किमुक्तं भवति? यो ज्ञायते असंविग्नानामेष उपधिः स न नीयते,

गाथा ३५४८-३५५४ विस्मृतोपकरणे दृष्टे विधिः

यस्तु **संविग्नानाम्,** [उपधिः तस्य **नयनं यतनया।** तत्र **संविग्नानां**] **द्वौ वर्गौ** तद्यथा- संयताः संयत्यश्च। तत्र संविग्ने एकैकस्मिन् वर्गे **षड् भङ्गा ज्ञाते** भवन्ति। **अज्ञाते** च वक्ष्यमाणो विधिः॥ ३५५२॥

तत्र षड् भङ्गानुपदर्शयति—

**सयमेव अण्णपेसे, अप्पाहे वावि एव सग्गामे ।**
**परगामे वि य एवं, संजतिवग्गे वि छब्भंगा ॥ ३५५३॥**

यदि ते संयताः संविग्ना इति ज्ञातास्तदा **स्वयं** वा गन्तुं (गत्वा) नयति । **अन्यस्य** वा हस्ते **प्रेषयति** संदेशयति वा, यथा-मया स उपधिर्विस्मरणतः पतितो लब्ध इति। **एवं स्वग्रामे** त्रयो भङ्गाः, **परग्रामेऽपि** स्थितानामेते एव त्रयः प्रकाराः, एवं षड् भङ्गाः संयतानाम्। **एवं संयतीवगेऽपि षड् भङ्गाः** ॥ ३३५५॥

तदेवं ज्ञातविषये विधिरुक्तः सम्प्रत्यज्ञातविषयं विधिमाह—

**ण्हाणादि नाय घोसण, सोउं गमणं व पेसणप्पाहे ।**
**पम्हुट्ठे वोसट्ठे, अप्पबहु असंथरंतम्मि ॥ ३५५४ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो न ज्ञायते कस्याप्येष उपधिरिति स परिज्ञाननिमित्तं **स्नानादि** समवसरणे घोष्यते, **घोषणां च श्रुत्वा** केनापि कथिते **ज्ञाते** येषां स उपधिस्तत्र स्वयं वा **गन्तुं** (गत्वा) नयति अन्यस्य वा हस्ते प्रेषयति सन्देशयति वा, तथा **पम्हुट्ठे** विस्मरणतः पतिते **व्युत्सृष्टे** परित्यक्ते येनानीतस्तस्मि**न्नसंस्तरति अल्पबहु** परिभाव्य परिभोगोऽनुज्ञातः॥ ३५५४॥

एतदेव व्याख्यानयति—

**कामं पम्हुट्ठं[१] नो, चत्तं पुण भावतो इमम्हेहिं ।**
**इति उपधि बेंति समणुण्णे, इच्छाकज्जेसु सेसेसु ॥ ३५५५॥**



येषां स उपधिर्विस्मरणतः पतितस्तेषामन्तिकं स नीयते नीत्वा चेदं भण्यते, यथा[२] अयं युष्मद्विस्मरणतः पतितोऽस्माभिश्चाऽऽनीतस्ततो गृह्यतामिति। एवमुक्ते ते प्राहुः **कामं नो**ऽस्माकं **विस्मरणतः** पतितमिदमुपकरणं परं **भावत इदमस्माभिस्त्यक्तं** त्रिविधं त्रिविधेन व्युत्सृष्टमिति भावः। **एवं ब्रुवन्त**स्ते यदि साम्भोगिकाः, तेन च विना संस्तरन्ति तर्हि स उपधिर्येषां सत्कस्ते

---

१. पम्हुट्ठं ण्हे-ला.॥ २. यथार्य !- मु. ॥

For Private and Personal Use Only

परिष्ठापयन्ति एतेन '**इच्छा कज्जेसु**' इति व्याख्यातम्, सम्प्रति '**सेसेसु**' त्ति व्याख्यायते-शेषा असाम्भोगिकास्तेष्वपि कार्येष्विच्छा, इयमत्र भावना-अन्यसाम्भोगिकैरानीते तैश्च प्रतिषिद्धे यदि यैरानीतस्ते तेन विना न संस्तरन्ति अन्यश्चोपधिर्दुर्लभो न लभ्यते वा, तदा तैः **समनुज्ञातं** परिभुञ्जते। एतावता 'अप्पबहु असंथरंतम्मी'ति व्याख्यातम् ॥ ३५५५ ॥

तदेवं संविग्नानां विधिरिदानीमसंविग्नानामुपधिरुच्यते—

**पक्खिगाऽपक्खिगा चेव, हवंति इयरे दुहा ।**
**संविग्गपक्खिगे णेति, इयरेसि न गेण्हती ॥ ३५५६ ॥**

**इतरे** असंविग्ना **द्विधास्तद्यथा**—संविग्न**पाक्षिका अपाक्षिकाश्च** असंविग्नपाक्षिका इत्यर्थः। तत्र यः **संविग्नपाक्षिके** संविग्नपाक्षिकस्य सम्बन्धी उपधिस्तं स्वयं वा **नयति** अन्यस्य वा हस्ते प्रेषयति सन्देशयति वा **यस्त्वितरेषाम**संविग्नानामुपधिस्तं पतितं दृष्ट्वा **न गृह्णाति** ॥ ३५५६ ॥

अत्रैवापवादमाह—

**इयरे वि होज्ज गहणं, आसंकाए अणिज्जमाणम्मि।**
**किह पुण होज्जाऽऽसंका, इमेहि उ कारणेहिं तु॥ ३५५७॥**

इतरस्मिन्नप्यसंविग्नपाक्षिकसम्बन्धिन्युपधौ असंविग्नपाक्षिकसम्बन्धित्वेनाऽ**ज्ञायमाने आशङ्कया ग्रहणं भवेत्, किह पुनराशङ्का** भवेत्? सूरिराह–**एभिर्व**क्ष्यमाणैः **कारणैः** ॥ ३५५७॥

तान्येवाह—

**ण्हाणादो सरणे वा, अहव समावत्तितो गयाऽणेगा।**
**संविग्गमसंविग्गा, इति संका गेण्हंते पडियं॥ ३५५८॥**

जिनप्रतिमा**स्नान**दर्शननिमित्तम्, **आदि**शब्दात् सङ्घप्रयोजनेन केनापि **समवसरणे** मेलापके **यदिवा** एवमेव **समापत्तितो गताः** पुरतोऽ**नेके संविग्ना असंविग्ना**श्च, तेषां च गच्छतां कस्याप्युपधिर्विस्मरणतः पतितः, स न ज्ञायते सम्यक् किं संविग्नानामुताऽसंविग्नानां? केवलं स्यात् संविग्नानामपीति तं **पतितं गृह्णाति** ॥ ३५५८॥



For Private and Personal Use Only

**संविग्गपुराणोवहि, अहवा [1]विहिसीवणा समावत्ती।**
**होज्ज व असीवितो च्चिय, इति आसंकाए गहणं तु ॥ ३५५९॥**

**अथवा पुराणसंविग्नोपधिः**, किमुक्तं भवति? येषां सत्क उपधिः पतितस्ते पूर्वं संविग्ना आसीरन् पश्चादसंविग्नीभूताः, स चोपधिः पूर्वं संविग्नसीवनेन सीवितः। अथवा असंविग्नैरपि समापत्त्या **विधिसीवनिकया** सीवितो यदि वा **असीवित** एव स **भवेत्** ततस्तं दृष्ट्वा आशङ्का भवति किं संविग्नानामुतासंविग्नानां तत **आशङ्कया ग्रहणं** भवति ॥ ३५५९॥

सम्प्रति ग्रहणानन्तरं विधिशेषमाह—

**ते पुण परदेसगते, नाउं भुजंति अहव उज्झंति।**
**अन्ने उ परिट्ठवणा, कारणभोगो व गीएसु ॥ ३५६०॥**

तमुपधिं गृहीत्वा येषाम् असंविग्नानां सत्कः स उपधि**स्ते परदेशं गता**स्ततस्तान् परदेशं गतान् **ज्ञात्वा** कारणे समापतिते परि**भुञ्जते अथवा** कारणाभावे **परिष्ठापयन्ति** । एवं कारणैरसंविग्नानामपि पतितमुपधिं गृह्णानो न प्रायश्चित्तभाग्भवति। अथ येषां सत्क उपधिः



---

१ विहिसिव्वणा- ला. ॥

पतितो गृहीतस्ते संविग्ना अप्यन्ये असाम्भोगिकास्तेषां देशान्तरगतानामुपधिं गृहीत्वा निष्कारणे **परिष्ठापयन्ति, कारण** त्ति, यदि ते सर्वे गीतार्था न च तेषामुपधिरस्ति यदि वा तादृश उपधिरन्यो दुर्लभस्तदा एवं कारणे परि**भुञ्जते**। अथ ते अगीतार्थमिश्रास्तदा परिष्ठाप्यते परिज्ञाप्य वा अगीतार्थान् परिभुञ्जते, एतच्चाऽन्यसाम्भोगिकसत्कतया परिज्ञाते द्रव्ये अपरिज्ञाते प्रागुक्त एव विधिः ॥ ३५६० ॥

**बीइयपदे न गिण्हेज्जा संविग्गाणं पिमेहिं कज्जेहि।**
**आसंकाए न नज्जति, संविग्गाणं व इयरेसिं॥ ३५६१ ॥**

**द्वितीयपदे** अपवादपदे **संविग्नानामपि** पतितमुपधिम् **एभिर्वक्ष्यमाणैः कार्यैः** कारणै**र्न गृह्णीयात्**। तान्येवाह-न ज्ञायते किमेष **संविग्नानामुत इतरेषामसंविग्नानामित्याशङ्कया** पतितं **न गृह्णाति** ॥ ३५६१ ॥

तथा—

**असिवगहिया व सोउं, ते वा उभयं व होज्ज जइ गहियं।**
**ओमेण अन्नदेसं, च गंतुकामा न गेण्हेज्जा॥ ३५६२ ॥**

गाथा ३५६१-३५६७ विस्मृतोपधि-ग्रहणे परिष्ठापने च विधिः



For Private and Personal Use Only

श्री व्यवहार-सूत्रम् अष्टम उद्देशकः १४०० (B)

येषां स उपधिस्ते **अशिवगृहीताः**, येन (यैः) दृष्टस्स नेति प्रथमो भङ्गः। यैर्दृष्ट**स्ते** अशिवगृहीता येषां सत्कस्ते न गृहीताः, अथवा **उभयं गृहीत**मिति तृतीयः, नोभयमपि गृहीतमिति चतुर्थः। तत्र चतुर्थभङ्गोऽपवादविधिमधिकृत्य शून्यः, न भवति तत्राऽपवाद इति भावः। तत्र प्रथमभङ्गे न गृह्णाति अशिवोपहतत्वात्, द्वितीयेऽपि न गृह्णाति तदानीं तस्य तैरग्रहणादशिवोपहतत्त्वात्, तृतीये भङ्गे सदृशे अशिवे कारणे गृह्णाति, विसदृशे सोममुखादिलक्षणे न गृह्णाति, यदि वा **अवमौदर्येण देशान्तरं गन्तुकामा न गृह्णीयुः** ॥ ३५६२ ॥

**अह पुण गहियं पुव्वं न य दिट्ठं जस्स विच्चुयं तं तु।**
**पहावियन्नदेसं इमेण विहिणा विगिंविज्जा॥ ३५६३ ॥**

**अथ पुनर्गृहीतं पूर्व**मुपकरणं **न च** स **दृष्टो यस्य** सत्कं तदुपकरणं **विच्युतं** विस्मरणतः पतितं यस्मात् पवनवेगेन धाविताः **प्रधाविता अन्यदेशं** तद् अनेन वक्ष्यमाणेन **विधिना विवेचयेत्** परिष्ठापयेत् ॥ ३५६३ ॥

गाथा ३५६१-३५६७ विस्मृतोपधि-ग्रहणे परिष्ठापने च विधिः १४०० (B)

तमेव विधिमाह—

**दुविहा जायमजाया, जाया अभियोग तह असुद्धा य।**
**अभियोगादी छेत्तुं, इयरं पुण अक्खुयं चेव॥ ३५६४॥**

सा परिष्ठापनिका **द्विविधा, जाता अजाता** च, तत्र जाता नाम **अभियोगकृता** विषकृता च, तत्राऽभियोगो वशीकरणम्, अथवा जाता **अशुद्धा** सा द्विविधा, मूलगुणाशुद्धा उत्तरगुणाशुद्धा च। तत्र जाता **अभियोग**कृता विषकृता वा, मूलगुणाशुद्धा उत्तरगुणाऽशुद्धा वा, सा **छेत्तुं** भेत्तुं वा कर्त्तव्या, इतरत् **पुनरु**पकरणमभियोगादिदोषरहित**मक्षतं चैव** परिष्ठापयितव्यम् ॥ ३५६४॥ अत्र परः प्रश्नं करोति—

**पहनिग्गयाइयाणं, विजाणणट्ठाए तत्थ चोदेइ।**
**सुद्धासुद्धनिमित्तं, कीरइ विधिं इमं तु तहिं॥ ३५६५ ॥**

एतच्च प्रागुक्ते विधौ प्रतिपादिते परोऽसहमान**श्चोदयति** प्रश्नयति **पथनिर्गतादीनां** पथनिर्गता मार्गप्रतिपन्ना **आदि**शब्दादशिवादिभिः कारणैर्निर्गताः परिगृह्यन्ते, तेषां **शुद्धाऽशुद्धनिमित्तं**

परिष्ठापनमिदमिति **विज्ञानार्थं तत्रेदं** वक्ष्यमाणं चिह्नं **क्रियता**मिति ॥ ३५६५ ॥

तदेवाह—

**एगा दो तिन्नि वली, वत्थे कीरंति पाए चीराणि।**
**छुब्भंतु चोदगेणं, इति उदिते बेति आयरितो॥ ३५६६ ॥**

'मूलगुणैरशुद्धे वस्त्रे **एका वलिः** एकं वक्रं कृत्वा तत् परिष्ठाप्यते, मूलगुणैरशुद्धे **पात्रे** एकं **चीवर**मेकं [वा] प्रस्तरं **क्षिप्त्वा** तत् परिष्ठाप्यताम्, उत्तरगुणैरशुद्धे द्वे वक्रे क्रियेयातां, पात्रे द्वे चीवरखण्डे द्वौ वा प्रस्तरौ क्षिप्येयातां, मूलगुणैरुत्तरगुणैश्च शुद्धे वस्त्रे त्रीणि वक्राणि क्रियेरन् पात्रे त्रीणि चीवराणि त्रयो वा प्रस्तराः क्षिप्येरन्' **इति** अमुना प्रकारेण **चोदकेनोक्ते** आचार्यो **ब्रवीति** ॥ ३५६६ ॥

किं तद्? इत्याह—

**सुद्धमसुद्धं एवं, होति असुद्धं व सुद्धं वायवसा।**
**तेणतिदुगेगगंठी, वत्थे पायम्मि रेहाओ॥ ३५६७॥**

एवं युष्मदुक्तप्रकारेण चिह्नकरणे वातवशात् **शुद्धमपि** वक्रैकद्विकभङ्गतोऽ**शुद्धं भवति अशुद्धमपि वातवशेन** वक्रत्रिकभावतः शुद्धं भवति। पात्रमपि वातवशेन एकद्विकचीवरापगमे शुद्धमप्यशुद्धं भवति, अशुद्धमपि वातवशेनान्याऽऽगन्तुकचीवरखण्डसमागमे शुद्धम्, तस्मादयं विधिस्तत्र कर्त्तव्यः- मूलोत्तरगुणशुद्धे **वस्त्रे त्रयो** ग्रन्थयः कर्त्तव्याः, **पात्रे** तिस्रो **रेखाः**, उत्तरगुणैर शुद्धे वस्त्रे **द्वौ** ग्रन्थी, पात्रे द्वे रेखे, मूलगुणैरशुद्धे वस्त्रे **एको ग्रन्थिः** पात्रे एका रेखा ॥३५६७॥

**अद्धाण निग्गयादी, उवएसाऽऽणयण पेसणं वा वि।**
**अविकोविते अप्पगणगं, दड्ढे भिन्ने विवित्ते य ॥ ३५६८॥**

अध्वनि मार्गे निर्गता **अध्वनिर्गताः, आदिशब्दाद्** अशिवादिभिर्वा कारणैर्निर्गताः परिगृह्यन्ते, तेषामुपकरणे **दग्धे** वह्निना भस्मीकृते **भिन्ने** वा **विविक्ते** वा विस्मरणतः पतिते वास्तव्यास्तान् अध्वनि निर्गतादीन् ब्रुवते- 'अस्माकमुद्धरितानि वस्त्राणि न सन्ति केवल-मस्माभिरमुकप्रदेशे परिष्ठापितानि वर्त्तन्ते तान्यानीय गृह्णीथ' एवमुक्ते तेऽपि प्राघूर्णका ये गीतार्थास्तान् प्रेषयन्ति, वास्तव्या अपि च तेषां चिह्ना**न्युपदिशन्ति** यथा गर्त्तासमीपे, गिरिसमीपे, तरुसमीपे, तडाकसमीपे, कूपसमीपे इत्यादि। **आणयण**मिति। अथैवं चिह्ने कथितेऽपि ते

स्थानं न जानन्ति, यदि वा न ते वास्तव्या ग्लानादिप्रयोजनैर्व्यापृतास्ततः स्वयमानीय प्रयच्छन्ति **पेसणं वा वि** त्ति, अथवा वास्तव्याः प्राघूर्णकानां सन्देशकं ददति यथा- 'अमुकप्रदेशे वस्त्रादि परिष्ठापितमस्ति तदमीषां दर्शय।' अपिशब्दात् यदि ग्लानादिप्रयोजनैर्न व्यापृतास्तदा परिष्ठापिताऽभावेऽन्यद् याचित्वा प्रयच्छन्ति । **अविकोविते अप्पणग**मिति, आनीते परिष्ठापिते कोऽप्य**कोविदो** अगीतार्थ उपहतमिति कृत्वा नेच्छेत् तत्र प्राघूर्णकैर्वास्तव्यैर्वा तस्याऽऽ**त्मीयं** वस्त्रं पात्रं वा दत्त्वा इतरत् स्वयं ग्रहीतव्यम्। अथ तदपि कश्चिदगीतार्थतया न गृह्णीयात् तर्हि तद् आनीतं पुनरपि परिष्ठाप्यते ॥ ३५६८॥

एष गाथायाः सङ्क्षेपार्थः साम्प्रतमेनामेव विवरीषुराह—



**अद्धाण निग्गयादी, नाउ परित्तोवही विवित्ते वा।**
**संपडुग भंडधारी, पेसंती ते वि जाणंते॥ ३५६९ ॥**

**अध्वनिर्गतादीन्** आदिशब्दादशिवादिकारणनिर्गतपरिग्रहस्तान् **परीत्तोपधीन्** परिमितोपधीन् **विविक्तान्** वा विविक्तोपधीन् वा विस्मरणतः पतितोपधीनित्यर्थः, उपलक्षणमेतत्, दग्धोपधीन्

वा वास्तव्या ज्ञात्वा, कथम्भूता वास्तव्याः? इत्याह-**सम्पादुकभाण्डधारिणो** नाम यावन्मात्रमुपकरणमुपयुज्यते तावन्मात्रं धरन्ति शेषं परिष्ठापयन्ति ते, तान् तथाभूतान् **ज्ञात्वा** ब्रुवते-'अस्माकमुद्धरितानि वस्त्राणि न सन्ति किन्तु अस्माभिरमुकप्रदेशे परिष्ठापितानि गत्वा प्रतिगृह्णीतेति।' एवमुक्ते **तेऽपि** प्राघूर्णका **जानतो** गीतार्थान् **प्रेषयन्ति** ॥ ३५६९ ॥

कथम्? इत्याह-

**गड्डागिरितरुमादिणि, काउं चिंधाणि तत्थ पेसंति।**
**अवियावडा सयं वा आणंतऽन्न व मग्गंति॥ ३५७०॥**

**तत्र** प्राघूर्णकप्रेषितान् वास्तव्या **गर्त्ता-गिरितर्वादीनि चिह्नानि कृत्वा प्रेषयन्ति**, यदि वा ग्लानादिभि**रव्यापृताः स्वयमानयन्ति**, परिष्ठापिताभावे **अन्यद्वा मार्गयन्ति** ॥ ३५७० ॥

साम्प्रतम् 'अविकोविए अप्पणगमिति' व्याख्यानयति—

**नीयम्मि य उवकरणे, उवहयमेयं न इच्छई कोई।**
**अविकोविए अप्पणगं, अणिच्छमाणो विविंचंति ॥ ३५७१ ॥**

नीतेऽप्युप**करणे** कश्चिदकोविद **उपहतमेत**दिति कृत्वा **नेच्छेत्** तस्मि**न्नविकोविदे आत्मीयं** वस्त्रादि समर्प्यते । अथ तदपि **नेच्छति** तदा परिष्ठापितमानीतं पुनरपि **विविंचंति** परिष्ठापयन्ति ॥ ३५७१ ॥

**असतीय अप्पणावि य, झामिय-हिय-वूढ-पडियमादीसु।**
**सुज्झति कयप्पयत्तो, तमेव गेण्हं असढभावो॥ ३५७२॥**

येन पूर्वं तत् परिष्ठापितं तस्य पश्चादुपधिः कथमपि प्रदीपनकेन दग्धः, हृतो वा तस्करैः, पानीयेन वा नद्यादिप्लवेन प्लावितः, व्रजतो वा कथमपि विस्मरणतः पतितः, आदिशब्दात् प्रत्यनीकेन वा केनापि वस्त्राणि फालितानि, पात्राणि अनेकधा भिन्नानि, ततो **ध्यामित-हृत-व्यूढ-पतितादिषू**पकरणेषु अन्यानि उपकरणानि याचनीयानि, तेषामपि **असति** अभावे **कृतप्रयत्न**स्तदेव पूर्वपरिष्ठापितं **स्वयं गृह्णानः शुद्धोऽशठभाव** इति कृत्वा ॥ ३५७२ ॥

**सूत्रम्— कप्पइ निग्गंथाण वा निग्गंथीण वा अइरेगपडिग्गहं अण्णमण्णस्स अद्धाए[१] धारेत्तए वा परिग्गहित्तए वा। सो वा णं धारेस्सइ, अहं वा णं धारेस्सामि, अण्णो वा णं धारेस्सइ, नो से कप्पइ ते अणापुच्छिय, अणामंतिय अण्णमण्णेसिं दाउं वा अणुप्पदाउं वा। कप्पइ से ते आपुच्छिय आमंतिय अण्णमण्णेसिं दाउं वा अणुप्पदाउं वा ॥ १६ ॥**

'कप्पति निग्गंथाण वा निग्गंथीण वा अतिरेगपडिग्गहमि'त्यादि, अस्य सम्बन्धप्रतिपादनार्थमाह—

**उवही दूरद्धाणे, साहम्मियतेण रक्खणे चेव।**
**अणुवत्तंते उ इमं, अतिरेगपडिग्गहं सुत्तं ॥ ३५७३ ॥**

अनन्तरसूत्रे इदमुक्तं विस्मरणतः पतित **उपधिर्दूरादप्यध्वनि** आनेतव्यः इत्युपदेशः कृतोऽन्येषां च विस्मरणतः पतितं गृहीत्वा दूरेऽपि येषां सत्कस्तेषां दातव्योऽन्यथाऽदाने **साधर्मिकाणां चौरिका** स्यात्, तत उपधौ दूराध्वनि **साधर्मिकस्तैन्यरक्षणे अनुवर्त्तमाने** इदमप्यधिकृतं सूत्रम् **अतिरेकपतद्ग्रहविषयं** दूराध्वाधिकारे साधर्मिकस्तैन्यरक्षणाधिकारेऽभिहितमित्येष सूत्रार्थः ॥ ३५७३ ॥

---

**१. अद्धाए दूरमवि अद्धाणं परिवहित्तए - आ. प्र., श्युब्रींग पाठभेदे च ॥**

अनेन सम्बन्धेनायातस्यास्य व्याख्या।

**कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां** वा **अतिरेक**मतिरक्तं **पतद्ग्रहम् अन्यदन्यस्य**[1] **अर्थाय** इदमविशेषितं वचनं साधर्मिकस्यार्थायेति द्रष्टव्यं, **धारयितु वा** स्वयं वा **परिग्रहीतुं, सो वा णं धारयिष्यति** इदं विशेषितवचनम्, अमुको गणी वाचकोऽन्यो वा विशेषनिर्दिष्टः साधुस्तस्य भविष्यतीति भावः। **अहं वा णं धारयिष्यामि** ममैव भविष्यतीति भावः **अन्यो वा ण**मिति सर्वत्र वाक्यालङ्कारे **धारयिष्यति** यस्य कस्याप्यहं दास्यामि, **न** च **से** तस्य **कल्पते** यस्य विशेषतो निर्दिष्टम् अमुकस्य दातव्यं **तम् अनापृच्छ्य अनामन्त्र्य वा अन्येषा-मन्येषां** यदृच्छया **दातुं वा अनुप्रदातुं वा। कल्पते से** तस्य **तान् आपृच्छ्य आमन्त्र्य** च **अन्येषामन्येषां दातुं वा अनुप्रदातुम्** एष सूत्राक्षरसंस्कारः॥ अधुना **भाष्यकृत्** सामान्यविशेषवचनरूपयोः उद्देश-निर्देशयोः स्वरूपमाह—

**साहम्मिय उद्देसो, निद्देसो होइ इत्थि-पुरिसाणं।**
**गणिवायगउद्देसो, अमुग गणी वायए इयरो॥ ३५७४ ॥**

---

१. **अन्यस्यान्यस्य-पु.प्रे.॥**

**साधर्मिक इत्युद्देशो भवति स्त्रीणां पुरुषाणां** वाऽभिधानमिति निर्देशः, अथवा **गणी वाचक इत्युद्देशः, अमुको गणी** अमुको **वाचक** इति **इतरो** निर्देशः ॥ ३५७४ ॥

सम्प्रति **निर्युक्तिविस्तरः**—

**ऊणातिरित्तधरणे चउरो मासा हवंति उग्घाया।**
**आणादिणो य दोसा संघट्टणमादि पलिमंथो॥ ३५७५ ॥**

गणनया प्रमाणेन च **ऊनस्य अतिरिक्तस्य** वा उपकरणस्य **धरणे** प्रायश्चित्तं **चत्वारो मासा उद्घाता** लघवः **आज्ञादयश्च दोषाः**। तथा पात्रपरिकर्मणां कुर्वन् तद्गतान् वा प्राणान् **संघट्टयति, आदिशब्दात्** परितापयति अपद्रावयति वा, ततस्तन्निमित्तमपि तस्य प्रायश्चित्तं तथा प्रतिदिवसमुभयकालं पात्राणि अन्यद् वाऽतिरिक्तमुपकरणं प्रत्युपेक्षमाणस्य **परिमन्थः** सूत्रार्थव्याघातः। तस्मात् गणनया प्रमाणेन च सूत्रोक्तमुपकरणं धारयितव्यम् ॥ ३५७५ ॥

तत्र पात्रमधिकृत्यातिरेकं व्याख्यानयति—

**दो पायाऽणुण्णाया, अतिरेगं तइयं च माणतो।**
**धारंते पाणघट्टणभारे पडिलेहपलिमंथो॥ ३५७६ ॥**

**द्वे पात्रे** तीर्थकरै**रनुज्ञाते** तद्यथा-पात्रं मात्रं च, तत्र यदि **तृतीयं** पात्रं गृह्णाति तदा गणनया**ऽतिरेकं** भवति, यच्च प्रमाणं पात्रस्योक्तं ततो यदि बृहत्तरं गृह्णाति तदा **प्रमाणतो**ऽतिरेकम्। तत्र गणनया प्रमाणेन वाऽतिरिक्तं पात्रं **धारयति** परिकर्मणायां तज्जाताऽतज्जात**प्राणसङ्घट्टनम्,** उपलक्षणमेतत्, प्राणानां परितापनमपद्रावणं च, तथा अध्वनि तद्वहने **भारः**। उभयकालं प्रतिदिवसं **प्रतिलेखने परिमन्थः** ॥ ३५७६ ॥

अत्र परप्रश्नमुपदर्शयति—

**चोदेती अतिरेगे, जदि दोसा तो धरेउ ओमं तु।**
**एक्कं बहूण कप्पति, हिंडंतु य चक्कवालेण॥ ३५७७॥**

अत्र पर**श्चोदयति**-'**यद्यतिरेके** पात्रे गृह्यमाणे अनन्तरोक्ता **दोषाः, ततोऽवमं** गणनया हीनं पात्रं **धारयतु** यथा यथा अल्पोपधिता तथा तथा बहुबहुतरगुणसम्भवात्' । कथं गणनया हीनं धारयतु इत्याह- **एकं बहूनां** पञ्चानां **कल्पते,** ते च पञ्चजना**श्चक्रवालेन** एकस्मिन् दिने एको द्वितीये द्वितीय इत्यादिरूपेण भिक्षां **हिण्डन्ताम्** ॥ ३५७७ ॥

एतदेव स्पष्टयति —

**पंचण्हमेगपायं, दसमेण एक्कमेक्को पारेउ।**
**संघट्टणादि एवं, न होंति दुविहं च तेसिं ओमं॥ ३५७८ ॥**

**पञ्चानां** जनाना**मेकं पात्रं** भवतु, तेषां च मध्ये **एकैकः** क्रमेण चक्रवाललक्षणेन **दशमेन पारयन्तु,** यस्य यस्मिन् दिवसे पारणकं स तत्पात्रं गृहीत्वा हिण्डताम्। एवं च तेषां परिपाट्या दशमदशमातिक्रमेण पञ्चमे दिवसे वारको भवति। एवं च **सङ्घट्टनादयो** दोषा **न भवन्ति** किं **त्वेषां यद्द्विविधमवमौदर्यं** द्रव्यावमौदर्यं पञ्चानामेकस्य पात्रस्य भावात् भावावमौदर्यं च दशमदशमातिक्रमेण पारणात्, तद्गुणो भवति॥ ३५७८॥

एतदेवाह—

**आहारे उवगरणे, दुविहं ओमं च होइ तेसिं तु।**
**सुत्ताभिहियं च कयं, वेहारियलक्खणं चेव॥ ३५७९ ॥**

**द्विविधं** द्रव्यभावभेदतो द्विप्रकार**मवमं भवति तेषामाहारे उपकरणे च,** आहारविषयं भावावमम्, उपकरणविषयं द्रव्यावममित्यर्थः। **सूत्रे चाभिहितं-वेहारिकाणां** विहारे हितं वैहारिकं तेन गच्छतां **लक्षण**मल्पोपधिता अल्पाहारता **च** तत्**कृतं** भवति॥ ३५७९॥

एतदेवाह—

**वेहारियाणमन्ने, जह सिं जल्लेण मइलियं अंगं ।**
**मइला य चोलपट्टा, एगं पायं च सव्वेसिं॥ ३५८०॥**

**मन्ये यथा अमीषां वैहारिकाणां जल्लेन** शरीरोत्थेन मलेन **मलिनमङ्गं**, यथा च **मलिनाश्चोलपट्टास्तथा सर्वेषामेकं पात्रं** भवति तत एकपात्रग्रहणे वैहारिकलक्षणं कृतं भवति ॥३५८०॥

अत्राचार्य आह—

**जेसिं एसुवदेसो, तित्थयराणं तु कोविया आणा।**
**चउरो य अणुग्घाया-ऽणेगे दोसा इमे होंति॥ ३५८१ ॥**

गाथा ३५७८-३५८३ प्रमाणोने पात्रे दोषाः

**येषामेष उपदेशस्तैस्तीर्थकराणामाज्ञा कोपिता:** तीर्थकरैः पात्रद्वयस्य प्रत्येकमनुज्ञानात्, तेषां च प्रायश्चित्तं **चत्वारो** मासा **अनुद्घाता** गुरवः। यत **इमे** वक्ष्यमाणा **अनेके दोषा भवन्ति**॥ ३५८१॥

तानेवाह—

**अद्धाणे गेलण्णे, अप्पपरवया य भिन्नमायरिए।**
**आदेसबालवुड्ढा, सेहा खमगा य परिचत्ता ॥ ३५८२ ॥**

**अध्वनि ग्लानत्वे** च **आत्मा परश्च** तैः **त्यक्तः**। इयमत्र भावना-ये अध्वनिर्गता विस्मरणतः पतितोपधयः स्तेनापहृतोपधयो वा भिन्नपात्रा वा तद्विषये आत्मा परो वा त्यक्तो भवति, यदि तेषां पात्रं ददाति तदा आत्मा त्यक्तः, पात्राभावे भिक्षाटनासम्भवात्, अथ न ददाति अध्वनिर्गतास्त्यक्ताः । अपि च- बहूनामेकं पात्रमित्युक्तं तत एकेन पात्रेण यदानीतं न तेन बहवोऽध्वनिर्गता संस्तरेयुः। तथा ग्लानविषयेऽप्यात्मा परो वा त्यक्तः स्यात्, तथाहि- यदि ग्लानस्य ददाति तत्पात्रं तदाऽऽत्मा त्यक्तः, अथ न ददाति तदा परो ग्लान इति। अन्यच्च अध्वनिर्गतानां ग्लानस्य वा तत्पात्रार्पणे स्वयं कुलालभाण्डं याचनीयं स्यात्, तच्चाऽऽनीतं

यदि कथमपि भिद्येत तदा तन्मूल्यं दाप्येत कलहादयो वा दोषाः स्युः, **वया यत्ति** व्रतान्यपि च परित्यक्तानि स्युः। यतः प्रत्येकपात्रग्रहणे एकत्र संसक्तभक्तं पानं वा गृहीत्वा प्रत्युपेक्षेत प्रत्युपेक्ष्याऽन्यत्र प्रक्षिपति, बहूनां त्वेकपात्राभ्यनुज्ञाने शीतोष्णानि संसक्ताऽसंसक्तभक्तपानानि गृह्णतः प्राणानां विराधना, तथा च व्रतानि परित्यक्तानि । **भिन्न**त्ति, एकं पात्रं कदाचिद् भिन्नं स्यात् तदा कुतोऽन्यत् तत्कालं लभ्यते? अन्यत्र मार्गयतः स एव पलिमन्थदोषः, कुलालभाण्डग्रहणे च प्रागुक्ता दोषाः। तथा एकपात्रपरिग्रहे **आचार्या आदेशाः** प्राघूर्णका **बालवृद्धाः शैक्षकाः क्षपकाश्च परित्यक्ताः**। यत एकपात्रानीतमेकस्यात्मनो भवति, आचार्यादीनां किं ददातु? कुत्र वा तेषां प्रायोग्यं गृह्णातु? ततस्ते एवं परित्यक्ताः॥ ३५८२ ॥

अत्र पूर्वार्द्धव्याख्यानार्थमाह—

**देंते तेसिं अप्पा, जढो अद्दाणे ते जढा जं च।**

**कुज्जा कुलालगहणं, वया जढा पाणगहणम्मि॥ ३५८३॥**

तेषामध्वनिर्गतानां ग्लानानां च ददति **आत्मा परित्यक्तो** भवति, **अदाने ते**

अध्वनिर्गतादयः **परित्यक्ताः**, यच्च तेषां पात्रं दत्त्वा स्वयं **कुलालभाण्डग्रहणं कुर्यात्** तत्राप्यनेके दोषाः, ते च प्रागेव भाविताः, **व्रतान्यपि त्यक्तानि** भवन्ति। **पानग्रहणे** पानग्रहणं भक्तोपलक्षणं, संसक्तभक्तपानग्रहणे इत्यर्थः। भावना सर्वत्र प्रागेव कृता ॥ ३५८३ ॥

पुनरपि परः प्रश्नयति—

**जइ होंति दोस एवं, तम्हा एक्केक्क धारए एक्कं।**
**सुत्ते य एगं भणियं, मत्तयउवदेसणा वेण्हिं॥ ३५८४ ॥**

**दिन्नज्जरक्खिएहिं, दसपुरनगरम्मि उच्छुघरनामे।**
**वासावासठिएहिं, गुणनिप्फत्तिं बहुं नाउं ॥ ३५८५ ॥**

एवमुक्तप्रकारेण बहूनामेकपात्राभ्यनुज्ञायां **दोषा भवन्ति, तस्मात् एकैकः एकं** पात्रं **धारयेत्** न मात्रकं, युक्तं चैतत् यतः **सूत्रेऽप्येकं** पात्रमनुज्ञातं तथा चोक्तम्-'**जे निग्गंथे तरुणे बलवं से एगं पायं धरेज्जा नो बीयमिति**' ततो ज्ञायते नानुज्ञातं तीर्थंकरैर्मात्रकग्रहणम् केवल**मिदानीम् आर्यरक्षितै**राचार्यै**र्दशपुरनगरे इक्षुगृहनाम्नि** उद्याने **वर्षावासस्थितैर्बह्वीं गुणनिष्पत्तिं ज्ञात्वा मात्रकस्योपदेशना दत्ता** कृता॥ ३५८४ ॥ ३५८५॥



For Private and Personal Use Only

सा च यैः कारणैः कृता तान्युपदर्शयति—

**दूरे चिक्खल्लो वुट्ठिकाय सज्झायझाणपलिमंथो।**
**तो तेहिं एस दिन्नो, एव भणंतस्स चउगुरुगा॥ ३५८६ ॥**

ते **आर्यरक्षिता** आचार्या **दशपुरे** नगरे नगरात् **दूरे इक्षुगृह**नाम्नि उद्याने वर्षारात्रं स्थिताः, मार्गे च **कर्दमो**ऽतिप्रभूतो, **वृष्टिः** वर्षं तदप्यतिशयेन प्रभूतं पतति, तत्र प्रायोग्ये आचार्यादीनां लभ्यमाने यदि न गृह्यते तदा ते परित्यक्ता भवन्ति, अथ गृह्यते तर्हि कुत्र पानीयं भैक्षं वा गृह्यताम्? अथ नीत्वा प्रत्यागम्यते तदा **काया**ना**म**प्कायहरितकायानां विराधना, **स्वाध्याय-ध्यानानां** च **परिमन्थो** व्याघातः, **ततस्तै**रेतैः कारणै**रेष** मात्रकस्योपदेशो **दत्तः**। सूरिराह-यथोक्तकारणवशा**दा**र्यरक्षितैरेष मात्रकोऽनुज्ञातो न तीर्थकरैरिति **एवं भणतो** वदतस्तव प्रायश्चित्तं **चत्वारो गुरुकाः**,-तीर्थकरैरप्यनुज्ञानात्, एतच्चाग्रे दर्शयिष्यते। यदपि चोक्तं-'**ये निग्गंथे तरुणे बलवं से एगं पायं धरेज्जा नो बीयमि**'त्यादि सूत्रम्। [**आचाराङ्ग**] तदपि गच्छनिर्गतविषयं न स्थविरकल्पाश्रितं, न च तेन कारणजातेन **आर्य**रक्षितैः मात्रकानुज्ञा कृता ॥ ३५८६॥ [तथा न] तदैवेकं केवलं किंत्वन्यदपि मात्रकानुज्ञायां कारणकदम्बकमस्ति।

तदेवाह—

**पाणदयखमणकरणे, संघाडासति विकप्पपरिहारी।**
**खमणाऽसहु एगागी, गेण्हंति उ मत्तए भत्तं॥ ३५८७॥**

**थेराण स विदिण्णो, ओहोवहि मत्तगो जिणवरेहिं।**
**आयरियादीणट्ठा, तस्सूवभोगो न इहरा उ॥ ३५८८॥**

**प्राणदया**निमित्तं कोऽपि साधुः क्षपणं कुर्यात्, तस्य यः सङ्घाटकः स क्षपणं कर्तुं न शक्नोति न च तस्यान्यः सङ्घाटको विद्यते ततो यदि त्रयो जनाः सम्भूय भिक्षामटन्ति तदा जनानां विकल्पो भवति, तस्य परिहरणाय एकाकी हिण्डते,. स द्वितीयस्य सङ्घाटकवतः साधोः प्राणदयार्थं क्षपणकरणे **सङ्घाटाभावे विकल्पपरिहारी क्षपणकरणाऽसमर्थो** भिक्षा**मेकाकी** हिण्डमानः पतद्ग्रहे पानकं **गृह्णाति मात्रके भक्तम्**। अनेन कारणेन **स्थविराणामोघोपधि**रूपो **मात्रको जिनवरैः** तीर्थकरै**र्वितीर्णो**ऽनुज्ञातः **ओघनिर्युक्तौ** तथाऽभिधानात् । एतेन यदुक्तं 'तीर्थंकरैर्नानुज्ञातो मात्रक' इति तन्मिथ्येत्यावेदितम्, अत एव

गाथा ३५८४-३५८९ मात्रकानुज्ञा-कारणानि

तस्यैवं ब्रुवतश्चतुर्गुरुकं प्रायश्चित्तं, तथा **तस्य** मात्रकस्यो**पभोग आचार्यादीनाम्,** आचार्य-ग्लान-प्राघूर्णक-बाल-वृद्धादीना**मर्थाय** तत्प्रायोग्यग्रहणाय, उपलक्षणमेतत्, संसक्तभक्तपान-शोधिकरणाय च प्रागुक्तकारणव्यतिरेकेण प्रायेणाऽनुज्ञातः, **इतरथा** तूक्तकारणव्यतिरेकेण **नानु**ज्ञातः ॥ ३५८७॥ ३५८८॥ एतच्च परिभाव्य ततः **आर्य**रक्षितैश्चिन्तितं प्रायः प्राणरक्षणाय संसक्तभक्तपानविशोधिकरणाय च मात्रकपरिभोगोऽनुज्ञातः। तत्र भूयसां प्राणानामप्कायप्रभृतीनां संसक्तभक्तपानानां च वर्षासमये [समुत्पत्तिः] तत **आर्य**रक्षितैः वर्षासु मात्रकपरिभोगोऽनुज्ञातः शेषकालं तु लोभप्रसङ्गनिवारणाय प्रतिषिद्धः

तथा चाह—

**गुणनिप्फत्ती बहुगी, दगमासे होहिति त्ति वितरंति।**
**लोभे पसज्जमाणे, वारेंति पुणो ततो मत्तं ॥ ३५८९ ॥**

**गुणनिष्पत्तिर्बह्वी दकमासे** वर्षारात्रे **भविष्यतीति** तत्प्रारम्भसमये भगवन्त **आर्यरक्षिता** मात्रकपरिभोगं **वितरन्ति** अनुजानन्ति, ऋतुबद्धे तु काले आचार्यादिप्रायोग्यग्रहणलक्षणं कारण-मतिरिच्याऽन्यत् कारणं न समस्ति, केवलं लोभ एव प्रसज्यते । तथाहि-यद्यत् उत्कृष्टं तत्

तत् लोभेन मात्रके गृह्णाति तत इत्थं **लोभे प्रसजति** तन्निवारणायाऽऽचार्यादिप्रायोग्यग्रहणाभावे **पुनर्मात्रकं तदा वारयन्ति**॥ ३५८९॥

**एवं सिद्धं गहणं, आयरियाणं कारणे भोगो।**
**पाणदयट्ठुवभोगो, बितियो पुण रक्खियज्जातो॥ ३५९० ॥**

**एवमुक्तप्रकारेण** मात्रकस्य **ग्रहणं सिद्धं** यतः सूत्रे **ओघनिर्युक्त्यादौ आचार्यादीनां कारणे** आचार्यादिप्रायोग्यग्रहणलक्षणेन कारणेन मात्रकस्य **भोगोऽ**नुज्ञातः, **द्वितीयः पुनरुपभोग आर्यरक्षितात् प्राणदयार्थं** प्रवृत्तः, कारणाभावे तु मात्रकपरिभोगे प्रायश्चित्तम् ॥ ३५९०॥



तदेवाह—

**जत्तियमेतां वारा, दिणेण आणेइ तत्तिया लहुगा।**
**अट्ठहिं दिणेहिं सपयं, निक्कारणमत्तपरिभोगे॥ ३५९१ ॥**

**निष्कारणं** कारणाभावे **मात्रकस्य परिभोगे यावन्मात्रान् वारान् दिवसेनै**केन तेन मात्रेण **आनयति तावतो लघुका** मासास्तस्य प्रायश्चित्तम्, **अष्टभिर्दिनैः स्वपदं** पुनर्व्रतारोपणं

मूललक्षणमष्टमं प्रायश्चित्तमिति भावः ॥ ३५९१ ॥

**जे बेंति न घेत्तव्वो, उ मत्तओ जे य तन्न धारेंति।**
**चउगुरुगा तेसि भवे, आणादिविराहणा चेव॥ ३५९२ ॥**

**ये ब्रुवते न ग्रहीतव्यो** मात्रकः, **ये च तं** मात्रकं **न धारयन्ति तेषां** प्रत्येकं प्रायश्चित्तं भवति **चत्वारो गुरुका आज्ञादयश्च** दोषाः, प्राणविपत्तेः संयम**विराधना च** ॥ ३५९२॥

अन्यच्च –

**लोए होइ दुगुंछा, विचारपडिग्गहेण उड्डाहो।**
**आयरियाई चत्ता, वारत्तथलीए दिट्ठंतो ॥ ३५९३ ॥**

यदि येनैव **पतद्ग्रहेण** भिक्षामटति तेनैव **विचारे** विचारभूमौ गच्छति तर्हि **लोके जुगुप्सा प्रजायते**। तथा च सति भवति प्रवचनस्य **उड्डाहः, आचार्यादयश्च** मात्रकापरिभोगे **त्यक्ताः**। अत्रार्थे **वारत्तस्थल्या दृष्टान्तः** ॥ ३५९३ ॥

उपसंहारमाह—

**तम्हा उ धरेयव्वो, मत्तो य पडिग्गहो य दोन्नेते।**
**गणणाए पमाणेण य, एवं दोसा न होंतेए॥ ३५९४ ॥**

यत एवं पात्रस्य मात्रकस्य च अधारणे दोषा**स्तस्मात् मात्रकं पतद्ग्रहश्च द्वावप्येतौ धारयितव्यौ** कथमित्याह- **गणनया** गणनामधिकृत्य एकैकः **प्रमाणतः** ओघनिर्युक्त्य-भिहितप्रमाणेन, **एवं चैते** अनन्तरोदिता **दोषा न भवन्ति**॥ ३५९४॥

अत्र पर आह—

**जइ दोण्ह चेव गहणं, अइरेगपरिग्गहो न संभवति।**
**अह देति तत्थ एगं, हाणी उड्डाहमादीया॥ ३५९५ ॥**

**यदि द्वयोरेव** पात्रक-मात्रयो**र्ग्रहणं** ततो**ऽतिरेको** अतिरिक्तः **पतद्ग्रहो न सम्भवति,** तदभावाच्च कथमध्वनिर्गतादीनां पतद्ग्रहं ददाति? देयस्याभावाद्,**अथा**त्मीयं तमेकं पतद्-ग्रहमध्वगादीनां **प्रयच्छति** स्वयं तु केवलेन मात्रकेण सारयति तत आह-अथ तयोः

पात्रमात्रकयोर्मध्ये **एकं** पतद्ग्रहं ददाति **तदा** द्वितीयस्य **हानिरिति** येनैव भिक्षामटति तेनैव विचारभूमावपि गच्छतीति लोके जुगुप्साप्रसङ्गतः प्रवचनस्य **उड्डाहः, आदिशब्दा**दाचार्यादयश्च तेन परित्यक्ता इति परिग्रहः। तस्मादफलं सूत्रमनवकशादिति । आचार्यो ब्रवीति-सूत्रनिपातः खल्वयं कारणिकः, किं तत् कारणम्? इति चेद्, अत आह—

**अतिरेगदुविहकारण, अभिणवगहणे पुराणगहणे य ।**
**अभिणवगहणे दुविहे, वावारिय अप्पछंदे य ॥ ३५१६ ॥**

**द्विविधेन कारणेन** द्वाभ्यां कारणाभ्या**मतिरेकस्या**ऽतिरिक्तस्य पतद्ग्रहस्य सम्भवः । तद्यथा-**अभिनवग्रहणेन पुराणग्रहणेन च** । तत्र यत्त**दभिनवग्रहणं** तद् **द्विविधं** द्विप्रकारम्, तद्यथा-**व्यापारिताश्च** गृह्णन्ति **आत्मछन्दसा च** । गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात्, तच्च द्विविधमप्यभिनवग्रहणमेभिः कारणैर्भवति ॥ ३५१६॥

**भिन्ने व झामिते वा, पडिणीए तेणसाणमादिहिते ।**
**सेहोवसंपयासु य, अभिनवगहणं तु पायस्स ॥ ३५१७ ॥**

प्रमादतो **भिन्नं** वाऽग्रेतनं पात्रम्, अग्निना वा **ध्यामितं** दग्धं, **प्रत्यनीकेन** हतं भिन्नं वा, **स्तेनैः श्वादिभिर्वा हृतम्,** आदिशब्देनाऽत्र शृगालादिपरिग्रहः, **शैक्षका** वा केचिदुपसंपन्नास्तेषु भाजनानि दातव्यानि। एतैः कारणैर**भिनवस्य पात्रस्य ग्रहणं** भवति॥ ३५९७ ॥

**देसे सव्वुवहिम्मी, अभिग्गही तत्थ होंति सच्छंदा।**
**तेसिऽसति निजोएज्जा, जे जोग्गा दुविहउवहिम्मि ॥ ३५९८ ॥**

**तत्र** तेषां व्यापारितानां स्वच्छन्दसां च मध्ये **स्वच्छन्दसो भवन्ति अभिग्रहिण** आभिग्रहिकाः, ते च आभिग्रहिका द्विविधा भवन्ति। तद्यथा-**देशे-सर्वस्मिंश्चोपधा**वुत्पाद्ये, किमुक्तं भवति? एके एवमभिग्रहं प्रतिपन्ना यथा उपधिदेशं पात्रादिकं वयमुत्पादयिष्यामः, अपरे चैवं प्रतिपन्नाः सर्वमुपधिमुत्पादष्यिामः। ते चाऽऽभिग्रहिका भाजनैः कार्यमन्येन चोपधिना कार्यमिति ज्ञात्वा तदुत्पादनाय अव्यापारिता एव गच्छन्ति। अत एव ते आत्मछन्दस उच्यन्ते, आत्मनैव परप्रेरणाऽभावेनैव उपधेरानयनाय छन्दोऽभिप्रायो विद्यते येषां ते आत्मछन्दस इति व्युत्पत्तेः, **तेषामसति** अभावे यें योग्याः समर्था **द्विविधे** औघिके औपग्रहिके **चोपधा**वुत्पाद्ये तानाचार्यो **नियुङ्क्ते** व्यापारयति ॥ ३५९८॥

**दुविहा छिन्नमछिन्ना, भणंते लघुको य पडिसुणंते य।**
**गुरुवयण दूरे तत्थ उ, गहिए गहणे य जं वुत्तं ॥ ३५९९ ॥**

आभिग्रहिका अपि आचार्यमापृच्छ्य पात्राणामानयनाय गच्छन्ति, ये वा नियुक्ताः, एते **द्विविधाः**, तद्यथा-**छिन्ना अछिन्नाश्च**, छिन्ना नाम ये आचार्येण सन्दिष्टाः, यथा- 'विंशतिः पात्राण्यानयितव्यानि', अच्छिन्ना येषां न परिमाणनिरोधः। तत्र ये तावन्नियुक्तास्तेषां छिन्नानां विधिरुच्यते-तत्र छिन्नेषु त्रिभिः प्रकारैरतिरिक्तपतद्ग्रहसम्भवः। तत्राद्येऽपि प्रकारे त्रयः प्रकाराः, तद्यथाः एकः साधुः छिन्नानां सन्देशं श्रुत्वा तत्रैव समक्षमाचार्यस्य ब्रूते- 'क्षमाश्रमणा! अनुजानीत युष्माकं योग्येषु परिपूर्णेषु पतद्ग्रहेषु लब्धेषु यद्यन्यान्यपि लभेरन् ततस्तान्यपि मम योग्यानि गृह्णन्तु' एवं ब्रुवाणः शुद्धः। अथैवमाचार्यं नानुज्ञापयति किन्त्वेवमेव तान् व्रजतो ब्रूते तर्हि तस्मिन्नेवं **भणति** प्रायश्चित्तं **लघुको** मासः। ते चेत् व्रजन्तः **प्रतिशृण्वन्ति**- 'ग्रहीष्याम इति' तदा तेषामपि प्रायश्चित्तं प्रत्येकं लघुको मासः। द्वितीयो व्रजतस्तान् साम्भोगिकान् दृष्ट्वा ब्रवीति- 'क्व यूयं सम्प्रस्थिताः?' तैरवाचि- 'पात्राणामानयनायाऽऽचार्येण प्रेषिताः', ततस्तान् स ब्रूते- 'यावन्ति युष्माकं सन्दिष्टानि तावत्सु परिपूर्णेषु यद्यन्यानि यूयं लभध्वं ततोऽस्माकं कारणेन

तान्यपि प्रतिगृह्णीत' एवं भणति तस्मिन् प्रायश्चित्तं लघुको मासः। तेऽपि यदि प्रतिशृण्वन्ति तदा तेषामपि प्रत्येकं प्रायश्चित्तं लघुको मासः। तृतीयो लज्जालुतया न शक्नोति स्वयमाचार्यान् विज्ञपयितुं ततोऽन्येन विज्ञपयति। अथवा कोऽपि शठत्वेन अन्यान् भाणयति, यथा ये ते प्रेष्यन्ते ते ब्रुवते 'यूयमाचार्यान् भणत युष्माकं परिपूर्णेषु लब्धेषु यद्यन्यान्यपि लभध्वं तदा मम कारणेन प्रतिगृह्णीत'। एवं भणति तस्मिन् प्रायश्चित्तं लघुको मासः। तेऽपि यदि यः शठत्वेन भाणयति तस्य यदीच्छन्ति तर्हि तेषां प्रायश्चित्तं मासलघु। तस्मात् तैर्नेष्टव्यं, यथा- 'न भणाम इति। लज्जालोर्वचनेन पुनराचार्यं भणन्ति। तत्र यदा तत्समक्षमाचार्यो भणितः, आचार्येण च समनुज्ञातं तदा यल्लभ्यते अतिरिक्तं लक्षणयुक्तमयुक्तं वा तस्यैव दातव्यम्। द्वितीयं प्रकारमाह **गुरुवयणे**त्यादि, कोऽपि पथि गच्छतो दृष्ट्वा ब्रूते 'यथा ममापि योग्यानि भाजनानि गृह्णीत'। तत्र यदि प्रत्यासन्नस्तदा तद्वचनं प्रतिग्राह्यम्। किमुक्तं भवति ? आसन्नप्रदेशात् प्रतिनिवृत्त्य गुरुराप्रच्छनीयो यथा- 'अमुकसाधुरेवं ब्रवीति- ममाप्यर्थाय भाजनानि प्रतिगृह्णीत'। अथवा तमेव प्रेषयति 'त्वमेवाचार्यं विज्ञपय' एवं कुर्वत्सु तेषु प्रायश्चित्तं मासलघु। अथ दूरे गतांस्तान् साम्भोगिकान् दृष्ट्वा ब्रूयुरस्माकमपि योग्यानि भाजनानि गृह्णीत, तत्रैवं वक्तव्यम् अतिरिक्तान्यपि

भाजनानि प्रतिग्रहीष्यामः परं तत्र प्रमाणं गुरवः तथा चाह-**तत्र** तु **दूर**गतानां प्रार्थने सति **गृहीते** च तद्योग्ये पात्रे गुरवः प्रमाणीकर्त्तव्याः। तृतीयो विंशतेरधिकं लक्षणयुक्तं पात्रं दृष्ट्वा स्वयं गृह्णाति एवं स्वयं **ग्रहणे** च **यदुक्तं** सूत्रे तत् सम्भवति अतिरिक्तं पात्रं सम्भवतीति गाथार्थः ॥ ३५९९ ॥

साम्प्रतमेनामेव विवरीषुराह—

**गेण्हह वीसं पाते, तिन्नि पगारा उ तत्थ अतिरेगे ।**
**तत्थेव भणति एगो, मज्झ वि गेण्हेज्ज हा अज्जो ! ॥ ३६०० ॥**

**गृह्णीत विंशतिपात्राणि** इत्युक्ते **तत्रातिरेके त्रयः प्रकारा** भवन्ति **एकस्तत्रैवा**ऽऽचार्य-मनुज्ञाप्य **ब्रूते 'ममापि** योग्यानि आर्य! भाजनानि **गृह्णीत**' ॥ ३६०० ॥

**आयरिए भणाहि तुमं, लज्जालुस्स व भणंति आयरिए।**
**नाऊण व सढभावं, निच्छंतिहरा भवे लहुगो ॥ ३६०१ ॥**

अपरोऽन्यं ब्रूते- **त्वमाचार्यान् भण** यथा अमी आचार्येणाऽनुज्ञाता अधिकान्यपि भाजनानि

प्रतिगृह्णन्ति। तत्र यो **लज्जालुतया** आचार्यान् विज्ञपयितुं न शक्नोति तस्य कारणेन **भणन्ति** च **आचार्यान्** यदि वा **शठभावं** तस्य **ज्ञात्वा** आचार्यान् विज्ञपयितुं **नेच्छन्ति, इतरथा** शठभावेऽपि ज्ञाते यदि विज्ञपयन्ति तदा तेषां प्रायश्चित्तं **भवति लघुको** मासः॥ १६०१ ॥

**जइ पुण आयरिएहिं, सयमेव पडिस्सुयं भवति तस्स ।**
**लक्खणमलक्खणजुयं, अतिरेगं जं तु तं तस्स ॥ ३६०२ ॥**

**यदि पुन**स्तस्य लज्जालोः कारणेनाचार्यास्तस्य समक्षं विज्ञप्ताः **आचार्यैश्च स्वयमेव** तस्य लज्जालोरतिरिक्तपात्रग्रहणं **प्रतिश्रुत**मङ्गीकृतं तदा यल्लभ्यते **अतिरिक्तं** पात्रं **लक्षणयुक्तम्** अलक्षणयुक्तं वा **तत् तस्य** दातव्यम् ॥ ३६०२ ॥

गत एकः प्रकारः, द्वितीयं प्रकारमाह—

**बितितो पंथे भणती, आसन्नाऽऽगंतु विन्नवेंति गुरुं ।**
**तं चेव पेसवंती, दूरगयाणं इमा मेरा ॥ ३६०३ ॥**

**द्वितीय**स्तान् **पथि** दृष्ट्वा **भणति**– 'ममापि योग्यानि भाजनानि प्रतिगृह्णीत'। एवं प्रार्थिता

यदि ते आसन्ना वर्त्तन्ते तदा **आगत्य गुरुं विज्ञपयन्ति**। यथा- 'अमुकः साधुर्वदति मम योग्यानि भाजनानि प्रतिगृह्णीत'। अथवा **तमेव** साधुमभ्यर्थयमानं **प्रेषयन्ति** यथा 'त्वमेवाचार्यं विज्ञपय'। तेषामेवं कुर्वतां प्रायश्चित्तं मासलघु। **दूरगतानां पुनरियं** वक्ष्यमाणा **मर्यादा** सामाचारी ॥ ३६०३ ॥

तामेवाह—

**गेण्हामो अतिरेगं, तत्थ पुण वियाणगा गुरु अम्हं ।**
**देहिंति तगं वऽण्णं, साहारणमेव ठावेंति ॥ ३६०४ ॥**

दूरगतान् साम्भोगिकः साधुरवलोक्य ब्रूते- अस्माकमपि योग्यं पात्रमाददीध्वम् ततस्तैरिदं वक्तव्यम् '**अतिरिक्तं** पात्रं **ग्रहीष्यामः । तत्र पुनर्विज्ञायका अस्माकं गुरवः तदेव** वा अतिरिक्तं पात्रं **दास्यन्ति अन्यद्वा**, को जानाति कदाचिदतिरिक्तं पात्रं सुन्दरमिति कृत्वा स्वयं प्रतिगृह्णन्ति यस्य वा इष्टं तस्मै ददति' **एवं साधारणं स्थापयन्ति** ॥ ३६०४ ॥

उक्तो द्वितीयः प्रकारस्तृतीयमाह—

**तइतो लक्खणजुत्तं, अहियं वीसाए ते सयं गेण्हे ।**
**एए तिन्नि विगप्पा, होंतइरेगस्स नायव्वा ॥ ३६०५ ॥**

**तृतीयः** प्रकारः पुनरयं- ते प्रेषिताः साधवो **विंशतेरधिकं** पात्रं **स्वयमेव गृह्णन्ति। एते त्रयो विकल्पा अतिरिक्तस्य** पात्रस्य सम्भवाय **ज्ञातव्याः**- तदेवं व्यापारितानां छिन्नानि गतानि ॥ ३६०५ ॥

साम्प्रतमाभिग्राहिकाणां छिन्नानि प्रतिपादयितुमाह—

**सच्छंदपडिवन्नवणा, गहिए गहणे य जारिसं भणियं ।**
**अलथिरधुवंधरणियं, सो वा अण्णो व णं धरए ॥ ३६०६ ॥**

**स्वच्छन्दा** नाम आभिग्रहिकास्ते अव्यापारिता एवाऽऽचार्यानापृच्छ्य गतास्ते यदि छिन्नाः सन्दिष्टास्ततस्तेषामपि सैव सामाचारी या प्राक् व्यापारितानां छिन्नानामुक्ता **पडिवण्णवण**त्ति, प्रतिज्ञापना नाम-विधिना पात्रादीनां मार्गणा कर्त्तव्या इत्युपदेशदानम्, उद्गमादिशुद्धानि पात्रादीनि प्रतिग्राह्याणीत्युपदेशदानमिति भावः। तथा **गृहीते ग्रहणे च यादृशं** कल्पाध्ययनपीठिकायां

**भणितं** तादृशं कर्त्तव्यम् । तत्र यावन्ति सन्दिष्टान्याचार्येण तावन्ति गृहीतानि, यदि न केनचित् भणितपूर्वं यथा ममापि योग्यं पात्रं ग्राह्यमिति तदा **अलं** समर्थं **ध्रुवं** चिरकालावस्थायि पात्रं **धरणीय**मिति न्यायमनुसृत्य ते चिन्तयन्ति-प्रायोग्यमेतत् पात्रं, तस्मात् गृह्णीमो गृहीते **स** एव ग्राहकश्चिन्तयति अहमाचार्यानुज्ञातं धारयिष्यामि, यदि **वा** स एवाचार्यो धारयिष्यति **अन्यो** वा साधु**र्धारयिष्यति** एवमतिरिक्तपतद्ग्रहसम्भवः ॥ ३६०६ ॥

सम्प्रति ग्रहणे गृहीते च यत् भणितं **कल्प**पीठिकायां तं चेव विनेयजनानुग्रहाय दर्शयति—

**ओमंथपाणमादी, गहणे तु विहिं तओ पउंजंति ।**
**गहिए य पगासमुहे, करेंति पडिलेह दो काले ॥ ३६०७ ॥**

**अवमन्थ**मधोमुखं कृत्वा **प्राणादीन्** खोटनेन भूमौ यतनया पातयन्ति, अमुं **विधिं** तत्र **ग्रहणे प्रयुञ्जन्ति, गृहीते** च तानि पात्राणि **प्रकाशमुखानि करोति,** तथा **द्वौ कालौ** प्रातरपराह्ले च **प्रत्युपेक्ष्यते** ॥ ३६०७ ॥

सम्प्रति तेषु पात्रेष्वानीतेषु विधिमाह—

**आणीतेसु उ गुरुणा, दोसुं गहिएसु तो गया जहावुड्ढं ।**
**गेण्हंति उग्गहे खलु, ओमादी मत्त सेसेवं ॥ ३६०८ ॥**

**आनीतेषु तु** भाजनेषु आचार्येण प्रधानं सलक्षणं पात्रं मात्रकं च परिग्रहीतव्यम्, ततो **गुरुणा द्वयोः** गृहीतयोः शेषाणि भाजनानि यावतां दातव्यानि तावन्तो भागाः क्रियन्ते, **ततो** ये **गतास्ते यथावृद्धं** यथारत्नाधिकतया पतद्ग्रहान् गृह्णन्ति, तदनन्तरं ये गतानामेवाऽवमरत्नाधिकास्ते यथारत्नाधिकतया मात्रकाणि गृह्णन्ति, तदनन्तरं यैः पतद्ग्रहा न गृहीतास्ते **अवमरत्नाधिकाः शेषाश्च** साधवो यथारत्नाधिकतया पतद्ग्रहान् **मात्रकाणि** च गृह्णन्ति। तदेवं व्यापारितानां स्वच्छन्दसां च छिन्नानि गतानि ॥ ३६०८ ॥

साम्प्रतमेतेषामेव द्वयानां अछिन्नानि बिभणिषुरिदमाह—

**एमेव अछिन्नेसु वि, गहिए गहणे य मोत्तु अतिरेगं ।**
**एत्तो पुराणगहणं, वोच्छामि इमेहिं उ पदेहिं ॥ ३६०९ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एवमेव** पूर्वोक्तेनैव प्रकारेण **अछिन्नेषु** पात्रेषु ग्रहीतव्येषु **गृहीते ग्रहणे** च विधिरनुसरणीयो **मुक्त्वा अतिरेकम्** । किमुक्तं भवति ? अतिरिक्तः पतद्ग्रहस्तत्र न सम्भवति परिमाणाऽकरणाद् इति तत्सम्भवविधिर्न वक्तव्यः । सम्प्रति **पुराणग्रहणमेभिर्**वक्ष्यमाणैः **पदैर्वक्ष्यामि** ॥ ३६०९ ॥

तान्येव पदान्याह—

**आगम१गम२कालगते३, दुल्लभतम४कारणेहिं एएहिं ।**
**दुविहा एगमणेगा, अणेगनिद्दिट्ठऽनिद्दिट्ठा ॥ ३६१० ॥**

**आगमद्वारं गमद्वारं कालगतद्वारं दुर्लभद्वारमेतैः** कारणैस्तत्र गच्छे पुराणग्रहणसम्भवः । तत्र ये पात्राणि ददति ते **द्विविधाः** , तद्यथा-**एको** वा **अनेके** वा, येषामपि ददाति तेऽपि द्विविधा-एको वाऽनेके वा, दानं च निर्देशपूर्वकं, यथा- अमुकस्य दास्यामि। तत्र यदा एकस्य ददाति तदा तन्निर्दिशति अमुकस्य दास्यामि, ये **त्वनेके [ ते ]निर्दिष्टा अनिर्दिष्टा** वा, अपरिमितसङ्ख्याकतया निर्देशाऽकरणात्। एष द्वारगाथासङ्क्षेपार्थः॥ ३६१० ॥

साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतः आगमद्वारमाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भायण देसा एंतो, पाए घेत्तूण एति दाहं ति१ । दारं १।**
**दाऊणऽवरो गच्छति, भायण देसं तहिं घेच्छं ॥ ३६११ ॥**

**भाजनदेशात्** यस्मिन् देशे भाजनानि सम्भवन्ति तस्मात् देशाद् **आनन्दपुराद्** वाऽऽ**गच्छन्** आगन्तुकामः पूर्वकृतानि **भाजनानि गृहीत्वा समागच्छति** साधुभ्यो **दास्यामीति** बुद्ध्या, गतमागमद्वारम्। अधुना गमद्वारमाह—**अपरः** साधुरानन्दपुरादिकात् देशात् **भाजनदेशं** गन्तुका**मस्तत्र**- अन्यान्यपि पात्राणि **ग्रहीष्यामि** सुलभत्वात् इति पुराणानि पात्राणि **दत्त्वा** गच्छति, गतं गमद्वारम् ॥ ३६११ ॥

इदानीं कालगतद्वारमाह—

**कालगयम्मि सहाये, वऽन्नस्स होइ अतिरेगं।**
**पत्ते लंबऽतिरेगे, दुल्लहपाए विमे पंच ॥ ३६१२ ॥**

कस्यापि साधोः **सहायः कालगतः** प्रतिभग्नो वा, ततस्तस्य **पात्रमतिरिक्तं लम्बते** इत्य**न्यस्य** द्वितीयस्य साधो**रतिरिक्तं** पुराणं पात्रं च **भवति** तदन्यस्मै ददाति । गतं



For Private and Personal Use Only

कालगतद्वारम् अधुना दुर्लभद्वारमाह-दुर्लभानि पात्राणि यस्मिन् देशे स **दुर्लभपात्र**स्तस्मिन्नपि **इमानि** वक्ष्यमाणानि[**पञ्च**] भाजनानि धारयेत् ॥ ३६१३ ॥

तान्येवाह—

**नंदिपडिग्गह विपडिग्गहो य तह कमढगं विमत्तो य ।**
**पासवणमत्ततो वि य, तक्कज्जपरूवणा चेव ॥ ३६१३ ॥**

यस्मिन् देशे पात्राणि दुर्लभानि तत्रेमान्यतिरिक्तानि ध्रियन्ते, तद्यथा-**नन्दीपतद्ग्रहो विपतद्ग्रहः कमढकं विमात्रकं प्रश्रवणमात्रकं च। तत्कार्यप्ररूपणा चैवं** कार्या-नन्दीपतद्ग्रहोऽतिशयेन महान् पतद्ग्रहः, तेनाऽध्वनि अवमौदर्ये परचक्राऽवरोधे च प्रयोजनम्। तथा च कश्चित् ब्रूयात् 'दिने दिने युष्माकमहमेकं पात्रं भरिष्यामि' ततस्तत् नन्दीपात्रं भार्यते, एतेन कारणेन गच्छोपग्रहनिमित्तं धार्यते । विपतद्ग्रहः पतद्ग्रहात् किञ्चिदूनः, स एतदर्थं धार्यते कदाचित् पतद्ग्रहो भिद्येत अन्यच्च भाजनं तस्मिन् देशे दुर्लभं तत एतेन कार्यं भविष्यतीति । कमढकः सागारिकरक्षणाय ध्रियते, तथा च कदाचिदेकाकी जायते तत्र च

भक्तं पतद्ग्रहे गृहीतं पानीयं मात्रके, यत्र च भोजनकरणार्थमवतीर्णस्तत्र सागारिकाः, ततो यत्रैव भिक्षां गृह्णाति तत्रैव भुङ्क्ते तथा च सति महती छोतिरिति जुगुप्सा क्रियेत, ततस्तद्रक्षणाय कमढके भोजनं करोति। तथा विमात्रको मात्रकात् मनाक् समधिक ऊनतरो वा, तत्र मात्रकं कदाचिद् भिद्येत अन्यच्च तत्र देशे भाजनं दुर्लभं तत एतेन प्रयोजनं भविष्यतीति स ध्रियते। प्रश्रवणमात्रकोऽपि सागारिकभयेन यतनाकरणाय ग्लानस्याऽऽचार्याणां वाऽर्थाय ध्रियते, एषा तत्कार्यप्ररूपणा॥ ३६१३॥ सम्प्रति 'दुविहा एगमणेगा' इत्यादिव्याख्यानार्थमाह—

**एगो निद्दिस एगं, एगो अणेगा अणेग एगं वा ।**
**णेगाणेगे ते पुण, गणिवसभे भिक्खुखुड्डे य ॥ ३६१४ ॥**



ये पात्राणि प्रयच्छन्ति ते द्विविधाः तद्यथा- एको वा, स्यादनेके वा, येभ्योऽपि ददति पात्राणि तेऽपि द्विविधा- एको वा स्यादनेके वा, तत्रैको नियमतोऽनेके [च] विकल्पतो निर्देश्या भवन्ति। अत्र चतुर्भङ्गिका **एको** दाता **एकं** सम्प्रदानं **निर्दिशति** 'आचार्यस्यामुकस्य वृषभस्य भिक्षोः क्षुल्लकस्य वा दास्यामि' एष प्रथमो भङ्गः। **एकोऽनेका**न्निर्दिशतीति द्वितीयः। **अनेके एक**मिति तृतीयः। **अनेके अनेका**निति चतुर्थः। **ते पुन**र्निर्देश्याः के इत्याह—**गणी वृषभो**

**भिक्षुः क्षुल्लकश्च,** गणी द्विविध आचार्य उपाध्यायश्च। एवमेते पञ्च भवन्ति। या अपि स्त्रियो निर्दिशति ता अपि पञ्च, तद्यथा-प्रवर्त्तिनी अभिसेच्या भिक्षुकी स्थविरा क्षुल्लिका च ॥ ३६१४॥

तथा चाह—

**एमेव इत्थिवग्गे, पंचगमा अहव निद्दिसति मीसे ।**
**दाउं वच्चति [1]पेसेति वा वि णिंते पुण विसेसो ॥ ३६१५ ॥**

**एवमेव** अनेनैव संयतगतेन प्रकारेण **स्त्रीवर्गे** संयतीवर्गे निर्दिश्यमाने **पञ्च गमा** भवन्ति। अथवा यत्रानेकान् **निर्दिशति** तत्र **मिश्रान्** निर्दिशति, संयतानपि निर्दिशति संयतीरपि। तदेतदागमद्वारेऽभिहितम्। सम्प्रति गमद्वारे वक्तव्यं, तत्रापि तथैव नवरं **दत्त्वा व्रजति प्रेषयति** वा[2] अग्रे गतः। **नीते पुनर्विशेषः** स चायं नीतानि तानि भाजनानि समाने निर्दिशति असमाने वा, संयतस्य समानो वर्गः संयतवर्गोऽसमानः संयतीवर्गः। अत्र च त एव चत्वारो भङ्गाः। तद्यथा-संयतः निर्दिशति संयतम्, संयतः संयतान्, संयताः संयतं, संयताः संयतान्, एवं

१. पेसे वावी - ला.॥ २. च-सं.॥

समाननिर्देशे चत्वारो भङ्गाः। एवमसमाननिर्देशेऽपि द्रष्टव्यास्तद्यथा-संयतः संयतीं निर्दिशति, संयतः संयतीः२ संयताः संयतीम्३ संयताः संयतीः४ एवं कालगते प्रतिभग्ने वा सहाये दुर्लभद्वारे च द्रष्टव्यम् ॥ ३६१५ ॥

**सच्छंदमणिद्दिट्ठे, पावणनिद्दिट्ठमंतरा देंति ।**
**चउलहु आदेसो वा, लहुगा य इमेसि अद्दाणे ॥ ३६१६ ॥**

तत्र यदि न **निर्दिष्ट**ममुकस्यामुकानां वा दातव्यमिति तदा **स्वच्छन्दो** यस्मै रोचते तस्मै ददाति, यदि पुन**र्निर्दिष्टं** ततो यन्निर्दिशति एकमनेकान् मिश्रान् वा तेषां दातव्यम्, एतन्निर्दिष्टे **प्रापणम्**[1]। अथ यस्य **निर्दिष्टं** सो अन्यत्र **अन्तरा** अपान्तराले अन्यस्मै **ददाति** तदा तस्मिन् अन्यस्मै ददति प्रायश्चित्तं **चत्वारो लघुकाः, आदेशो** वा अत्र विद्यते मतान्तरमप्यस्तीति भावः। तदिदं केषाञ्चित् मतेनान्यस्य दाने अनवस्थाप्यं तेषां प्रायश्चित्तमिति। तथा **अमीषां** वक्ष्यमाणाना**मदाने** चत्वारो लघवः॥ ३६१६॥

केषामित्याह—

---

**१. प्रमाणम् - सं.॥**

**अद्धाण बालवुड्ढे गेलन्ने जुंगिए सरीरेण ।**

**पायच्छि-नास-कर-कन्नं संजतीणं पि एमेव ॥ ३६१७ ॥** दारगाहा।

अध्वनि वर्तमानानाम**ध्वनिर्गतानाम्** इत्यर्थः, उपलक्षणमेतत् तेनावमौदर्यनिर्गतानाम्, अशिवनिर्गतानाम्, अन्तरा विस्मरणतः पतितोपधीनां, तथा **बालस्य वृद्धस्य ग्लानस्य शरीरेण जुङ्गितस्य** हीनस्य, केनाङ्गेन हीनस्येत्यत आह— **पादेनाक्ष्णा नासया करेण कर्णेन** वा एवमेव **संयतीना**मप्यदाने प्रायश्चित्तम्, एष द्वारगाथासङ्क्षेपार्थः॥ ३६१७ ॥

साम्प्रतमेनामेव विवरीषुराह—

**अद्धाण ओम असिवे, उदूढाण वि न देति जं पावे ।**

**बालस्सज्झोवाते, थेरस्सऽसती य जं कुज्जा ॥ ३६१८ ॥**

**अध्वनिर्गतानाम् अवमौदर्य**निर्गतानाम्, **अशिव**निर्गतानाम्, **उदूढानाम्** अन्तरा विस्मरणतः पतितस्तेनापहृतोपधीनां यदि **न ददाति** तदा प्रायश्चित्तं चत्वारो लघवः। **यच्च** भाजनैर्विना ते **प्राप्स्यन्ति** तन्निमित्तमपि तस्य प्रायश्चित्तं, गतमध्वद्वारम् । तथा **बालस्य** उत्कृष्टमात्रकं दृष्ट्वा

तद्विषये **अध्युपपात** उत्कृष्टोऽभिलाषो भवति ततः स मात्रकं याचते, स यत् याचते तत् तस्य दातव्यम्, अदाने चत्वारो लघुकाः, यतः स एतस्मिन्नदीयमाने रोदिति अधृत्या च महती परितापनोपजायते ततः शून्यचित्तो भवति, भूतेन वा ग्रस्यते, **वृद्धस्याप्य**दाने चत्वारो लघवः, स हि भाजनानि याचितुं न शक्नोति ततोऽदाने अधृत्या यत् प्राप्नोति [१]तन्निमित्तमपि तस्य प्रायश्चित्तमापद्यते । गतं बालद्वारं वृद्धद्वारं च ॥ ३६१८ ॥

सम्प्रति ग्लानद्वारमाह—

**अतरंतस्स अदेंते, तप्पडियरगस्स वा वि जा हाणी ।**
**जुंगितो पुव्वनिसिद्धो, जाति विदेसे य से पच्छा ॥ ३६१९ ॥**



**अतरतो** ग्लानस्य तत् प्रतिचारकस्य च यदि **न ददाति** तदा प्रायश्चित्तं त एव चत्वारो लघवः, तथा भाजनमृते **प्रतीचारकं** वा **विना या** ग्लानस्य **हानि**स्तन्निमित्तमपि तस्य प्रायश्चित्तम्। गतं ग्लानद्वारम्। जुङ्गितद्वारमाह-**जुङ्गितो** द्विविधः, जात्या शरीरेण च। जात्या [२]डोम्बादि इतरश्छिन्नपादो गताक्ष इत्यादि। एष द्विविधोऽपि **पूर्वमेव प्रतिषिद्धो** यथा प्रवाजयितुं न

१. तन्निष्पन्नमपि मु. पु. प्रे.॥ २. असाम्भोगिक इत० पु. प्रे.॥

कल्पते, केवलं यो **जातिजुङ्गितः** स **विदेशे** कथमप्यज्ञाततया प्रव्राजितः, इतरः शरीरेण जुङ्गितः प्रव्राजितस्सन् **पश्चात्** स्यात् ॥ ३६२० ॥

**जातीए जुंगितो पुण, जत्थ न नज्जइ तहिं तु सो अच्छे ।**
**अमुगनिमित्तं विगलो, इयरो जहिं नज्जइ तहिं तु ॥ ३६२० ॥**

यो **जात्या जुङ्गितो** विदेशे कथमप्यज्ञाततया प्रव्राजितः स **यत्र न ज्ञायते तत्र तिष्ठति, इतरः** पुनः प्रव्राजनानन्तरं पश्चात् शरीरेण जुङ्गितः, **यत्रामुकनिमित्तमेष विकलो** जात इति **ज्ञायते तत्र** तिष्ठति। अन्यत्र तिष्ठतो लोकानामप्रत्ययो भवति। केचिदेवं मन्यन्ते पारदारकादिभिरपराधैः प्रव्रजितो जुङ्गित इति ॥ ३६२० ॥

**जे हिंडंता काए, व हंति जे वि य करेंति उड्डाहं ।**
**किन्नु हु[1] गिहिसामन्ने, वियंगिता लोकसंका ऊ ॥ ३६२१ ॥**

**ये** जुङ्गिता **हिण्डमानाः** पादादिविकलतया **कायान्** पृथिवीकायप्रभृतीन् **घ्नन्ति, येऽपि च** दृश्यमानाश्छिन्ननाशिकादयः प्रवचनस्योड्डाहं **कुर्वन्ति** यांश्च दृष्ट्वा **लोकस्य शङ्को**पजायते

१. हि-पु. प्रे.॥

यथा **किन्नु हु** निश्चितं **गृहि सामान्ये व्यङ्गतां** गता अमी इति। तेषां भाजनानि दातव्यानि, अदाने चत्वारो लघवः। तथा हिण्डमाना यत् कायान् घ्नन्ति यच्च प्रवचनस्योड्डाहकरणं तन्निष्पन्नमपि तस्य प्रायश्चित्तम्॥ ३६२१ ॥

तथा—

**पाय-ऽच्छि-नास-कर-कण्ण जुंगिते जातिजुंगिते चेव ।**
**वोच्चत्थे चउलहुगा, सरिसे पुव्वं तु समणीणं ॥ ३६२२ ॥**

शरीरेण **जुङ्गिताः** पञ्च, तद्यथा-छिन्न**पादः**१ आक्षिविकलोऽक्षिकाणो वा२, छिन्न**नासः**३, छिन्न**करः**४, छिन्न**कर्णः**५, षष्ठो **जातिजुङ्गितः**। तत्र यदि षडपि जुङ्गिताः तत्र भाजनानि च दातव्यानि विद्यन्ते तदा सर्वेषामपि दातव्यानि। अथ सर्वेषामपि भाजनानि न पूर्यन्ते तर्हि यावतां पूर्यन्ते तावतामुपन्यस्तक्रमेण दातव्यानि, **विपर्यासे** उत्क्रमव्यत्यासेन दाने प्रायश्चित्तं **चत्वारो लघवः**। अथ संयताः संयत्यश्च जुङ्गिताः सन्ति तत्र भाजनसम्भवे सर्वेषामविशेषेण दातव्यम्,अथ तावन्ति भाजनानि[ न ]पूर्यन्ते ततः संयतसंयतीसमुदाये छिन्नपादादिक्रमेण दातव्यम्।

अथ संयतोऽपि छिन्नपादः संयत्यपि छिन्नपादा, एवं सर्वत्र विभाषा कर्त्तव्या; तत्राह— **सदृशे** जुङ्गितत्वे **पूर्वं श्रमणीनां** दातव्यम्। पश्चात् सति सम्भवे संयतानामन्यथा विपर्यासे त एव चत्वारो लघवः ॥ ३६२२॥

सम्प्रति निर्दिष्टस्य दाने विधिमाह—

**अह एते उ न होज्जा, ताहे निद्दिट्ठपायमूलं तु ।**
**गंतूण इच्छकारं, काउं तो तं निवेदेति ॥ ३६२३ ॥**

**अथ एते** अध्वनिर्गतादयः प्रागुक्ता **न स्युस्ततो** यस्य **निर्दिष्टं** तस्य **पादमूलं गत्वा** इदं पात्रं मया युष्मन्निमित्तमानीतमिच्छाकारेण गृह्णीत, एव**मिच्छाकारं कृत्वा निवेदयति** समर्पयति॥ ३६२३॥

**अद्दिट्ठे पुण तहियं, पेसे अहवा वि तस्स अप्पाहे ।**
**अह उ न नज्जइ ताहे, ओसरणेसुं तिसु वि मग्गे ॥ ३६२४ ॥**

अथ स **न दृष्टो** यस्य निर्दिष्टं ततोऽन्यस्य हस्ते कृत्वा **तत्र प्रेषयति** । **अथवा** साधुं

श्रावकं वा तत्र व्रजन्तं संदेशयति यथा 'तव योग्यं पात्रं मया आनीतम् इच्छाकारेणाऽऽगत्य गृह्णीत प्रेषयत वा कमपि यो नयतीति'। **अथ** पुनः स **न ज्ञायते** क्वापि तिष्ठतीति तत**स्त्रिषु** क्षुल्लकेषु **समवसरणेषु मृगयेत**। इयमत्र भावना- अज्ञायमाने समवसरणं साधुमेलापकरूपं गत्वा पृच्छति, यथा-'अमुकः कुत्र विद्यते?' तत्र यदि स्वरूपतो न दृष्टो नापि वार्त्तयोपलब्धस्तदा द्वितीये समवसरणे पृच्छ्यते। तत्राप्यदृष्टेऽनुपलब्धे वा तृतीयेऽपि पृच्छ्यते। एवं त्रिषु क्षुल्लकेषु समवसरणेषु मध्ये यत्रैकतरस्मिन् दृष्टस्तत्र तथैव समर्पयति, अथ न दृष्टः केवलमुपलब्धो वार्त्तया, यथा-अमुकस्थाने स तिष्ठतीति। स तत्र स्वयं वा नयति अन्यस्य वा हस्ते प्रेषयति ॥ ३६२४॥

अथ त्रिष्वपि समवसरणेषु न दृष्टो नाप्युपलब्धस्तत आह—

**एगे वि महंतम्मि उ, उग्घोसेऊण नाउ नेइ तहिं ।**
**अह नत्थि पवित्ती से, ताहे इच्छाविवेगो वा ॥ ३६२५ ॥**

**महति** समवसरणे पुनरे**कस्मिन्नपि** कुत्र अमुकः? **इत्युद्घोषणां** कृत्वा यदि स्वयं दृष्टस्तत इच्छाकारपुरस्सरं तथैव समर्पयति; अथ वार्त्तयोपलब्धस्तर्हि **तत्र** स्वयं **नयति** अन्यस्य वा

हस्ते प्रेषयति सन्देशयति वा। **अथ** तत्रापि **न** दृष्टो नाप्युपलब्धस्**ततो** द्वितीयं वारं महत् समवसरणं न गच्छति किन्तु **इच्छा** स्वयं तत्पात्रं धारयति, अन्यस्मै वा ददाति, **विवेगो वा** इति परिष्ठापयति वा॥ ३६२५ ॥

अथ येषां ददतामेकस्यानेकेषां वा सकाशात् ग्रहीतव्यं ते किं साम्भोगिका उताऽसाम्भोगिकाः ? एवं प्रश्ने कृते प्रथमत एकानेकप्ररूपणामाह—

**एगे उ पुव्वभणिते, कारणनिक्कारणे दुविहभेदो ।**
**आहिंडगओहाणे, दुविहा ते होंति एक्केक्का ॥ ३६२६ ॥**

**एक** एकाकी द्विविधभेदः **पूर्वमो**घनिर्युक्तौ **भणितः**, तद्यथा- **कारणे निष्कारणे** च, पुनः साधवो **द्विविधाः आहिण्डका अवधावने च, ते एकैके द्विविधा भवन्ति** वक्ष्यमाणभेदेनेति गाथासमासार्थः॥ ३६२६ ॥

सामप्रतमेनामेव विवरीषुः प्रथमतः कारणनिष्कारणैकैकप्रतिपादनार्थमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**असिवादी कारणिया, निक्कारणिया य चक्कथूभादी ।**
**उवएस अणुवदेसा, दुविहा आहिंडगा होंति ॥ ३६२७ ॥**

**अशिवादिभिः**, आदिशब्दादवमौदर्य-राजद्विष्टादिपरिग्रहः, कारणैरेकाकिनः **कारणिकाः**, **चक्र-स्तूपादौ**, आदिशब्दात् प्रतिमा-निष्क्रमणादिपरिग्रहः, तेषां वन्दनाय गच्छन्त एकाकिनो **निष्कारणिकाः**। ये **आहिण्डकास्ते द्विविधा भवन्ति**। तद्यथा- **उपदेशतोऽनुपदेशतश्च**। तत्र ये उपदेशेन ते द्वादश संवत्सराणि सूत्रं गृहीत्वा द्वादश संवत्सराणि तस्यैव सूत्रस्यार्थं गृहीत्वा य आचार्यकं कर्तुकामः स द्वादश संवत्सराणि देशदर्शनं करोति। तस्य व्रजतो जघन्येन सङ्घाटको दातव्यः, उत्कर्षेणानियताः साधवः। ये अनुपदेशेन देशदर्शनं कुर्वन्ति ते चैत्यानि वन्दिष्यामहे इत्यविधिं कृत्वा व्रजन्ति ॥ ३६२७॥

**आहाविंता दुविहा, लिंगे विहारे य होंति नायव्वा ।**
**एगागी छप्पेते, विहार[1] तहिं दोसु समणुन्ना ॥ ३६२८ ॥**

---

१. विहारे तहिं - पु. प्रे. । विहारे तेहिं - सं. सं. ॥



For Private and Personal Use Only

**अवधाविनो द्विविधाः, लिङ्गेन विहारेण च।** लिङ्गेन उत्प्रव्रजितुकामाः, विहारेण पार्श्वस्थविहारेण विहर्तुकामा **भवन्ति ज्ञातव्याः। षडप्येते** कारणिकाः१ निष्कारणिकाः२ औपदेशिकाः३ अनौपदेशिकाः४ लिङ्गेनावधाविनः५ विहारेणावधाविनश्च ६ प्रायेणैते एकाकिनो विहरन्ति गच्छेन वा। औपदेशिका यद्यपि नियमतः ससहायास्तथापि येन गच्छान्निर्गतास्तेन एकाकिनो भण्यन्ते, इतरेऽपि पञ्च यद्यपि वृन्देन हिण्डन्ते तथापि गच्छान्निर्गता इति एकाकिनः प्रोच्यन्ते। तत उक्तं **षडप्येते विहारिणः एकाकिनः, तर्हि** ति, तेषु षट्सु मध्ये **द्वयोः समनुज्ञा** द्वयोः साम्भोगिकत्वम्। तद्यथा- अशिवादिकारणिका उपदेशाऽऽहिण्डकाश्च एतैरानीतानि भाजनानि ग्रहीतव्यानि शेषैरानीतानां भजना, कारणे गृह्यन्ते निष्कारणे नेति ॥ ३६२८॥

**निक्कारणिएऽणुवदेसिए य आपुच्छिऊण वच्चंते ।**
**अणुसासंति ताहे उ, वसभाओ तर्हिं इमेर्हिं तु ॥ ३६२९ ॥**

**निष्कारणिकोऽनौपदेशिकश्च** यद्याचार्य**मापृच्छ्य** व्रजति **तदा** तत्र **व्रजने एभि**र्वक्ष्यमाणै-र्वचनै**र्वृषभा अनुशासति** ॥ ३६२९ ॥

कैर्वचनैः ? इत्याह—

**एसेव चेइयाणं, भत्तिगतो जो तवम्मि उज्जुमती ।**
**इइ अणुसिट्ठे अठिते, असंभोगायारभंडं तु ॥ ३६३० ॥**

'**एष एव चैत्यानां भक्तिगतो** भक्तिमुपागतो **यस्तपसि** द्वादश प्रकारे यथाशक्ति **उद्यच्छति' एवमनुशिष्यमाणो** यदि तिष्ठति ततः सुन्दरम्, अथ न तिष्ठति तर्हि तस्मिन्न**तिष्ठति** यत् तस्य साम्भोगिकमुपकरणं तन्निवर्त्यते इतर**दसाम्भोगिकमाचारभाण्डं** समर्प्यते ॥ ३६३०॥ अथ कथमसाम्भोगिकमाचारभाण्डमुपजातम् ? ॥ ३६३० ॥

अत आह—

**खग्गूडेणोवहयं, अमणुण्णेसागयस्स वा जं तु ।**
**असंभोगिय उवगरणं इहरा गच्छे तगं नत्थि ॥ ३६३१ ॥**

**यत्** उपकरणं **खग्गूडेनोपहतं** यदि वा यद् **अमनोज्ञेभ्यः** असम्भोगिकेभ्य **आगतस्यो**-पसम्पन्नस्य सम्बन्धि तद् **असाम्भोगिकमुपकरणमा**चारभाण्डम्:, **इतरथा** प्रकारद्वयव्यतिरिक्ते-नान्येन प्रकारेण **तकत्** असाम्भोगिकमुपकरणं **गच्छे नास्ति** न सम्भवति ॥ ३६३१ ॥

**तिट्ठाणे संवेगो, सावेक्खो नियत्तो तद्दिवससुद्धो ।**
**मासो वुत्थ विविंचण, तं चेवऽणुसट्ठिमादीणि ॥ ३६३२ ॥**

तस्य गच्छान्निर्गतस्य कदाचित् **त्रिभिः स्थानैः संवेगः** स्यात्, गाथायां सप्तमी प्राकृतत्वात्, एकवचनं समाहारत्वात्। तद्यथा- ज्ञानेन दर्शनेन चारित्रेण च। ततः संवेगसमापन्नः **सापेक्षः** प्रति**निवर्त्तते**। स च यदि **तस्मिन्नेव दिवसे** गच्छं प्रत्यागतस्तर्हि **शुद्धो**, अथ मासं यावद् बहि**रुषित**स्तदा **तदेव** तदुपकरणस्य **विवेचनं** प्रायश्चित्तदानम**नुशिष्ट्यादीनि** च क्रियन्ते, आदिशब्दादुपबृंहणादिपरिग्रहः ॥ ३६३२ ॥

सम्प्रति स्थानत्रयेण संवेगभावनामाह—

**अज्जेव पाडिपुच्छं, को दाहिइ संकियस्स मे उभये ?।**
**दंसणे कं उववूहे ?, कं थिरकरे ? कस्स वच्छल्लं ? ॥ ३६३३ ॥**
**सारेहिति सीयंतं, चरणे सोहिं च काहिति[१] को मे ।**
**एवं नियत्तणुलोमं, काउं उवहिं च तं देंति ॥ ३६३४ ॥**

---

१. कहिति- सं. ॥

**अद्यैव उभयस्मिन्** सूत्रे अर्थे च **शङ्कितस्य मम कः प्रतिपृच्छां दास्यति** ? एषा ज्ञाने चिन्ता, **दर्शने कम**हमिदानी**मुपबृंहिष्यामि**? **कं** वा **स्थिरीकरिष्यामि**? **कस्य** वा **वात्सल्य**मधुना करिष्यामि? चारित्रे चिन्ता मां **चरणे सीदन्त**मिदानीं कः **सारयिष्यति? को** वा **मे** प्रायश्चित्तस्थानमापन्नस्य शोधिं करिष्यति? एवं चिन्तयन् संवेगमापन्नः सन् प्रतिनिवर्त्तते। तस्य च प्रति**निवृत्तस्य** गच्छं प्रत्यागतस्याऽ**नुलोमना कर्त्तव्या**। 'धन्योऽसि त्वं येनात्मा प्रत्यभिज्ञातः' एवमनुलोमनां कृत्वा तस्य **तमेवोपधिं प्रयच्छन्ति** ॥ ३६३३ ॥ ३६३४ ॥

सम्प्रत्यवधाविनमधिकृत्य प्रतिपिपादयिषुराह—

**दुविहोहाविं वसभा, सारेंति भयाणि वा से साहिंति ।**
**अट्ठारस ठाणाइं, हयरस्सि-गयंकुसनिभाइं ॥ ३६३५ ॥**

**द्विविधमप्यवधाविन**माचार्यमापृच्छ्य व्रजन्तं **वृषभाः सारयन्ति** शिक्षयन्ति **भयानि** वा **से** तस्य **साधयन्ति** कथयन्ति **रतिवाक्य**चूलिकाभिहितानि **अष्टादशस्थानरूपाणि हयरश्मि-**

**गजाङ्कुशनिभानि** । एतया अनुशिष्ट्या अनुशासितो यदि[1] तिष्ठति ततः सुन्दरम्, अथ न तिष्ठति तर्हि यत् खग्गूडेनोपहतमाचारभाण्डं यद्वा असाम्भोगिकेभ्यः समागतस्योपसम्पन्नस्य सम्बन्धि, तत् तस्य दीयते अग्रेतनं तु साम्भोगिकमुपकरणं निवर्त्त्यते ॥ ३६३५ ॥

**संविग्गमसंविग्गे, सारूवियसिद्धपुत्तमणुसट्ठे ।**
**आगमणं आणयणं, ते वा घेत्तुं न इच्छंती ॥ ३६३६ ॥** दारगाहा।

**संविग्नाः** साम्भोगिकाः असाम्भोगिका वा उद्यतविहारिणः, **असंविग्नाः** पार्श्वस्था-ऽवसन्न-कुशील-संसक्त-यथाछन्दाः **सारूपिक[2]-सिद्धपुत्रो** नाम मुण्डितशिरष्को रजोहरण-रहितोऽलाबुपात्रेण भिक्षामटन् सभार्योऽभार्यो वा। एतैर**नुशिष्टस्य** यदि **आगमनं** तत उपहतोपकरण-स्याऽनुपहतोपकरणस्य वा प्रायश्चित्तदानं, **ते वा** संविग्नादयो **गृहीत्वा** तस्याऽऽ**नयनं** कुर्वन्ति। अथ स आनयनं **नेच्छति** तदा वक्ष्यमाणो विधिः, एष गाथासङ्क्षेपार्थः ॥ ३६३६ ॥

साम्प्रतमेनामेव व्याचिख्यासुराह—



---

१. यस्तिष्ठति- सं. ॥ २. अग्रे गा.३६५१ टीकायां सिद्धपुत्रः सकेशः, सारुपिकः मुण्डः इति ॥

**संविग्गाण सगासे, वुत्थो तेहि अणुसासिय नियत्तो ।**
**लहुगो नोवहम्मति, इयरे लहुगा उवहतो य ॥ ३६३७ ॥**

यदि **संविग्नानां [ सकाशे ] समीपे उषितस्तैश्चानुशिष्टः** प्रतिनिवृत्तो वसतिमागतस्तदा तस्य प्रायश्चित्तं **लघुको** मासः, **न** च तस्योपधि**रुपहन्यते,** यं चान्तरा लभते गृह्णाति चोपधिं सोऽपि नोपहन्यते। संविग्नानां समीपे उषितत्वात् संविग्नैः सहाऽऽगमनाच्च। **इतरे** नाम असंविग्नाः पार्श्वस्थादयः सारूपिकः सिद्धपुत्रश्च, तेषां समीपे यद्युषितस्तैश्चानुशिष्टः प्रतिनिवृत्तः, तस्याऽऽगतस्य प्रायश्चित्तं चत्वारो **लघवः**, उपकरणं च तस्यो**पहन्यते,** यथाछन्दस्य सकाशे उषितस्य चतुर्गुरुकम् ॥ ३६३७ ॥

साम्प्रतमागमनद्वारमाह—

**संविग्गादणुसिट्ठो, तद्दिवस नियत्तो जइ वि न मिलेज्जा ।**
**न य सज्जइ वइयादिसु चिरेण वि हु तो न उवहम्मे ॥ ३६३८ ॥** दारं।

**संविग्नैः** आदिशब्दादसंविग्नैश्चाऽ**नुशिष्टो** यदि तत्र नोषितः किन्तु **तस्मिन्नेव दिने**

**प्रतिनिवृत्तो यद्यपि** तस्मिन्नेव दिने **न मिलति न च व्रजिकादिषु सजति** ततश्चिरेणाप्यागच्छतो हु निश्चितं तस्योपकरणं **नोपहन्यते,** आनीयमानस्य तूपहन्यते ॥ ३६३८ ॥

एतदेवाह—

**एगाणियस्स सुवणे, मासो उवहम्मते य से उवही ।**
**तेण परं चउ लहुगा, आवज्जइ जं च तं सव्वं ॥ ३६३९ ॥**

बलादानीयमान एकाकी समागच्छन् यदि रात्रौ स्वपिति तदा तस्यै**काकिनः स्वपने** प्रायश्चित्तं लघुको **मासः उपधिश्च तस्योपहन्यते**। अथ **तस्मा**द्दिवसात् **पर**मपि लगति तदा तस्य प्रायश्चित्तं **चत्वारो लघुकाः**। अथ व्रजिकादिष्वपान्तराले सजति **यच्च** तत्र **प्राप्नोति** तन्निष्पन्नं **सर्वं** तस्य प्रायश्चित्तमापद्यते ॥ ३६३९ ॥

सम्प्रति 'ते वा घेत्तुं नेच्छन्ती'ति द्वारव्याख्यानार्थमाह—

**संविग्गेहऽणुसिट्ठो, भणिज्ज जइ हं इहेव अच्छामि ।**
**भन्नति ते आपुच्छसु, अणिच्छ तेसिं निवेयंति ॥ ३६४० ॥**

**सो पुण पडिच्छतो वा, सीसे वा तस्स निग्गतो होज्जा ।**
**सीसं समणुन्नायं, गेण्हंतियरम्मि भयणा उ ॥ ३६४१ ॥**

**संविग्नैरनुशिष्टो यदि ब्रूते**- '**अहमिहैव** युष्माकं समीपे **तिष्ठामि**' तदा **स** प्रष्टव्यो 'येषां समीपात् त्वमागतस्तस्य **शिष्यो वा** त्वं भवसि **प्रातीच्छिको** वा ?' तत्र यदि शिष्यस्तर्हि स भण्यते- तान् आत्मीयान् आचार्याना**पृच्छस्व** मुत्कलापय। अथ स आप्रच्छनं **नेच्छति** ते **तेषां निवेदयन्ति** यथा- 'यौष्माकीणः शिष्योऽस्माकं पार्श्वे समागतो वर्त्तते स [१]बहुधाऽनुशिष्टः परं प्रतिनिवर्त्तितुं नेच्छति किन्तु ब्रूते अहं युष्माकं पार्श्वे स्थास्यामि।' एवं निवेदने कृते यदि ते **समनुजानन्ति** ततः **प्रतीच्छन्ति**, अथ नानुजानन्ति, न प्रतीच्छन्ति। **इतरो** नाम प्रातीच्छिकस्तस्मिन् भजना ॥ ३६४१ ॥

तामेव प्रतिपादयन्ति—

**उद्दिट्ठमणुद्दिट्ठे, उद्दिट्ठऽसमाणियम्मि पेसंति ।**
**वायंति वणुन्नायं, कडे पडिच्छंति उ पडिच्छं ॥ ३६४२ ॥**

---
१. अवधावन्ननुशिष्टः- सं. ॥

तस्य प्रातीच्छिकस्य[स्वरूपं]प्रथमतः **प्रश्नेन** परिभाव्यते किमेतस्य श्रुतस्कन्धादिक**मुद्दिष्ट**मस्ति किं वा न ? इति। तत्र **यद्युद्दिष्टं** तदपि चापरि**समापितं** तदा न प्रतीच्छन्ति किन्तु तेषामेव समीपे **प्रेषयन्ति**। तत्र यदि ते समनुजानन्ति यूयमेवैनं वाचयत तदा तैः **समनुज्ञातं वाचयन्ति** अन्यथा न प्रतीच्छन्ति। अथोद्दिष्टं श्रुतस्कन्धादि परं कृतं परिसमाप्तिं नीतं, तदा **कृते** श्रुतस्कन्धादौ तं **प्रातीच्छिकं प्रतीच्छन्ति**। अथ न किमप्युद्दिष्टमस्ति तदापि तमागतं प्रतीच्छन्ति। एष विहारेणावधावी भणितः ॥ ३६४२ ॥

सम्प्रति लिङ्गावधाविनमाह—

**एवं ताव विहारे, लिंगोहावी वि होइ एमेव ।**
**सो पुण संकिमसंकी, संकिविहारे य एग गमो ॥ ३६४३ ॥**



एवमुक्तेन प्रकारेण **विहारे** विहारावधावी उक्तः, **लिङ्गावधाव्यप्येवमेव भवति स पुनः** लिङ्गावधावी द्विधा **शङ्की अशङ्की** च। तत्र शङ्की नाम यस्यैवं सङ्कल्पो- 'यदि मम स्वजना

जीविष्यन्ति, यदि वा तत् साधारणं धनमविनष्टं स्याद् यदि वा मां ते वदिष्यन्ति उन्निष्क्राम इति, तदा उन्निष्क्रमिष्यामि, यदि पुनस्ते स्वजना मृता भवेयुस्तद्वा साधारणं विनष्टं, न वा कश्चिन्मां वदेत् निष्क्रामेति तदा पार्श्वस्थादिविहारमभ्युत्थास्यामि' एवं संकल्पं कुर्वन् **शङ्की**। एवंरूपसंकल्पविकलोऽशङ्की। तत्र **शङ्किनि** लिङ्गावधाविनि **विहारे च** विहारावधाविनि **एक** एव **गमः**। किमुक्तं भवति ? यत् विहारावधाविन्युक्तं तल्लिङ्गावधाविन्यपि शङ्किनि वक्तव्यमिति॥ ३६४३॥



**संविग्गमसंविग्गे, संकमसंकाए परिणए विवेको ।**
**पडिलेहणनिक्खवणं, अप्पणोऽट्ठाए अन्नेसिं ॥ ३६४४ ॥**

स **शङ्की अशङ्की** वा पथि अनुशिष्यमाणो यदि **संविग्ने असंविग्ने** वा **परिणतो** भवति वसति वा तदा तस्योपकरणमुपहतमिति तस्य **विवेकः** कर्त्तव्यः। अथ स गतश्चिन्तयति-एतदुपकरणं तेषामेव दास्यते मम वा भविष्यति तदा निष्क्रामतोऽनिष्क्रामतो वा उभयकालं **प्रतिलेखयतो** यतनया **निक्षिपत**स्तदुपकरणं नोपहन्यते, प्रत्यागच्छन् पुनर्यदि व्रजिकादिषु सजति तत उपहन्यते। अथ न सजति नोपहन्यते इति गाथासङ्क्षेपार्थः॥ ३६४४॥

सम्प्रत्यस्या एव विवरणमाह—

**घेत्तूणऽगारलिंगं, वती व अवती व जो उ ओहावी ।**
**तस्स कडिपट्टदाणं, वत्थुं वासज्ज जं जोग्गं ॥ ३६४५ ॥**

**यो** लिङ्गेना**ऽवधावी** स द्विविधो**ऽगारलिङ्गं** वा **गृहीत्वा** व्रजति स्वलिङ्गसहितो वा। तत्र योऽगारलिङ्गं गृहीत्वा अवधावति तस्यैष विधिः- पथि व्रजन् केनाप्यनुशिष्टो यदि निवर्त्तते उपतिष्ठते च 'मां प्रव्राजयत' इति, तदा तस्य मूलं दीयते, स पुनः अगारलिङ्गं गृहीत्वा सम्प्रस्थितो **व्रती वा स्यादव्रती वा,** अणुव्रतानि वा गृहीत्वा व्रजति अव्रती वा सन् इत्यर्थः। **तस्यो**भयस्यापि **कटीपट्टको** दातव्यः, **वस्तु वाऽऽसाद्य यद्योग्यं** तद्दातव्यम्। किमुक्तं भवति ? मा प्रद्वेषं यायात् दारुणस्वभावो वा[किञ्चिदनिष्टं कुर्यात्]तत उपरि प्रावरणमपि दीयन्ते, अथवा राजादिः प्रव्रजितस्तस्य सुन्दरे द्वे वस्त्रे दातव्ये। तदेवमगारलिङ्गावधावी भणितः॥ ३६४५ ॥

सम्प्रति स्वलिङ्गावधाविनमधिकृत्याह—

**जइ जीविहिंति जइ वा, वि तं धणं धरइ जइ व वोच्छंति ।**
**लिंगं मोच्छिति संका, पविट्ठवुच्छेव उवहम्मे ॥ ३६४६ ॥**

स्वलिङ्गेन योऽवधावति स द्विधा-शङ्की अशङ्की च, तत्र शङ्की एवं संकल्पयति '**यदि** मम ते स्वजना **जीविष्यन्ति यदि वा तत्** साधारणं **धनं धरते** विद्यते, **यदि वा** मां **वक्ष्यन्ति-लिङ्गं मुञ्च** उन्निष्क्रामेति तदा उन्निष्क्रामिष्यामि' इत्येवं शङ्कावान् पथिकेनाप्यनुशिष्टः सन् संविग्नानाम-संविग्नानां वा उपाश्रये **प्रविशति वसति** च तदा तस्योपकरण**मुपहन्यते**। तदेवं सशङ्कलिङ्गावधावी उक्तः। सम्प्रति निःशङ्कलिङ्गावधावी भण्यते-निःशङ्को नाम य एवं संकल्पयति [1]अवश्यं मया उन्निष्क्रमितव्यमिति ॥ ३६४६ ॥

तस्य विधिमाह—

**समुदाणचारिगाण व, भीतो गिहिपंततक्कराणं वा ।**
**नेउवधिं से तेणोपविट्ठवुत्थे वि न विहम्मे ॥ ३६४७ ॥**

**समुदानं** भैक्षं तस्य भयेन, किमुक्तं भवति? यद्यहमिदानीं लिङ्गं मोक्ष्यामि ततो न कोऽपि मह्यं भिक्षां दास्यति किन्तु मामुत्प्रव्रजितं दृष्ट्वा मध्ये निलीना भविष्यन्ति, ततः समुदानभयेन **चारिकास्तेषां** वा **भयेन**। अथवा अन्तरा **गृहस्थप्रान्ताः** संयतभद्रकाः **स्तेनास्तेषां** वा भयेन

१. अवश्यं मया- पु. प्रे. ॥

**उपधिं नीत्वा तेनो**पधिना संयुक्तः **स** संविग्नानामसंविग्नानां[वा]उपाश्रये **उपविष्टः उषितो** वा, तथापि प्रत्यागच्छतस्तस्योपधि**र्नोपहन्यते** तेनाप्युपधिना समन्वितः स भावतो गृहस्थ इति कृत्वा ॥ ३६४७ ॥

**नीसंको वऽणुसट्ठो, नेहुवहिमहं खु ओहामि ।**
**संविग्गाण य गहणं, इयरेहिं वि जाणगा गेण्हे ॥ ३६४८ ॥**

**वा** शब्दो विकल्पान्तरे, **निःशङ्को** व्रजन् संविग्नैरसंविग्नैर्वा **अनुशिष्टो** यथा यदि त्वमुन्निष्क्रमिष्यसि किमुपधिं **नयसि**? ततः **स** ब्रूते-अमु**मुपधिं** तेषां समीपं **नयत अहं खु** निश्चि**तमवधाविष्यामि**। तत्र यदि **संविग्नानां** हस्ते प्रेषयति तदा तैरानीतस्य **ग्रहणम्**। अगीतार्थानां हस्ते प्रेषयति तदा तै**रितरै**रानीतं यदि सर्वे **गीतार्था**स्ततो **गृह्णन्ति** परिभुञ्जते च। अथ गीतार्थमिश्रास्तदा कारणिकानामेकाकिनां व्रजतां ददति परिष्ठापयन्ति वा ॥ ३६४८॥

**नीसंकितो वि गंतूण, दोहि वग्गेहि चोदितो एति ।**
**तक्खण निंत न हम्मे, तहि परिणयवुत्थ उवहम्मे ॥ ३६४९ ॥**

**निश्शङ्कितोऽपि गत्वा** यदि **द्वाभ्यां वर्गाभ्यां** संविग्नैरसंविग्नैर्वा इत्यर्थः, **चोदितो-ऽनुशिष्टस्सन्** तेषामुपाश्रयाद् यदि **तत्क्षण**मेव **निर्गच्छति** तदा तस्योपधि**र्नोपहन्यते**। अथ तत्क्षणं न निर्गच्छति **वसति** वा तदा उपहन्यते। अथवा यदि तस्यैवं परिणामो जायते-अत्रैव तिष्ठामि तदाऽपि तस्य तत्र **परिणत**स्योपधेर्घातः। ततः तस्योपधिः कथमप्यागत **उपहत** इति कृत्वा परिष्ठाप्यते ॥ ३६४९ ॥

सम्प्रति 'पडिलेहण निक्खिवणमप्पणोऽट्ठाए अन्नेसिमि'त्यस्य व्याख्यानमाह—

**अत्तट्ठुपरट्ठा वा, पडिलेहिय रक्खितो वि उ न हम्मे ।**
**एवं तस्स उ नवरिं, पवेस वइयादिसू भयणा ॥ ३६५० ॥**



स गतः सन् यदि चिन्तयति- तेषामेवेदमुपकरणं दास्यते अथवा मम भविष्यति, एव**मात्मार्थं [ परार्थं ]वा** उभयकालं **प्रत्युपेक्षितो** निरुपद्रवस्थाननिक्षेपणेन च **रक्षितः, अपिशब्दः** प्रागुक्तापेक्षया समुच्चये, **तु**रवधारणे भिन्नक्रमे च, **नैव हन्यते, नवरं** केवलं प्रत्यागच्छतो व्रजिकादिषु **प्रवेशे भजना**। किमुक्तं भवति? स प्रत्यागच्छन् यदि **व्रजिकादिषु** सजति

तदोपहन्यते अथ न सजति, नोपहन्यते ॥ ३६५० ॥

**अह पुण तेणुवजीवी, तो सारूवियसिद्धपुत्त-लिंगीणं ।**
**केइ भणंतुवहम्मति, चरणाभावतो तन्न भवे ॥ ३६५१ ॥**

**अथ** सोऽनुशिष्टोऽपि न प्रतिनिवृत्तः किं तु **तेन** लिङ्गेनोपजीवति भिक्षादिकमित्येवंशील **उपजीवी** सारूपिकत्वेन सिद्धपुत्रत्वेन वा स्थित इत्यर्थः। सारूपिकः शिरसा मुण्डो रजोहरणरहितोऽलाबुपात्रेण भिक्षामटति सभार्यः अभार्यो वा। सिद्धपुत्रो नाम सकेशो भिक्षामटति वा न वा, वराटकैः विण्टलकं करोति, यष्टिं धारयति, तस्य प्रत्युत्थितस्य यः पूर्व उपधिर्यच्च सारूपिकत्वेन सिद्धपुत्रत्वेन वा तिष्ठता यदुत्पादितं तदुपहन्यते न वा ? तत आह **केचिद्भणन्ति सारूपिक-सिद्धपुत्र-लिङ्गिनामुपकरणमुपहन्यते, तन्न भवति।** कुतः ? इत्याह **चरणाभावादु**पहननमनुपहननं वा चरणवतामुपधेः, न च सारूपिकसिद्धपुत्रलिङ्गिनश्चरणवन्तः ॥ ३६५१ ॥

**सो पुण पच्चुट्ठितो जइ, तं से उवहयं तु उवकरणं ।**
**असती य व तो अन्नं, उग्गावेंतेति गीयत्थो ॥ ३६५२ ॥**

**स पुनः प्रत्युत्थितो यदि तस्योपकरणमुपहत**मथवा **नास्ति तर्हि गीतार्थोऽन्य**मुपधि-**मुद्गमयन्** उत्पादयन् **आगच्छति** ॥ ३६५२ ॥

कुत्र कुत्र स्थाने उत्पादयन् आगच्छति ? इत्याह—

**संजयभावियखेत्ते, तस्सऽसतीए उ चक्खुबेंटिहयं ।**
**तस्सऽसति विंटलहए, उप्पाएंतो उ सो एति ॥ ३६५३ ॥**

संयतभावितक्षेत्रं नाम-यत्र क्षेत्रे संयतत्वेन स्थितस्तस्मिन् **संयतभावितक्षेत्रे** उत्पादयन् । **तस्य असति** अभावे '**चक्षुबिण्टिहते**' दृष्ट्या परिचिते। **तस्याप्यभावे** '**विण्टलहते**' विण्टलहतं नाम यत्र पूर्वं विण्टलैराहारौपधिशय्या उत्पादितास्तस्मिन् **उत्पादयन् आगच्छति** ॥ ३६५३ ॥

**जाणंति एसणं वा, सावग दिट्ठी उ पुव्वझुसिया वा ।**
**वेंटलभाविय नेण्हिं, किं धम्मो न होइ गेण्हेज्जा ॥ ३६५४ ॥**

स च उत्पादयति उद्गमोत्पादनैषणादोषैर्विशुद्धं, तांश्च दोषान् तेभ्यः कथयति, यदि वा यत्र संयतत्वेन विहतो **दृष्ट्या** वा **पूर्वं जुषिताः** परिचितास्ते **श्रावकास्ते** च स्वत एव दोषान्

**जानन्ति** ततो दोषविशुद्धं प्रयच्छन्ति, यच्च **विण्टलहतं** क्षेत्रं तत्र गीतार्थो यदि उत्पादयति तदा[1] दतः[ददानान् इत्यर्थः]प्रति ब्रूते '**नाहमिदानीं** वेण्टलं करिष्यामि यद्येवमेव ददध्वे ततः प्रतिगृह्णामि' एवमुक्ते यदि ते ब्रुवते- '**किं** युष्माकं मुधा दत्ते[धर्मो]**न भवति** तस्माद्धर्म इति दद्मस्ततो **गृह्णाति**॥ ३६५४॥

**एवं उप्पाएउं, इयरं च विगिंचिऊण तो एति ।**
**असतीए व जहालाभं, विविंचमाणे इमा जयणा ॥ ३६५५ ॥**

**एवमुक्तेन** प्रकारेण **उत्पादयन् इतरच्च** पाश्चात्त्यमुपकरणं **विविच्य** परित्यज्य **तत एति** आगच्छति। यदि पुनरेकहेलया साम्भोगिकोपध्य**भावे यथालाभं** यथा यथा साम्भोगिकोपधिलाभस्तथा तथा तस्मिन् **विविच्यमाने इयं** वक्ष्यमाणा **यतना** कर्त्तव्या । किमुक्तं भवति ? यत् यत् साम्भोगिकं लभ्यते तस्य तस्य यत् सदृशमसाम्भोगिकं तत् परिष्ठाप्यते ॥ ३६५५॥

एतदेवाह—

१. तदादित्तः- मु. तदा ददतः - सं.। ॥

उवहय उग्गहण लंभे, उग्गहण विगिंच मत्तए भत्तं ।
अप्पज्जत्ते तत्थ दवं उग्गहभत्तं गिहिमत्तेण ॥ ३६५६ ॥

अपहुप्पंते काले, दुल्लभदवऽभाविते य खेत्तम्मि ।
मत्तगदवेण धोवइ, मत्तगलंभे वि एमेव ॥ ३६५७ ॥

**उपहतस्य** असाम्भोगिकस्या**वग्रहणस्य** पतद्ग्रहस्य अवग्रहलाभे साम्भोगिकपतद्ग्रह**लाभे विवेचनं** परिष्ठापनं कर्त्तव्यम्। एवं च तस्य पतद्ग्रहः साम्भोगिको मात्रकमसाम्भोगिकं, तत्र यदसाम्भोगिकं तस्मिन् भक्तं ग्राह्यं यच्च साम्भोगिकं तत्र पानीयं, ततो **मात्रके** तेन भक्तं ग्राह्यं पश्चात् पतद्ग्रहपानीयेन तस्य कल्पो दातव्यः। यदि मात्रके गृहीतेन भक्तेन न संस्तरति तदा **अपर्याप्ते** असंस्तरणे **तत्र** मात्रके **द्रवं** गृह्णाति, **अवग्रहे** पतद्ग्रहे भक्तं तत्र भुक्त्वा **गृहस्थभाजनेन** (भोज्यं) **पानीय**मानीय पतद्ग्रहस्य कल्पो देयः। अथ यावता कालेन गृहस्थात् पानीयमानीयते तावान् **कालो न प्राप्यते दुर्लभं** वा तत्र **द्रवं** ततो न यतस्ततो गृहस्थेभ्यो द्रवं लभ्यते, यदि वा तत्**क्षेत्रमभावितं** संयतैः अतो गृहस्था न ददति भाजनं यत्र पानीयं गृह्यते तदा **मात्रक**गृहीतेनैव **पानीयेन** पतद्ग्रहो **धाव्यते** प्रक्षाल्यते तथापि स नोपहन्यते। **एवमेव** अनेनैव प्रकारेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मात्रकस्यापि** साम्भोगिकस्य **लाभे** असाम्भोगिकस्य परिष्ठापने पतद्ग्रहे चासाम्भोगिके विभाषा कर्त्तव्या। तद्यथा- पतद्ग्रहे भक्तं ग्राह्यं मात्रके पानीयमथ मात्रके संसक्तं भक्तं पानं वा गृहीतमाचार्यादिप्रायोग्यं वा पतद्ग्रहे च पानीयं तदा गृहस्थभाजनेन पानीयमानीय मात्रकस्य प्रक्षालनं कर्तव्यम्। अथ कालो न प्राप्यते दुर्लभं वा द्रवम् अभावितं वा तत्क्षेत्र तदा पतद्ग्रहपानीयेनैव मात्रकं प्रक्षाल्यते, नोपहन्यते इति॥ ३६५६॥ ३६५७॥

अत्र परः प्रश्नमाह—

**चोएइ सुद्धऽसुद्धे, संफासेणं तु तं तु उवहम्मे ।**
**भण्णइ संफासेणं, जेसुवहम्मे न सिं सोही ॥ ३६५८ ॥**

पर**श्चोदयति तत्** शुद्धं भक्तं पानीयं वा **अशुद्धे** मात्रके पतद्ग्रहे वा प्रक्षिप्तं **संस्पर्शेनोपहन्यते** ततः कथं शुद्धिः? इति। आचार्य आह-**भण्यते** उत्तरं दीयते, **येषां संस्पर्शेनोपहन्यते तेषां न** कदाचनापि **शोधिः**॥ ३६५८ ॥

एतदेव भावयति—



For Private and Personal Use Only

**लेवाण हत्थछक्के, सहस अणाभोगतो व पक्खित्ते ।**
**अविशुद्धग्गहणम्मि व, असुद्ध सुज्झेज्ज इयरं वा ॥ ३६५९ ॥**

यदि तव मतेनैवमुपघातस्तर्हि असाम्भोगिके भाजने यद् गृहीतं भक्तं पानं वा तेन **लिप्ताभ्यां हस्ताभ्यां** यत् साम्भोगिकं भाजनं **स्पृश्यते** तदप्यसाम्भोगिकं जातम् तसंत्स्पर्शतोऽन्यान्यपि। न च तत्कालं सर्वाण्यपि परिष्ठापयितुं शक्यन्ते, न चान्यानि तावन्ति लभ्यन्ते, ततो न कदाचनापि शुद्धिः। तथा **सहसा** नाम यत् त्वरमाणोऽसाम्भोगिकात् साम्भोगिके प्रक्षिपति तदप्यसाम्भोगिकमुपजायते। **अनाभोगो** नाम एकान्तविस्मरणं तेनाप्यसाम्भोगिकात् साम्भोगिके **प्रक्षिप्ते** तदप्यसाम्भोगिकं जायते। **अविसुद्ध** त्ति कथञ्चिदनाभागतोऽविशुद्धस्योद्गमाद्यन्यतमदोषदुष्टस्य **ग्रहणे** तत् भाजनमशुद्धं स्याद्। न चैतदिष्यते तस्मान्न संस्पर्शमात्रेणोपहननम्। अन्यच्च यथा अशुद्धेन संस्पर्शतोऽशुद्धं भवति तथा **इतरद्** अशुद्धं शुद्धेन संस्पर्शतः **शुद्धयेत्** शुद्धीभूयात्, न्यायस्योभयत्रापि समानत्वात्, न चैतदस्ति तस्मात् यत्किञ्चिदेतत् ॥ ३६५९ ॥

सूत्रम्—अट्ठ कुक्कुडिअंडगप्पमाणमेत्ते कवले आहारं आहारेमाणे अप्पाहारे ॥ १ ॥ दुवालस्स कुक्कुडिअंडगप्पमाणमेत्ते कवले आहारं आहारेमाणे अवड्ढोमोयरिया ॥ २ ॥ सोलस कुक्कुडिअंडगप्पाणमेत्ते कवले आहारं आहारेमाणे दुभागपत्ते अड्ढोमोयरिया ॥३ ॥ चउव्वीसं कुक्कुडिअंडगप्पाणमेत्ते कवले आहारं आहारेमाणे [1]तिभागपत्ते अंसिया ॥ ४ ॥ एगतीसं कुक्कुडिअंडगप्पाणमेत्ते कवले आहारं आहारेमाणे किंचूणोमोयरिया ॥ ५ ॥ बत्तीसं कुक्कुडिअंडगप्पाणमेत्ते कवले आहारं आहारेमाणे पमाणपत्ते ॥ ६ ॥ एत्तो एकेण वि कवलेण ऊणगं आहारं आहारेमाणे समणे निग्गंथे नो पकामभोइ त्ति वत्तव्वं सिया ॥ ७ ॥ ॥ १७ ॥

'अट्ठक्कुक्कुडि अंडगप्पमाणमित्ते' इत्यादि। अस्य सम्बन्ध प्रतिपादनार्थमाह—

लक्खणमतिप्पसत्तं, अइरेगो वि खलु कप्पते उवही ।
इइ आहारेमाणं, अतिप्पमाणे बहू दोसा ॥ ३६६० ॥

१. °णोतिभागपत्तंसिया-मु. । °णे निग्गंथे ओमायरिया-श्युब्रींग ॥

**अतिरेकोऽपि खलु कल्पते उपधिरित्युच्यमाने लक्षणमतिप्रसक्तं** ततो माऽनेनैव प्रसङ्गेनाहारमप्यतिप्रमाणं कुर्या**दिति** हेतो**राहारे मान**मधिकृतसूत्रेणोच्यते यतो**ऽतिप्रमाणे** गृह्यमाणे आहारे **बहवो दोषाः** 'हाएज्ज व वामेज्ज व' इत्यादिरूपाः ॥ ३६६० ॥

प्रकारान्तरेण सम्बन्धमाह—

**अहवावि पडिग्गहगे, भत्तं गिण्हंति तस्स किं माणं।**
**जं जं उवग्गहं वा, चरणस्स तगं तगं भणति॥ ३६६१ ॥**

**अथवेति** प्रकारान्तरोपदर्शने, **अपिशब्दः** सम्बधस्यैव समुच्चये, पूर्वसूत्रेण प्रतिग्रहक उक्तः, तस्मिंश्च **प्रतिग्रहके** साधवो **भक्तं गृह्णन्ति, तस्य** भक्तस्य **किं प्रमाणम्** ? इत्यनेन प्रमाणमभिधीयते। अथवा[1] यद् **यत् चरणस्य** चारित्रस्योप**ग्रहे** वर्त्तते **तत्तत्** सूत्रकारो **वदति** ॥ ३६६१ ॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**अष्टौ कुक्कुट्यण्डकप्रमाणमात्रान् कवलान् आहारमाहारयन्** निर्ग्रन्थोऽल्पा**हारो** भण्यते।

१. अथवा किं सम्बन्धेन यत् - पु. प्रे. ॥

द्वादश कुक्कुट्यण्डकप्रमाणमात्रान् कवलान् आहारमाहारयन् निर्ग्रन्थः अपार्द्धाऽवमौदर्यः। षोडश आहारयन् द्विभाग [ प्राप्तः अर्धावमौदर्यः ]। चतुर्विंशतिकवलानाहारयन् [ त्रिभाग ] प्राप्तः [ अंशिकः ]। एकत्रिंशतं कवलानाहारयन् किञ्चिदूनावमौदर्यः। द्वात्रिंशतं कुक्कुड्यण्डकप्रमाणमात्रान् कवलानाहारयन् श्रमणो निर्ग्रन्थः प्रमाणप्राप्तः। इत एकेनापि कवलेन ऊनमाहारमाहारयन् श्रमणो निर्ग्रन्थो न प्रकामभोजीति वक्तव्यः स्याद्। एष सूत्राक्षरसंस्कारः। सम्प्रति भाष्यप्रपञ्चः—

निययाहारस्स सया, बत्तीसइमो जो भवे भागो।
तं कुक्कुडिप्पमाणं, नायव्वं बुद्धिमंतेहिं ॥ ३६६२ ॥

निजकस्याहारस्य सदा यो द्वात्रिंशत्तमो भवति भागस्तत् कुक्कुटीप्रमाणं, पदैकदेशे पदसमुदायोपचारात्, कुक्कुट्यण्डकप्रमाणं ज्ञातव्यं बुद्धिमद्भिः ॥३६६२॥

अत्रैव व्याख्यानान्तरमाह—

कुच्छिय कुडी य कुक्कुडि, सरीरगं अंडगं मुहं तीए।
जायइ देहस्स जतो, पुव्वं वयणं ततो सेसं ॥ ३६६३ ॥

**कुत्सिता कुटी कुक्कुटी शरीरमित्यर्थः। तस्याः** शरीररूपायाः कुक्कुट्या **अण्डक**मिवाण्डकं **मुखं,** केन पुनः कारणेनाण्डकं मुखमुच्यते ? तत आह- **यतो** यस्मात् चित्रकर्मणि गर्भे उत्पाते वा **पूर्वं देहस्य वदनं** मुखं **निष्पद्यते** पश्चात् **शेषम्, ततः** प्रथमभावितया मुखमण्डकमित्युच्यते ॥ ३६६३ ॥

**थलकुक्कुडिप्पमाणं, जं वाऽणायासिए मुहे [1]खिवति।**
**इयमन्नो तु विगप्पो, कुक्कुडिअंडोवमे कवले ॥ ३६६४ ॥**

इह कवलप्रक्षेपणाय मुखे विडम्बिते यद् आकाशं भवति तत् स्थलं भण्यते। स्थलमेव कुक्कुट्यण्डकं स्थलकुक्कुट्यण्डकम्, तस्य प्रमाणं **यदनायासिते मुखे** कवलं **प्रक्षिपति** । किमुक्तं भवति ? यावत्प्रमाणमात्रेण कवलेन मुखे प्रक्षिप्यमाणेन मुखं न विकृतं भवति तत् **स्थलकुक्कुट्यण्डकप्रमाणं,** गाथायामण्डकशब्दलोपः प्राकृतत्वात्। **अयमन्यः कुक्कुट्यण्डकोपमे कवले विकल्पः** अयमन्योऽर्थः कुक्कुट्यण्डकप्रमाणमात्रस्येत्यर्थः। एतेन कवलप्रमाणेन अष्टादिना सङ्ख्या द्रष्टव्या ॥ ३६६४ ॥

---

१. खिवसि- पु. प्रे. ॥

तदेवं कृता विषमपदव्याख्या **भाष्यकृता**, सम्प्रति **निर्युक्तिविस्तरः**—

**अट्ठ त्ति भाणिऊणं, छम्मासा हावते उ बत्तीसा ।**
**नामं चोदगवयणं, पासाए होंति दिट्ठंतो ॥ ३६६५ ॥**

**अष्टाविति भणित्वा** यावदवमौदर्यं तावदेतत् संस्तरणतो मध्यं भणितम्, असंस्तरतः पुनः द्वात्रिंशत्कं प्रमाणं भणितमुत्सर्गतः, पुनरयमुपदेशः- **षण्मासादारभ्य** तावद् **हापयेत् यावद् द्वात्रिंशत्** कवलाः । इयमत्र भावना- यदि योगानां न हानिरुपजायते तदा षण्मासान् उपवासं कृत्वा पारणके एकं सिक्थमाहारयेद्, अथ तेन न संस्तरति ततः द्वे सिक्थे आहारयेत्, एवमेकैकसिक्थपरिवृद्ध्या तावन्नेयं यावदेकं लम्बनं कवल इत्यर्थः। तेनाप्यसंस्तरणे [सिक्थ]कवलपरिवृद्धिर्वक्तव्या, सा च तावद् यावदेकत्रिंशत् कवलाः, षण्मासानुपवासं कर्तुमशक्नुवन् एकेन दिवेसेनोनं षण्मासक्षपणं कृत्वा एवमेव सिक्थकवलपरिवृद्ध्या पारणकं कुर्यात्। एवमेकैकहान्या षण्मासक्षपणं तावद्वक्तव्यं यावच्चतुर्थं कृत्वा पूर्वप्रकारेण सिक्थकवल-परिवर्द्धनेन पारणकं परिभावयेत्। अथ न संस्तरति ततो दिने दिने भुङ्क्त्वा तत्राप्येकसिक्था-

दारभ्य यावद् द्वात्रिंशत् कवला इति। अत्र **चोदकवचनं**–'यद्येवमष्टौ इत्यादिसूत्रोपनिबद्धं **नाम**मात्रं वचनमात्रम्।' आचार्य आह–'सिद्धिप्रासादनिर्मापणाय योगानां संधारणनिमित्त-मेतन्मध्यमुपात्तं सूत्रेण ततो न कश्चिद्दोषः तथा चात्र **प्रासादो भवति दृष्टान्तः**, स चाग्रे भावयिष्यते' ॥ ३६६५ ॥

सम्प्रति यदुक्तं– 'छम्मासा हावते उ बत्तीसा' इति तद्भावनार्थमाह—

**छम्मासा खवणंतम्मि, सित्थादण्हातु लंबणं ।**
**तत्तो लंबणवुड्ढीए, जावेक्कतीस संथारे ॥ ३६६६ ॥**

**एक्कमिक्कंतु हावित्ता, दिणं पुव्वकमेण उ ।**
**दिणे दिणे उ सित्थादी, जावेक्कतीस संथरे ॥ ३६६७ ॥**

**षण्मासक्षपणान्ते सिक्थ**मेकम्, **आदिशब्दात्** असंस्तरणे द्वे त्रीणि चत्वारि इत्यादिपरिग्रहः, **अश्नातु** भुङ्क्तामसंस्तरणे च सिक्थपरिवृद्धिस्तावत् कर्त्तव्या याव**ल्लम्बनं** कवलो भवति, तेनाप्यसंस्तरणे **तत** एकस्माल्लम्बनादारभ्य ताव**ल्लम्बनपरिवृद्ध्या यावदेकत्रिंशत्** कवलाः।

एतदपि षण्मासक्षपण**संस्तरणे** द्रष्टव्यम्। असंस्तरणे तु षण्मासेभ्य **एकैकं दिनं हापयित्वा दिने दिने पूर्वक्रमेण** एकैकवृद्ध्या **सिक्थादि** तावद् वर्द्धयेत् **यावदेकत्रिंशत्** कवला भवन्ति। एतदपि **संस्तरणे** असंस्तरणे द्वात्रिंशदपि द्रष्टव्याः॥ ३५६६॥ ३५६७॥

परमेतत् कस्यापि कदाचिदन्यथा प्रकामभोगित्वदोषप्रसक्तेः। यत आह-'एत्तो एगेण वि कवलेण ऊणगमाहारेमाणे समणे निग्गंथे नो पगामरसभोइ त्ति वत्तव्वं सिया' इह प्रकामग्रहणेन निकाममपि सूचितमतो द्वे अपि व्याख्यानयति—

**पगामं होति बत्तीसा, निकामं[1] जं तु निच्चसो ।**
**दुए वि जहया ते उ, गेही हवति वज्जिया ॥ ३६६८ ॥**



**द्वात्रिंशत्** कवलाः **प्रकामं भवति,** त एव **यन्नित्यशः** सर्वकालं भुज्यते त**न्निकामम्**। एते **द्वे अपि** द्वात्रिंशत्कवलेभ्य एकेनापि कवलेन ऊनमाहारमाहारयता[प्रकाम-निकामे] परित्यजता **गृद्धिः वर्जिता भवति** ॥ ३५६८॥

---

१. होइ-मु. पु. प्रे. ॥

अधुना 'नामं चोयग वयणं' इति व्याख्यानार्थमाह—

**अप्पावड्डदुभागोमदेसणं नाममेत्तगं नाम।**
**पइदिणमेक्कतीसं, आहारेह त्ति जं भणह ॥ ३६६९ ॥**

यदि **नाम प्रतिदिनमेकत्रिंशमपि** कवलानाहार**येदिति भणथ** यूयं प्रतिपादयथ तर्हि यत् **अल्पाऽपार्द्ध-द्विभागावमौदर्यदेशनं तन्नाममात्रकं** वचनमात्रकम्, एकत्रिंशतोऽपि कवलानां प्रतिदिवसमाहारानुज्ञानात् ॥ ३६६९ ॥ अत्राचार्य आह—

**भण्णाति अप्पाहारादयो, समत्थस्सऽभिग्गहविसेसा ।**
**चंदायणादयो विव, सुत्तनिवातो पगामम्मि॥ ३६७० ॥**

**भण्यते** उत्तरं दीयते, **अल्पाहारादयः समर्थस्य** सतोऽ**भिग्रहविशेषाश्चन्द्रायणादय इव।** **सूत्रनिपातः** पुनरन्तिमोऽसमर्थस्य **प्रकामे** प्रकामनिकामनिषेधपर इत्यदोषः। ये चाल्पाहारा-

दयोऽभिग्रहविशेषास्ते बहूनां संयतसंयतीनां साधारणार्थम् ॥ ३६७० ॥ तथा चाह—

**अप्पाहारग्गहणं, जेण य आवस्सयाण परिहाणी।**
**न वि जायइ तम्मत्तं, आहारेयव्वयं नियमा॥ ३६७१ ॥**

**अल्पाहारग्रहणम्,** अल्पग्रहणमपार्द्धाद्युपलक्षणं, तत इदम् अल्पाऽपार्द्धाद्याहारग्रहणमेतत् ज्ञापयति सिद्धिप्रासादनिर्मापणाय व्यापार्यमाणा[१]**नामावश्यकानां** योगानां यावन्मात्रेणाहारेण **परिहानिर्नोपजायते तावन्मात्रं** तमभिग्रहविशेषमभिगृह्य **आहारयितव्यम्** ॥ ३६७१ ॥

अत्रैव दृष्टान्तमभिधित्सुराह—

**दिट्ठंतो अमच्चेणं, पासादेणं तु रायसंदिट्ठो[२] ।**
**दव्वे खेत्ते काले, भावेण य संकिलेसेइ॥ ३६७२ ॥**

**[ अमात्येन प्रासादेन दृष्टान्तः राजसन्दिष्टः द्रव्ये क्षेत्रे काले भावेन च संक्लेशयति ]**

१. °नामावश्यकानावश्यकानां- सं ॥ २. मु. ला.। °ट्ठे- पु. प्रे. ॥

इयं गाथाक्षरयोजना, भावार्थस्त्वयम् केनापि राज्ञा अमात्य आज्ञप्तः- शीघ्रं प्रासादः कारयितव्यः, स चाऽमात्यो द्रव्ये लुब्धस्तान् कर्मकरान् **द्रव्यतः क्षेत्रतः कालतो भावतश्च संक्लेशयति** ॥ ३६७२ ॥

कथमित्याह—

**अलोणाऽसक्कयं सुक्खं, नो पगामं च दव्वतो ।**
**तं खेत्ताणुचियं उण्हे, काले उस्सूरभोयणं ॥ ३६७३ ॥**

**भावे न देति विस्सामं, निट्ठुरेहिं य खिंसति ।**
**जियं भितिं च नो देइ, नट्ठा अकय दंडणा ॥ ३६७४ ॥**

**द्रव्यतोऽलवणम्, असंस्कृतं** विशिष्टसंस्काररहितं, **शुष्कं** वातादिना शोषं नीतं वल्ल-चनकादि, तदपि **न प्रकामं** न परिपूर्णं ददाति। क्षेत्रतो यत् तस्मिन् **क्षेत्रे अनुचितं** भक्तं पानं वा तद्ददाति। तथा **उष्णे** कर्म कारयति, न पुनस्तत्र छादनं कारयति। **कालत उत्सूरे भोजनं**

दापयति। **भावतो न ददाति विश्रामं निष्ठुरैश्च** वचनैः **खिंसयति, जितामपि** च कर्मकरणतो लभ्यामपि **भृतिं** मूल्यं **न ददाति।** एवं च सति ते कर्मकराः प्रासादमकृत्वाऽपि **नष्टाः** पलायिताः, स्थितः प्रासादोऽ**कृतः**, राज्ञा चैतत् ज्ञातं ततोऽमात्यस्य **दण्डना** कृता, अमात्यपदात् च्यावयित्वा तस्य सर्वस्वापहरणं कृतमिति एष दृष्टान्तः॥ ३६७३ ॥ ३६७४ ॥

साम्प्रतमुपनयमाह—

**अकरणे पासायस्स उ, जह सोऽमच्चो उ डंडितो रन्ना ।**
**एमेव य आयरिए, उवणयणं होति कायव्वं ॥ ३६७५ ॥**

**यथा प्रासादस्याऽकरणे सोऽमात्यो राज्ञा दण्डितः, एवमेवाऽऽचार्ये उपनयनं भवति कर्त्तव्यम्,** तच्चैवं- राजस्थानीयेन तीर्थकरेण अमात्यस्थानीयस्याचार्यस्य सिद्धिप्रासाद-साधनार्थमादेशो दत्तः। स च कर्मकरस्थानीयानां साधूनां द्रव्यादिषु तत् करोति यथा ते सर्वे पलायन्ते॥ ३६७५॥

तथा चाह—

**कज्जम्मि वि नो विगतिं, ददाति अंतं न तं च पज्जत्तं।**
**खेत्ते खलुखेत्तादी, कुवसहि उब्भामगे चेव ॥ ३६७६॥**

**तइयाए देति काले, ओमेवुसग्गवादितो निच्च ।**
**संगहउवग्गहे वि य, न कुणइ भावे पयंडो य ॥ ३६७७॥**

द्रव्यतः **कार्येऽपि** समापतिते **न विकृतिं** घृतादिकां **ददाति,** भक्तमपि **प्रान्तं** दापयति, **तदपि च न पर्याप्तम् । क्षेत्रतः खलुक्षेत्रादीन्** प्रेषयति खलुक्षेत्रं नाम-यत्र यत् किमपि प्रायोग्यं न लभ्यते, आदिशब्दाद् यत्र स्वपक्षतः परपक्षतो वाऽपभ्राजना तदादिपरिग्रहः, **कुवसतौ** वा स्थापयति, उद्भ्रामके वा ग्रामे यदा तदा वा प्रेषयति। **कालतः** सदैव **तृतीयायां** पौरुष्यां भोजनं **ददाति, अवमेऽपि** दुर्भिक्षेऽपि **उत्सर्गवादिको नित्यं, भावतः संग्रहं** ज्ञानादिभि**रुपग्रहं** वस्त्रपात्रादिभिर्न **करोति, प्रचण्डश्च** प्रकोपनशीलः॥ ३६७६ ॥ ३६७७ ॥

**लोए लोउत्तरे चेव, दोवि एए असाहगा ।**
**विवरीयवत्तिणो सिद्धी, अन्ने दो वि य साहगा ॥ ३६७८॥**

**लोके उत्तरेऽपि च** लोकोत्तरे च **एतौ** अनन्तरोक्तौ **द्वावप्यसाधकौ** द्रव्यतो भावतश्च प्रासादस्य, **विपरीतवर्त्तिनः** पुनरुभयथाऽपि **सिद्धिरिति** कृत्वा अन्यौ **द्वावपि** द्रव्यतो भावतश्च प्रासादस्य **साधकौ** ॥ ३६७८ ॥

**सिद्धिपासायवडेंसगस्स करणं चउव्विहं होइ।**
**दव्वे खेत्ते काले, भावे य न संकिलेसेइ ॥ ३६७९ ॥**

**सिद्धिप्रासादावतंसकस्य करणं चतुर्विधं भवति,** तद्यथा- **द्रव्यतः क्षेत्रतः कालतो भावतश्च।** ततो गीतार्थो द्रव्यादिषु साधून् **न संक्लेशयति**॥ ३६७९ ॥

**एवं तु निम्मवंतीति, अचिरेण सिद्धिपासायं ।**
**तेसिं पि इमो उ विही, आहारेयव्वए होंति ॥ ३६८० ॥**

**एवं तु** द्रव्यादिषु संक्लेशाऽकरणतस्ते साधवो**ऽचिरेण** स्तोकेन कालेन **सिद्धिप्रासादं निर्मापयन्ति, तेषामपि** सिद्धिप्रासादनिर्मापकाना**माहारयितव्ये अयं** वक्ष्यमाणो **विधिः** ॥ ३६८० ॥

तमेवाह—

**अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भागे ।**
**वायपरियारणट्ठा, छब्भागं ऊणयं कुज्जा ॥ ३६८१ ॥**

**अर्द्धमुदरस्य सव्यञ्जनस्य** दधि-तक्र-तीमनादिसहितस्याऽ**शनस्य** योग्यं **कुर्यात्, द्वौ भागौ द्रवस्य** पानीयस्य योग्यौ, षष्ठं तु **भागं वातप्रविचरणार्थमूनकं कुर्यात्**। इयमत्र भावना–उदरस्य षड्भागाः कल्प्यन्ते, तत्र त्रयो भागाः अशनस्य सव्यञ्जनस्य, द्वौ भागौ पानीयस्य, षष्ठो वातप्रविचारणाय, एतच्च साधारणं प्रावृट्काले। शीतकाले चत्वारो भागाः सव्यञ्जनस्याऽशनस्य, पञ्चमः पानीयस्य षष्ठो वातप्रवीचाराय। उष्णकाले द्वौ भागावशनस्य सव्यञ्जनस्य, त्रयः पानीयस्य, षष्ठो वातप्रविचारणायेति॥ ३६८१॥

**एसो आहारविही, जह भणितो सव्वभावदंसीहिं ।**
**धम्मावासगजोगा, जेण न हायंति तं कुज्जा ॥ ३६८२ ॥**

**एष आहारविधिर्यथा सर्वभावदर्शिभिः** सर्वज्ञैर्भणितो **येन** च प्रकारेण **धर्मनिमित्ता अवश्य**कर्त्तव्या **योगा न हीयन्ते तं कुर्यात्** नान्यदिति ॥ ३६८२ ॥

*॥ इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां अष्टम उद्देशकः[१] ॥*

*॥ समाप्त॥ ॥ छ ॥*



---

१. अष्टमोद्देशके ग्रन्थाग्रं २१५४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥
॥ अर्हं नमः ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## ॥ नवम उद्देशक: ॥



For Private and Personal Use Only

व्याख्यातोऽष्टम उद्देशः, अधुना नवम आरभ्यते । तस्य चेदमादिसूत्रम्—

सूत्रम्— सागारियस्स आएसे अंतो वगडाए भुंजति निट्ठिते निसिट्ठे पाडिहारिए, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ॥ १ ॥

सागारियस्स आएसे अंतो वगडाए भुंजति निट्ठिए निसिट्ठे अपाडिहारिए। तम्हा दावए, एवं से कप्पइ पडिगाहेत्तए ॥ २ ॥

सागरियस्स आएसे बाहिं वगडाए भुंजइ निट्ठिए निसिट्ठे पाडिहारिए। तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ॥ ३ ॥

सागारियस्स आएसे बाहिं वगडाए भुंजइ निट्ठिए निसिट्ठे अपाडिहारिए। तम्हा दावए, एवं से कप्पइ पडिगाहेत्तए ॥ ४ ॥

सागारियस्स दासे वा, पेसे वा, भयए वा, भइण्णए वा अंतो वगडाए भुंजइ निट्ठिए निसिट्ठे पाडिहारिए, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ ५ ॥

श्री व्यवहार-सूत्रम् नवम उद्देशकः १४४२ (A)

**सागारियस्स दासे वा, पेसे वा, भयए वा, भइण्णए वा अन्तो वगडाए भुंजइ निट्ठिए निसिट्ठे अपाडिहारिए, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ ६ ॥**

**सागारियस्स दासे वा, पेसे वा, भयए वा, भइण्णए वा बाहिं वगडाए भुंजइ, निट्ठिए निसिट्ठे पाडिहारिए, तम्हा दावए नो से कप्पइ पडिग्गाहेत्तए ॥ ७ ॥**

**सागारियस्स दासे वा, पेसे वा, भयए वा, भइण्णए वा बाहिं वगडाए भुंजइ, निट्ठिए निसिट्ठे अपाडिहारिए, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ ८ ॥**

'सागारियस्स आएसे अंतोवगडाए भुंजति निट्ठिते निसिट्ठे पाडिहारिए' इत्यादि सूत्राष्टकम्। अस्य सम्बन्धप्रतिपादनार्थमाह—

**आहारो खलु पगतो, घेत्तव्वो सो कहिं न वा कहियं ?।**
**सागारियपिंडस्सा, इति नवमे सुत्तसंबंधो ॥ ३६८३ ॥**

**आहारः खलु** अष्टमोद्देशके अन्तिमसूत्रे **प्रकृतः**। **स कुत्र ग्रहीतव्यः ? कुत्र वा न ?** इत्यनेन सूत्रेण प्रतिपाद्यते **इति एष नवमे** उद्देशके **सागारिकपिण्डस्य** प्रतिपादकं यद् आदिमं

सूत्र १-८ गाथा ३६८३-३६८७ प्रतिहारक-भोजिशय्या-तरस्य पण्डिः अकल्प्यः १४४२ (A)

**सूत्रं** तस्य **सम्बन्धः**। अनेन सम्बन्धेनाऽऽयातस्याऽस्य व्याख्या—

**सागारिको** नाम-शय्यातरस्तस्य **आदेशः** आयासकर आदेशः, यदि वा आदेशित आदेशः, अथवा आवेश इति शब्दसंस्कारः तस्य व्युत्पत्तिमग्रे वक्ष्यामः। स च नायको मित्रं प्रभुः परतीर्थिको वा द्रष्टव्यः। **वगडा** नाम-परिक्षेपः, तस्य **अन्तः**- मध्ये **भुङ्क्ते** पदार्थान् ओदनादीन्। किंविशिष्टान्? इत्याह- **निष्ठितान्** निष्ठां नीतान्, **निसृष्टान्** अनुज्ञातान्, **प्रातिहारिकान्** सागारिकभुक्तशेषान्। **तस्मात्** परिनिष्ठितादिमध्याद् **दापयति न से** तस्य **कल्पते प्रतिग्रहीतुम्** एवं शेषाण्यपि त्रीणि सूत्राणि भावनीयानि।

एवं चत्वार्यादेशविषयाणि, चत्वारि[च]दासादिविषयाणि। इह यत्र यत्र प्रातिहारिकं तत्र तत्र सागरिकपिण्ड इति न कल्पते। यत्र यत्र न प्रातिहारिकं तत्र तत्र न सागारिकपिण्ड इति कल्पते। प्रथम-तृतीय-पञ्चम-सप्तमसूत्रेषु सागारिकपिण्ड इति कृत्वा न कल्पते। द्वितीय-चतुर्थ-षष्ठा-ऽष्टमसूत्रेषु न भवति सागारिकपिण्ड इति कल्पते। केवलं भद्रक-प्रान्तदोषतो वर्ज्यते इति सूत्राष्टकभावार्थः। अधुना **भाष्यकृद्** आदेशशब्दव्याख्यानमाह—

**आयासकरो आएसितो उ आवेसणं व आविसइ ।**
**सो नायगो सुही वा, पभू व परतित्थितो वा वि ॥ ३६८४ ॥**

**आयासकर** आदेशः, आदिशतीत्यादेश इति व्युत्पत्तेः। **आदेशितो** वा आदेशः, आदिश्यते सत्कारपुरस्सरमाकार्यते इत्यादेशित इति व्युत्पत्तेः। अथवा आवेश इति शब्दसंस्कारस्तत्र व्युत्पत्तिमाह-**आवेशनं** वा शब्दः शब्दसंस्कारापेक्षया विकल्प्यते, **आविशती**त्यावेशः । आवेशनं नाम यस्मिन् स्थाने प्रविष्टे[1] सागारिकस्याऽऽयासो जन्यते **स** आदेश आवेशो वा नाम **ज्ञातिकः** स्वजनः **सुहृद्वा** मित्रं **प्रभुर्वा** नायकः **परतीर्थिको वाऽपि** ॥ ३६८४ ॥

कृता विषमपदव्याख्या भाष्यकृता। सम्प्रति **निर्युक्तिविस्तरः**—

**आएस-दास-भइए, अट्ठहिं सुत्तेहिं मग्गणा जत्थ ।**
**सागारियदोसेहि य, पसंगदोसेहि य अगेज्झो ॥ ३६८५ ॥**

आदेशः यथोक्तरूपः। दासः आजन्मावधि किङ्करः। भृतकः कियत्कालं मूल्येन धृतः।



१. प्रविष्टेन-पु.प्रे.॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आदेशश्च दासश्च भृतकश्च **आदेश-दास-भृतकम्**, तत्र च पिण्डस्याऽष्टभिः **सूत्रैर्मार्गणा** कृता। **यत्र सागारिकदोषैः प्रसङ्गदोषैश्च** भद्रक-प्रान्तककृतैर**ग्राह्यो** भवति॥ ३६८५ ॥

साम्प्रतमष्टानामपि सूत्राणां विभागमाह—

**तत्थाऽऽदिमाइं चउरो, आदेसे सुत्तमाहिया ।**
**दो चेव पाडिहारी, अपाडिहारी भवे दोन्नि ॥ ३६८६॥**

**तत्र** तेषामष्टानां सूत्राणां मध्ये **आदिमानि चत्वारि** सूत्राणि **आदेशे** प्रागुक्तरूपे आख्यातानि। तत्रापि **द्वे** सूत्रे **प्रातिहारिणी** द्रष्टव्ये, **द्वे** सूत्रे **अप्रातिहारिणी,** प्रथम-तृतीये प्रातिहारिणी द्वितीयचतुर्थे अप्रातिहारिणीत्यर्थः॥ ३६८६ ॥

**अंतो बहिं वा वि निवेसणस्स, [1]आवेसएणं व ठिए सगारे ।**
**भत्तं न एयस्स विसेसजुत्तं, तम्मी दलंते खलु सुत्तबंधो ॥ ३६८७ ॥**

**निवेशनं** गृहं तस्या**ऽन्तर्बहिर्वा स्थिते सागारिके** शय्यातरे, यदि आदेश एव **आदेशकः** प्राघूर्णकस्तेन वा सह स्थिते यद् **भक्तं विशेषयुक्तं** विशेषतो निष्ठां नीतं **तन्न एतस्य** प्राघूर्णकस्य

---

१. आदेस° ला. ॥

सम्बन्धि, किन्तु सागारिकस्य, ततस्तस्मिन् **ददति सूत्रबन्धः** सूत्रोपनिपातः। प्रातिहारिकभोजितया तस्मिन् ददति प्रथमे तृतीये च सूत्रे न कल्पते, सागारिकपिण्डत्वात्, द्वितीये चतुर्थे चाऽप्रातिहारिकभोजितया कल्पते, तदायत्तत्वात्। केवलं भद्रक-प्रान्तदोषप्रसङ्गतो न गृह्यते ॥३६८७॥

एतदेवाह—

**सागारियस्स दोसा, दोसुं दोसु पसंगतो दोसा ।**
**भद्दग-पंतादीया, होंति इमे ऊ मुणेयव्वा ॥ ३६८८ ॥**

द्वयोः प्रथम-तृतीययोः सूत्रयोः **सागारिकस्य दोषाः**, शय्यातरपिण्डत्वान्न कल्पते इति भावः। **द्वयोः** द्वितीय-चतुर्थयोः **प्रसङ्गतो दोषाः भद्रक-प्रान्तादिकाः**। आदिशब्राददतिभद्रकाऽतिप्रान्तादिपरिग्रहः। ते च **इमे** वक्ष्यमाणा भवन्ति **ज्ञातव्याः**॥ ३६८८ ॥

तान्याह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एएण उवाएणं, गेण्हंती भद्दो उग्गमेगतरं ।**
**पंतो दुदिट्ठधम्मो, विणास-गरिहा दिय निसिं वा ॥ ३६८९ ॥**

**भद्रक**श्चिन्तयति-साधव **एतेनोपायेन** मदीयं पिण्डं गृह्णन्ति, तत एवं चिन्तयित्वा **उद्गमदोषाणामेकतरं** दोषं कुर्यात् । यस्तु **प्रान्तः** स पापीयान् **दुर्दृष्टधर्मा** तद्गृहे पिण्डग्रहणतो दिवा निशि वा [१] कोपावेशतो **विनाशं** कुर्यात्, **गर्हां** वा **दिवानिश**मिति ॥ ३६८९ ॥

**सुत्तम्मि कप्पति त्ति य, वुत्ते किं अत्थतो निसेहेह ।**
**एगयरदोस कालिय सुत्तनिवातो इमेहिं तु ॥ ३६९० ॥**



**सूत्रे कल्पते इत्युक्ते किं यूयमर्थतो निषेधयथ ?** सूरिराह-**एकतरदोषाद्** भद्रकदोषप्रसङ्गात् प्रान्तदोषप्रसङ्गाद्वा इत्यर्थः। यद्येवं सूत्रे कस्मात्[कल्पते] इत्युक्तम् ? अत आह-अधिकृतस्य **कालिकसूत्रस्य निपातः** प्रवर्त्तन**मेभिः** वक्ष्यमाणैः कारणैः, तच्च ज्ञायते व्याख्यानात्, कालिकश्रुतं च व्याख्यानप्रधानम् तथा चाह— ॥ ३६९० ॥

१. कोयावेशिको- पु. प्रे. पाठान्तरम् ॥

For Private and Personal Use Only

**जं जह सुत्ते भणियं, तहेव तं जइ वियालणा नत्थि ।**
**किं कालियाणुओगो, दिट्ठो दिट्ठिप्पहाणेहिं ? ॥ ३६९१ ॥**

**यद् यथासूत्रे** कालिके **भणितं तद् यदि तथैव** प्रतिपत्तव्यम्, **न पुनर्विचारणा** काचिदस्ति, तर्हि **दृष्टिप्रधानैः** युगप्रधानैरित्यर्थः, **किं** कस्मात् **कालिकानुयोगो दृष्टः ?** तस्मादस्ति विचारणा, सा चात्र प्रागुक्तस्वरूपेति ॥ ३६९१ ॥

तत्र यदुक्तम् 'एभिः कारणैः कालिकसूत्रनिपातः' इति तानि कारणान्याह

**अद्दिट्ठस्स उ गहणं, अहवा सागारियं तु वज्जित्ता ।**
**अन्नो पेच्छउ मा वा, पेच्छंते वा वि वच्चंता ॥ ३६९२ ॥**

यदि केनापि सागारिकसत्केन तद् दीयमानं न दृश्यते तदा तस्य **अदृष्टस्य ग्रहणं** भवति। **अथवा सागारिकं** शय्यातरं **वर्जयित्वा अन्यो** दीयमानं **प्रेक्षतां वा मा वा,** अथवा सागारिकेऽपि **प्रेक्षमाणे व्रजन्तो** न तिष्ठन्ति[तदा तस्य अदृष्टस्य ग्रहणं भवति], केवलं दानवेलायां तद्दृष्टिः परिह्रियते । तत उक्तं सूत्रे 'कल्पते' इति ॥ ३६९२॥

तदेवमादेशविषयं सूत्रचतुष्टयं भावितं, सम्प्रति दासादिविषयं सूत्रचतुष्टयं भावयति—

**दास-भइगाण दिज्जइ, उक्खित्तं जत्थ भत्तयं निययं।**
**तम्मि वि सो चेव गमो, अंतो बाहिं व दिंतम्मि ॥ ३६९३ ॥**

दास-भृतकादिसूत्रचतुष्टयेऽपि प्रथमसूत्रे तृतीयसूत्रे च प्रातिहारिकभोजनात् तस्मिन् ददति सागरिकपिण्ड इति कृत्वा न कल्पते। **यत्र** पुनर्द्वितीये चतुर्थे च सूत्रे **दास-भृतकानाम् उत्क्षिप्तं** हस्तोत्पाटितं **नियतं भक्तकं दीयते,** दत्तं च तैः स्वगृहं नीयते, तस्मिन्नपि दासभृतकादौ निवेशनस्या**न्तर्बहिर्वा ददति तत्र** सूत्रे **स एव गमः** प्रकारः कल्पते वस्तुतः, परं भद्रकप्रान्तादिदोषप्रसङ्गतो न गृह्यते। यदा तु केनापि सागारिकसत्केन न दृश्यते, यदि वा सागारिकं मुक्त्वा अन्यः प्रेक्षतां वा[यदि वा व्रजन्तो न तिष्ठन्ति] तदा गृह्यते॥ ३६९३॥

यद्येवं तर्हि सागारियस्स आदेसे इ वा दासे इ वा भयगे इ वा इत्यनेन प्रकारेण चत्वार्येव सूत्राणि कस्मान्न कृतानि? उच्यते—

**निययानिययविसेसो, आएसो होइ दास-भयगाणं।**
**अच्चियमणच्चिए वा, विसेसकरणं पयत्तो वा ॥ ३६९४ ॥**

**आदेश दास-भृतकानां भवति नियतानियतकृतो विशेषः** । तथाहि–आदेशः कोऽपि कदाचिदागच्छति ततस्तस्यानियतं दीयते, दास-भृतकानां नियतम् । तथा आदेशस्य **अर्चितं**-सत्कारपुरस्कृतं दीयते, दास-भृतकानां सत्काराऽकरणतो**ऽनर्चितम्**। तथा आदेशस्य भोजनविधिसम्पादनाय महान् **प्रयत्नः** सम्भ्रमगर्भो विधीयते, दास-भृतकानां तु न तादृशः प्रयत्न इति दास–भृतकसूत्रचतुष्टयस्याऽऽदेशसूत्रचतुष्टयाद् **विश्लेषकरणं** पृथक्करणम्॥ ३६९४॥

**सूत्रम्— सागारियणायए सिया, सागारियस्स एगवगडाए अंतो सागारियस्स, एगपयाए, सागारियं चोवजीवइ, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ १ ॥**

'सागारियनायए' इत्यादि सूत्राष्टकम्। अस्य सम्बन्धप्रतिपादनार्थमाह-

**नीसट्ठ अपडिहारी, समणुन्नाओ त्ति मा अइपसंगा ।**
**एगपए परपिंडं, गेण्हे परसुत्तसंबंधो ॥ ३६९५ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निसृष्टो** दत्तोऽ**प्रतिहारी** पिण्डः **समनुज्ञात इति** विचिन्त्य **मा अतिप्रसङ्गतः एकपदे** एकस्यां चुल्ल्यां **परस्य** - शय्यातराद् व्यतिरिक्तस्य **पिण्डं गृह्णीयादिति परसूत्रस्य** परविषयसूत्राष्टकस्य **सम्बन्धः** ॥ ३६९५ ॥ अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**सागारिकज्ञातकः** सागारिकस्वजनः **स्यात्, सागारिकस्य एकवगडाए** एकस्मिन् गृहे सागारिकस्याऽ**न्तः एकस्यां प्रजायां** चुल्ल्यां **सागारिकं चोपजीवति, तस्माद् दापयेद्, न से** तस्य साधोः **कल्पते प्रतिग्राहयितुम्,** सागारिकसत्कचुल्लीदारुलवणाद्युपजीवनतस्तस्य पिण्डस्य शय्यातरसत्कत्वात् ॥ एवं शेषाण्यपि सप्त सूत्राणि भावनीयानि ॥ पाठः पुनस्तेषामेवम्—

**सागारियनायए सिया, सागारियस्स एगवगडाए अंतो अभिनिपयाए सागारियं चोपजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए ॥ १० ॥**

**सागारियनायए सिया, सागारियस्स एगवगडाए बाहिं एगपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए ॥ ११ ॥**

**सागारियनायए सिया, सागारियस्स एगवगडाए बाहिं अभिनिपयाए सागारियं च**



For Private and Personal Use Only

उवजीवइ, तम्हा दावए, नो से कप्पइ पडिगाहित्तए ॥ १२ ॥

सागारियनायए सिया, सागारियस्स अभिनिव्वगडाए एगदुवारए एगनिक्खमण-पवेसाए अंतो एगपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए॥ १३॥

सागारियनायए सिया सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए अंतो अभिनिपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए ॥ १४ ॥

सागारियनायए सिया सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए बाहिं एगपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए॥ १५॥

सागारियनायए सिया, सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए बाहिं अभिनिपयाए सागारियं च उवजीवति तम्हा दावए नो से कप्पति पडिगाहित्तए इति ॥ १६ ॥

अत्र 'अभिनिव्वगडाए' पृथग्गृहे एकद्वारे एकनिष्क्रमणप्रवेशे, एकनिवेशनान्तर्वर्त्तित्वात्। तथा **अभिनिपयाए** इति अभि-प्रत्येकं नियता विविक्ता प्रजा-चुल्ली अभिनिप्रजा तस्याम्। शेषं सुगमम् ॥ सम्प्रति **भाष्यविस्तरः**-

**पुर-पच्छसंथुतो वा, वि नायतो उभयसंथुतो वा वि।**
**एगवगडा घरं तू, पया उ चुल्ली समक्खाया॥ ३६९६ ॥**

**ज्ञातको** नाम **पूर्वसंस्तुतः**, यदि **वा पश्चात्संस्तुतः**,अथवा **उभयसंस्तुतः** स्वजनः। पूर्वसंस्तुतो नाम माता-पितृपक्षवर्त्ती, पश्चात्संस्तुतो भार्यापक्षगतः, उभयसंस्तुतस्तथाविध-नात्रासम्बन्धविशेषभावत उभयपक्षवर्त्ती । **एकवगडा** नाम एकं **गृहम्**। **प्रजा** तु **चुल्ली समाख्याता**, प्रकर्षेण जायते पाकनिष्पत्तिरस्यामिति प्रजा इति व्युत्पत्तेः॥ ३६९६ ॥

**एगपए अभिणिपए, अट्ठहि सुत्तेहि मग्गणा जत्थ।**
**सागारियदोसेहिं, पसंगदोसेहि य अगेज्झं॥ ३६९७ ॥**

**एकस्यां प्रजायामभिनिप्रजायां** प्रत्येकं विविक्तायां प्रजाया**मष्टभिः सूत्रैः** पिण्डस्य

**मार्गणा यत्र** येषु सूत्रेषु प्रथम-तृतीय-पञ्चम-सप्तमरूपेषु **सागारिकदोषै**र्द्वितीय-चतुर्थ-षष्ठा-ऽष्टमेषु च **प्रसङ्गदोषै**र्भक्तपान**मग्राह्यम्** ॥ ३६९७ ॥

**आइल्ला चउरो सुत्ता, चाउस्सालादवेक्खतो।**
**पिहघरेसु चत्तारि, सुत्ता एक्कनिवेसणे ॥ ३६९८ ॥**

**आदिमानि चत्वारि सूत्राणि** एकगृहविषयाणि **चतुःशालाद्यपेक्षातः** चतुःशालादावेव द्वयोः कुटुम्बयोः अवस्थानघटनात्। अन्तिमानि **चत्वारि सूत्राणि पृथग्गृहेषु,** तान्यपि **एकस्मिन् निवेशने** एकस्मिन् परिक्षेपे ॥ ३९९८ ॥

**सागारियस्स दोसा, चउसुं चउसुं पसंगदोसा य।**
**भद्दग-पंतादीया, चउसुं पि कमेण नायव्वा ॥ ३६९९ ॥**

**चतुर्षु** प्रथम-तृतीय-पञ्चम-सप्तमरूपेषु सूत्रेषु **सागारिकस्य** शय्यातरस्य **दोषाः,** शय्यातरपिण्डग्रहणतो दोषास्तत्र ज्ञातव्या इत्यर्थः। **चतुर्षु** द्वितीय-चतुर्थ-षष्ठा-ऽष्टमादिरूपेषु सूत्रेषु **प्रसङ्गदोषाः।** ते च प्रसङ्गदोषा**श्चतुर्ष्वपि** सूत्रेषु यथोक्त**क्रमेण ज्ञातव्याः भद्रक-प्रान्तादिकाः** भद्रकप्रान्तादिकृताः। आदिशब्दस्तर-तमविशेषपरिग्राहकः॥ ३६९९ ॥

अथ कथं प्रथम-तृतीयादिषु चतुर्षु सूत्रेषु शय्यातरदोषाः ? कथं वाऽन्यत्र प्रसङ्गदोषाः ? तत आह-

**दारुग-लोणे गोरस, सूवोदग अंबिले य सागफले ।**
**उवजीवति जं सारिं, एगपए वा वि अभिनिपए ॥ ३७०० ॥**

दारु काष्ठम्। **लवणं गोरसं** च प्रतीतम्। **सूपं** मुद्गादि। **उदकम् अम्लम् शाकफलानि** प्रतीतानि। यस्मात् **सारि** इति षष्ठ्यर्थे द्वितीया प्राकृतत्वात्, सागारिकस्य सत्का**मेकस्यां प्रजायां** प्रत्येकं विविक्तायां वा प्रजाया**मुपजीवति** तेन कारणेन सागारिकदोषाः प्रसङ्गदोषाश्च प्रसजन्ति ॥ ३७०० ॥

एतेन 'सागारियं च उवजीवति' इति व्याख्यातम्। अथ कस्मादेकां चुल्लीं प्रतिपद्यन्ते ? तत आह—

**भीयाइं करभयस्सा, अंतो बाहिं व होज्ज एगपया।**
**अभिनिपए वि न कप्पति, पक्खेवगमादिणो दोसा ॥ ३७०१ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**भीतानि चुल्लीकरभयात्,** गाथायां षष्ठी पञ्चम्यर्थे, सम्बन्धविवक्षायां वा षष्ठी, यस्माच्चुल्लीकरभयात् तानि भीतानि तेन कारणेनाऽ**न्तर्बहिर्वा** तेषा**मेका प्रजा** चुल्ली भवति। **अभिनिप्रजायां** तु सत्यां यद्यपि सागरिकसत्कमुपजीव्यते तथापि विभिन्नचुल्लीकतया यद् गृह्यते तत् तेषामेव भवतीति सागारिकदोषा न भवन्ति, तथापि प्रसङ्गदोषतो **न कल्पते**। तथा चाह– अभिनिप्रजायामपि न कल्पते, यतो भद्रक-प्रान्तकृताः **प्रक्षेपादयो दोषाः**, भद्रकः प्रक्षेपादीन् दोषान् कारयेत्, प्रान्तो विनाशप्रभृतीन् ॥ ३७०१ ॥

तानेवाह—

**जं देसी तं देमो, एए घेत्तुं न इच्छते अम्हं ।**
**अहवा वि अकुलजो त्ति य, गेण्हंति अदिट्ठमादीयं ॥ ३७०२ ॥**

भद्रका ब्रुवते–त्वं साधुभ्यः प्रभूतं देहि, **यद् ददासि तद्** वयं तव **दास्यामः**, यत **एतेऽस्माकं** गृहे **नेच्छन्ति ग्रहीतुम्**। गाथायामेकवचनं प्राकृतत्वात्। एवं भद्रककृताः प्रक्षेपादयो दोषाः। **अथवा** प्रान्तो ब्रूते–**अकुलजा** एत **इति** कृत्वा **अदृष्टादिकं गृह्णन्ति,** एवं गर्हां करोति। अतिप्रान्तो विनाशमपि ॥ ३७०२ ॥



For Private and Personal Use Only

अत्रैवापवादपदमुपदर्शयति—

**बिइयपदे अदिट्ठगहणं, असती तव्वज्जिएण दिट्ठस्स।**
**दिट्ठे वि पत्थियाणं, गहणं अंतो व बाहिं वा ॥ ३७०३ ॥**

**द्वितीयपदेन** अपवादपदेन यदि न केनापि दीयमानं दृष्टं तदा तस्याऽ**दृष्टस्य ग्रहणम्**। अथ सर्वथा केनाप्यदृष्टं न प्राप्यते तदा **तदभावे तद्वर्जितेन दृष्टस्य** ग्रहणम्। तथा **प्रस्थितानां** गन्तुं चलितानां सागारिकेण **दृष्टेऽपि** दर्शनेऽपि **अन्तर्बहिर्वा ग्रहणं** भवति॥ ३७०३ ॥

**सूत्रम्— सागारियस्स चक्कियासाला साहारणवक्कयपउत्ता तम्हा दावए, नो से कप्पइ पडिगाहित्तए ॥ १७ ॥**

**सागारियस्स चक्कियासाला निस्साहारणवक्कयपउत्ता तम्हा दावए, एवं से कप्पइ पडिगाहित्तए॥ १८ ॥**

इत्यादि । अस्य सूत्रकदम्बकस्य सम्बन्धमाह—

**साधारणमेगपयत्ति किच्च तहियं निवारियं गहणं।**
**इदमवि सामन्नं चिय, साहारणसालासु य जोगो ॥ ३७०४ ॥**

अनन्तरसूत्रेषु **एकस्यां प्रजायां साधारणमिति कृत्वा तत्र ग्रहणं निवारितम्** । **इदमपि** वक्ष्यमाणं **साधारणशालासु सामान्यं** साधारणमतो निषिध्यते ॥ ३७०४॥

अनेन सम्बन्धेनाऽऽया-तस्यास्य व्याख्या—

**सागारिकस्य** शय्यातरस्य **चक्रिकाशाला** तैलकशाला, तैलविक्रयशाला इत्यर्थः, सागारिकेणाऽऽत्मना सह **साधारणावक्रयप्रयुक्ता** यत् तस्यां शालायां प्रक्षिप्यते यश्च तस्य लाभः [स] सागारिकेण साधारण इत्यर्थः, **तस्मात्** शालाया मध्यात् यत् साधूचितं तैलादिकमन्यो **दापयति** तत् **से** तस्य साधोर्न **कल्पते** इति प्रथमसूत्रार्थः । तथा **सागारिकस्य चक्रिकाशाला** तैलिकशाला सा **निस्साधारणाऽवक्रयप्रयुक्ता** न किमपि सागारिकसाधारणं तत्र भाण्डं प्रक्षिप्तमस्तीति भावः, **तस्मान्निस्साधारणावक्रयशालामध्याद् दापयति, एवं से** तस्य साधोः **कल्पते प्रतिग्रहीतुम्।** एष द्वितीयसूत्रार्थः ॥

एवं गोलिकशाला-बोधिकशाला-दौषिकशाला-[सौत्रिकशाला-षोंडियसाला-शौण्डिकशाला]

गन्धिकशालासूत्राण्यपि भावनीयानि॥ सूत्रपाठस्त्वेवं द्रष्टव्यः-

**सूत्रम्—सागारियस्स गोलियसाला साहारणवक्कयपउत्ता तम्हा दावए, नो से कप्पइ पडिग्गाहित्तए ॥ १९ ॥**

**सागारियस्स गोलियसाला निस्साहरणावक्कयपउत्ता तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए॥ २० ॥**

एवं बोधिकशालादिसूत्रपाठोऽपि द्रष्टव्यः-

**सूत्रम्— सागारियस्स बोधियसाला साहारणवक्कय - पउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ २१ ॥**

**सागारियस्स बोधियसाला निस्साहारणवक्कय - पउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ २२ ॥**

**सागारियस्स दोसियसाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ २३ ॥**

सागारियस्स दोसियसाला निस्साहारणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ २४ ॥

सागारियस्स सोत्तियसाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ २५ ॥

सागारियस्स सोत्तियसाला निस्साहारणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ २६ ॥

सागारियस्स बोंडियसाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ २७ ॥

सागारियस्स बोंडियसाला निस्साहारणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ २८ ॥

सागारियस्स गंधियसाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ २९ ॥

**सागारियस्स गंधियसाला निस्साहरणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ ३० ॥**

**सागारियस्स सोंडियसाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ ३१ ॥**

**सागारियस्स सोंडियसाला निस्साहारणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ ३२ ॥**

सम्प्रति चक्रिकादिशब्दव्याख्यानार्थमाह—

**तेल्लिय गोलिय लोणिय, दोसिय सुत्तिय य बोहिकप्पासे ।**
**गंधिय-सोंडियसाला, जा अन्ना एवमादीओ ॥ ३७०५ ॥**

चक्रिका नाम-**तैलिकाः**-तैलविक्रयकारिणः। एवं **गोलिका लावणिका दौष्यिकाः सौत्रिकाः बोधिकाः कार्पासाः गान्धिक**शाला **शौण्डिकशाला अन्या** अपि च **या एवमादिकाः**, [तत्र या] गन्धप्रधाना सा गान्धिकशालेत्युच्यते ॥ ३७०६ ॥

**ववहारे उद्देसम्मि, नवमए जत्तिया भवे साला ।**
**तासि परिपिंडियाणं, साहारणवज्जिए गहणं ॥ ३७०६ ॥**

**व्यवहारे नवमे उद्देशके यावत्यः शालाः** शालासूत्राणि **भवन्ति** विद्यन्ते **तासां** सर्वासां **परिपिण्डितानाम**यं तात्पर्यार्थः– यत्र साधारणम् अविभक्तं क्रयाणकं तत्र प्रतिषेधः, **साधारण-वर्जिते** तु **ग्रहणम्** ॥ ३७०६ ॥

सम्प्रति साधारणशब्द-शालाशब्दव्याख्यानार्थमाह—

**साहारण सामन्नं, अविभत्तमछिन्नसंथडेगट्ठं ।**
**सालत्ति आवण त्ति य, पणियगिहं चेव एगट्ठं ॥ ३७०७ ॥**

**साधारणं सामान्यमविभक्तमच्छिन्नं संस्तृत**मिति **एकार्थम्**, एते सर्वेऽपि शब्दा एकार्थिका इत्यर्थः । **शाला इति** वा **आपण इति** वा **पणितगृह**मिति वा **एकार्थम्** ॥ ३७०७ ॥

**साहारणा उ साला, दव्वे मीसम्मि आवणे भंडे ।**
**साहारणऽवक्कपउत्ते, छिन्नं वोच्छं अच्छिन्नं वा ॥ ३७०८ ॥**

**साधारणा तु शाला** भण्यते **मिश्रे द्रव्ये** सति, किमुक्तं भवति? अन्यस्यापि अन्यस्यापि तिला एकत्र मिश्रयित्वा पील्यन्ते, पीलयित्वा चैकत्र विक्रीणन्ति। अथवा **साधारणेनावक्रयेण प्रयुक्ते आपणे भाण्डे** वा क्रयाणके साधारणा शाला भवति। तथा छिन्नमच्छिन्नं वा वक्ष्ये। एष गाथासङ्क्षेपार्थः॥ ३७०८॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो 'द्रव्ये मिश्रे' इति व्याख्यानयति—

**पीलंति एक्कतो वा, विक्कंति एक्कतो करिय तेल्लं।**
**अहवा वि वक्कएणं, साहारणवक्कयं जाणे ॥ ३७०९ ॥**

अन्यस्यान्यस्य तिलान् **एकत्र** मीलयित्वा **पीलयन्ति** ततो विक्रीणन्ति, अथवा पृथक् पृथक् तिलान् पीलयित्वा तैलं **कृत्वा** एकत्र विक्रीणन्ति। तदेवं द्रव्ये मिश्रे सति साधारणावक्रयप्रयुक्ता शाला व्याख्याता। **अथवा**ऽन्यथा साधारणावक्रयप्रयुक्तेति व्याख्यानयति-**अथवा**ऽपि **अवक्रयेण** भाटकेन या साधारणा शाला प्रयुक्ता व्यापारिता तत्र यल्लभ्यते भाण्डकं तत् शय्यातरस्याऽन्येषां वाऽशय्यातराणां साधारणमिति **साधारणावक्रय**प्रयुक्तं **जानीहि**॥ ३७०९॥

अत्र यथा कल्पते यथा वा न कल्पते तथा प्रतिपादयति—

**पीलिय विरेइयम्मी, पुव्वगमेणं तु गहणमद्दिट्ठे ।**
**एगत्थ विक्कयम्मी, अमेलियादिट्ठ अन्नत्थ ॥ ३७१० ॥**

अन्यस्यान्यस्य तिलानेकत्र मीलयित्वा **पीलयित्वा** च तैले **विरेचिते** विभक्तीकृते **पूर्वगमेन** पूर्वप्रकारेण शय्यातरेणाऽ**दृष्टे ग्रहणं** भवति, दृष्टे तु न कल्पते, मा प्रक्षेपकं स कुर्यादिति हेतोः। अन्यत्र नीतं तु कल्पत एव। तथा पृथगेव तिलान् पीलयित्वा तैलमेकत्र मीलितम्, मीलयित्वा च एकत्र विक्रीणन्ति तत **एकत्र विक्रये** यावद् मूल्यं मिलितम् अविभक्तमित्यर्थस्तावन्न कल्पत इत्यर्थः। **अमीलिते** मूल्यकरणेन विभक्तीकृते सागारिकेणाऽ**दृष्टं** सत् कल्पते, दृष्टे प्रक्षेपदोषसम्भवात्। **अन्यत्र** पुनः स्वयोगेन नीतं निःशङ्कं कल्पते ॥ ३७१० ॥

साम्प्रतम् 'आपणं साधारणावक्रयप्रयुक्तं' व्याख्यानयति—

**जो उ लाभगभागेण, पउत्तो होइ आवणो ।**
**सो उ साहारणो होइ, तत्थ घेत्तुं न कप्पति ॥ ३७११ ॥**

**यस्तु** सागारिकेण **लाभभागेन** त्रिभागादिना आपणः **प्रयुक्तो भवति स** भवत्या**पणः साधारणः, तत्र ग्रहीतुं न कल्पते**॥ ३७११॥ साम्प्रतं 'भाण्डं साधारणावक्रयप्रयुक्तं' व्याख्यानयति—

**छेदे वा लाभे वा सागारितो जत्थ होइ आभागी ।**
**तं तु साहारणं जाणे, सेसमसाहारणं होइ ॥ ३७१२ ॥**

**यत्र** भाण्डे **छेदे लाभे वा सागारिको**ऽर्द्धेन त्रिभागादिना वा **आभागी भवति तद्** भाण्डं **साधारणं** साधारणावक्रयप्रयुक्तं **जानीयात्** । एतद्व्यतिरिक्तं **शेषं** भाण्ड**मसाधारणं भवति**। साधारणे च भाण्डं यावन्न विभज्यते तावत् सागारिकपिण्डः, विभक्ते तु कल्पते। तत्रापि प्रक्षेपदोषप्रसङ्गतो दृष्टे न कल्पते, अदृष्टे तु कल्पते यदा तु सा शाला भाटकप्रदानेन गृहीता, एतावता कालेन मया तवैतावद् दातव्यम्, न च भाण्डं शय्यातरेण सह छेदे लाभे वा त्रिभागादिना साधारणम्, तत्राप्यसाधारणे अदृष्टे कल्पते, दृष्टे तु प्रक्षेपदोषप्रसङ्गतो नेति॥ ३७१२ ॥

सम्प्रति 'छिन्नं वोच्छं अछिन्नं वा' इति व्याख्यानार्थमाह—

**सच्चित्ते अच्चित्ते, मीसेण य जा पउज्जए साला।**
**तद्दव्वमन्नदव्वेण, होइ साहारणं तं तु॥ ३७१३॥**

**सचित्तेन अचित्तेन,** गाथायां सप्तमी तृतीयार्थे प्राकृतत्वेन, **मिश्रेण च प्रयुज्यते शाला।** किंविशिष्टेन सचित्तादिना ? इति अत आह- **तद्द्रव्येण अन्यद्रव्येण** वा। तद्द्रव्यं नाम-यत् शालायां प्रक्षिप्तमस्ति, अन्यद्रव्यं ततो व्यतिरिक्तं द्रव्यम्। इयमत्र भावना-यत् शालायां प्रक्षिप्तं सचित्तमचित्तं मिश्रं वा कार्पासादि तस्य त्रिभागादि दातव्यम्, यदि वा यन्निष्पद्यते कार्पासादिभ्यो वस्त्रादिकमन्यत् तस्य त्रिभागादि दातव्यमिति **तद् भवति साधारण**मच्छिन्नं द्रव्यं, तत्र कल्पते ॥ ३७१३ ॥



साम्प्रतं छिन्नमाह—

**तद्दव्वमन्नदव्वेण वा वि छिन्ने वि गहणमद्दिट्ठे ।**
**मा खलु पसंगदोसा, संछोभभतिं[1] व मुंचेज्जा ॥ ३७१४ ॥**

---

१ ॰भतिं - ला.॥ मयं - पु. प्रे. ॥

तद्द्रव्यं यत् शालायां प्रक्षिप्तम्, अन्यदद्रव्यं तद्व्यतिरिक्तम्। एतावता कालेन तद्द्रव्य-मन्यद्रव्यं वा मयैतावद् दातव्यमित्येवं **तद्द्रव्येण अन्यद्रव्येण छिन्नेऽपि** विभक्तीकृतेऽपि **ग्रहणमदृष्टे** शय्यातरेण कल्पते, न दृष्टे। कुतः ? इत्याह- **मा खलु प्रसङ्गदोषाः** स्युरिति कृत्वा। एतदेव [आह] **सञ्छोभो** नाम- प्रक्षेपस्तं कुर्यात्, **भृतिं** वा मूल्यं **मुञ्चेद्** यावदुपकुरुते साधूनां तावद् ददस्व द्रव्यं, भृतिमध्यात् पातनीयमिति ॥ ३७१४ ॥

**जं पि य न एइ गहणं, फलकप्पासो सुरादि वा लोणं ।**
**फासुं पि उ सामन्नं, न कप्पए जं तहिं पडियं ॥ ३७१५ ॥**

**यदपि** चाप्रासुकतया **ग्रहणं नाऽऽगच्छति**, तद्यथा-**फलम्** आम्रादि, **कर्पासः**, **सुरादि**, आदिशब्दात् सरकादिग्रहणम्, **लवणम्**, एतान्यप्रासुकान्यपि कदाचित् कारणे गृह्यन्ते तत एवमुक्तम्। **प्रासुकमपि** तु वस्त्रादि **यत् तत्र** शालायां शय्यातरेण सह **साधारणं पतितं तन्न कल्पते**, असाधारणं तु कल्पते ॥ ३७१५ ॥

तदेव दोषिकशालामधिकृत्य दर्शयति—

**अंडज बोंडज वालज, वामज तह कीडजाण वत्थाणं ।**
**नाणादेसागयाणं, साधारणविज्जते गहणं॥ ३७१६ ॥**

**अण्डजानां** चसूरिसूत्रमयानां, **बोण्डजानां** कार्पासिकसूत्रमयानां, **वालजानां** कम्बलानां **वल्कजानां** सणत्वग्मयानां, **कीटजानां वस्त्राणां नानादेशागतानां** प्रयोजने समापतिते **साधारणवर्जिते** सागारिकेण सह साधारण्यरहिते आपणे **ग्रहणं** भवति, दोषाऽभावात्। दृष्टाऽदृष्टविभाषा प्राग्वत् ॥ ३७१६॥

**सूत्रम्— सागारियस्स ओसहीओ संथडाओ, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ ३३ ॥**

**सागारियस्स ओसहीओ असंथडाओ, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥३४॥**

**सागारियस्स अंबफला संथडाओ, तम्हा दावए, नो से कप्पइ पडिग्गाहेत्तए ॥ ३५॥**

**सागारियस्स अंबफला असंथडा, तम्हा दावए, एवं से कप्पइ पडिग्गाहेत्तए ॥ ३६॥**

'सागारियस्स ओसहीतो' इत्यादि सूत्रचतुष्टयम् । अस्य सम्बन्धप्रतिपादनार्थमाह—

**सागारियम्मि पगते, साधारणमो य समणुवत्तंते।**
**ओसहि-फलसुत्ताणं, वंजणनाणत्ततो जोगो॥ ३७१७ ॥**

**सागारिके** पूर्वसूत्रेभ्यः **प्रकृते साधारणे च समनुवर्त्तमाने** तत्प्रस्तावमुपजीव्य **औषधि-फलसूत्राणामुपनिपातः** कृतः। यद्येवमयमर्थः पूर्वसूत्रेभ्य एव गत इति किमर्थममून्युपात्तानि? इति, अत आह-**व्यञ्जननानात्वात्**। किमुक्तं भवति? पूर्वं शाला अधिकृत्य कल्प्याऽकल्प्य-विधिरुक्तः, इदानीं तु तान्येव व्यञ्जनान्यधिकृत्य स उच्यते, ततो व्यञ्जनैर्नानात्वाद् भेदाददोषः। एष **योगः** सम्बन्धः॥ ३७१७॥

अस्य व्याख्या—

**सागारिकस्य** शय्यातरस्य **औषधयः** [१]गोरसाद्याः **संस्तृताः** साधारणाः, **तस्मात्** तन्मध्याद् **दापयति** सूपकारः, **नो कल्पते से** तस्य साधोः **प्रतिग्रहीतुम्**॥ तथा **सागारिकस्यौषधयः असंस्तृता** असाधारणाः **तस्माद् दापयति, एवं से** तस्य **कल्पते प्रतिग्रहीतुम्**॥ एवमाम्रफलसूत्रद्वयमपि भावनीयम्॥ ३७१७॥

१. गोरसवत्याम्-पु.प्रे.पाठान्तरम्॥

सम्प्रति **भाष्यप्रपञ्चः**। तत्रौषधिप्रतिपादनार्थमाह—

**गोरस-गुल-तेल्ल-घतादि, ओसहीतो व होंति जा अन्ना।**
**सूयस्स कट्ठुलेण तु, ता संथडऽसंथडा होंति ॥ ३७१८ ॥**

**सूदस्य** सूपकारस्य **काष्ठलयने** इन्धनगृहे या **गोरस-गुड-तैल-घृताद्या औषधयः अन्या वा या भवन्ति ता** द्विविधाः-सागारिकेण सह **संस्तृताः** साधारणा **भवन्ति असंस्तृता** वा असाधारणा वा ॥ ३७१८ ॥

कथं पुनः साधारणाः? तत आह—

**धुव आवाह विवाहे, जन्ने सड्ढे य करडुय छणे य।**
**विविहातो ओसहिओ[1], उवणीया भत्तसूतस्स ॥ ३७१९ ॥**

**जं दड्ढ विदड्ढं वा, जो वा तहि भत्तसेस उद्धारो ।**
**लभइ जइ सूवकारो, अविरिक्कं तं पि हु न लब्भा[2] ॥ ३७२० ॥**



---

१. ओसहीओ ला. पु. प्रे. ॥ २ लभइ - ला. ॥

**ध्रुवं** सर्वकालमुपस्करोति सूपकारो भोजिकानाम् **आवाहो** दारकपक्षिणाम् **वीवाहो** वधूपक्षिणाम्। **यज्ञः** नागयज्ञादि। **श्राद्धं** धिग्जातिजनप्रतीतम्। **करडुकं** मृतकभक्तम्। **क्षणं** इन्द्रमहादिः। एतेषु सूपकार आनीयते, तस्य **भक्तसूदस्य** सूपकारकस्य **विविधा औषधयः** पूर्वभणिता **उपनीता** ढौकिताः। तत्र **यद् दग्धम्** इषद्दग्धम्, **विदग्धं वा** प्रभूतं दग्धम्, **यो वा तत्र भक्तशेषस्य उद्धारः** भक्तशेषम् यत् तत्रोद्धरितमित्यर्थः, **तद् यदि लभते सूपकार**स्ततस्तत् कल्पते । **अविभक्तीकृतं तदपि** दग्ध-विदग्धादि हु निश्चितं ग्रहीतुं दातुं वा न **लभते**, ततस्तन्न कल्पते ॥ ३७१९॥ ॥ ३७२०॥

एतदेवाह—

**अविरिक्को खलु पिंडो, सो चेव विरेइतो अपिंडो उ ।**
**भद्दग-पंतादीया, धुवा उ दोसा विरिक्के वि ॥ ३७२१ ॥**

**जाओ संथडियाओ, सागारियसंतिया न खलु कप्पे।**
**जाओ असंथडियाओ, सूतस्स य ताओ कप्पंति ॥ ३७२२ ॥**

**अविरिक्तः** अविभक्तीकृतः **खलु** भवति **पिण्डः** सागारिकपिण्डः। **स एव विरेचितः** पृथक्कृतो भवत्य**पिण्डः**, सागारिकपिण्डो न भवतीति भावः। यद्येवं तर्हि स ग्राह्यस्तत आह- **विरिक्तेऽपि ध्रुवा भद्रक-प्रान्तादिका दोषाः** ॥ ३७२१ ॥ तस्मात् तत्रापि **सागारिकसत्का** असागारिकेण सह **संस्तृतास्ताः खलु न कल्पन्ते, यास्तु असंस्तृताः सूतस्य** [च]सूपकारस्य सम्बन्धितया जाता**स्ताः कल्पन्ते** ॥ ३७२२ ॥

तदेवमोषधिसूत्रद्वयं भावितम्। अधुनाऽऽम्रफलसूत्रद्वयं भावयति—

**वल्ली वा रुक्खो वा, सागारियसंतिओ भएज्ज परं ।**
**तेसि परिभोगकाले, समणाण तर्हि कहं भणियं ?॥ ३७२३ ॥**

**वल्ली वा सागारिकसत्का वृक्षो वा** सागारिकसम्बन्धी **परं** परस्यावग्रहं **भजेत तत्र तेषां** वल्ली-वृक्षाणां फल**परिभोगकाले श्रमणानां कथं भणितं** किं कल्पते किं वा न कल्पते? इति । एष गाथासङ्क्षेपार्थः ॥ ३७२३ ॥

साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतो वृक्ष-वल्लीव्याख्यानमाह-

**फणसं-ऽब-चिंच-तल-नालिकेरिमादी हवंति फलरुक्खा ।**
**लोमसिय-तउसि-मुद्दिय-तंबोलादी य वल्लीतो ॥ ३७२४ ॥**

**पनश आम्रः चिञ्चा** चिञ्चनिका, आम्बिलीत्यर्थः, **तलः** तालो **नालिकेरी** इत्येव**मादयो भवन्ति फलवृक्षाः। लोमसिका त्रपुषिका मुद्रिका ताम्बूलिका** इत्येव**मादिका वल्ल्यः** ॥ ३७२८॥ तदेवं वृक्षा वल्ल्यश्चोक्ताः।

सम्प्रति 'भएज्ज परं' इत्यस्य व्याख्यानमाह—

**परोग्गहं तु सालेणं, अक्कमेज्ज महीरुहो ।**
**छिंदामि त्ति य तेणुत्ते, ववहारो तहिं भवे ॥ ३७२५ ॥**

**महीरुहः** वृक्ष आम्रादिः सागारिकसत्कः **शालया** शाखया, गाथायां पुंस्त्वं प्राकृतत्वात्, विवर्द्धमानः **परावग्रहमाक्रामेत्,** तत्र परो ब्रूते-इयं शाखा मदीयमवग्रहमाक्रामति तत**श्छिनद्मि**। एवं **तेनोक्ते व्यवहारस्तत्र भवेत्** ॥ ३७२५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथम्? इत्याह—

**सागारियस्स तहियं, केवतिओ उग्गहो मुणेयव्वो?।**
**ववहारो तिहा छिण्णो, पासायऽगडे वती तिरिए ॥ ३७२६ ॥**

**सागारिकस्य** शय्यातरस्य **कियान् अवग्रहो ज्ञातव्यः**? इति व्यवहारकारिभिश्चिन्तितम्। ततः शास्त्रं परिभाव्य **व्यवहारः** त्रिधा उर्ध्वाऽधस्तिर्यग्भेदत**श्छिन्नः**। तत्र उर्ध्वतोऽवग्रहस्य परिमाणं **प्रासादः** यावत्प्रमाणमूर्ध्वं प्रासादस्योक्तं तावानूर्ध्वमवग्रह इत्यर्थः। अधो**ऽवटः** प्रमाणम्, पानीयं प्रमाणमित्यर्थः। **तिर्यग् वृतिः** ॥ ३७२६ ॥

एतदेवाह—

**उड्ढं अहे य तिरियं, परिमाणं तु वत्थुणं ।**
**खायमूसिय मीसं वा, तं वत्थू णं तिहोदियं ॥ ३७२७ ॥**

**उर्ध्वमधस्तिर्यक्परिमाणं वास्तूनां** भवति। **तच्च वास्तु त्रिधोदितम्।** तद्यथा–**खातम् उच्छ्रितं मिश्रं च** खातोच्छ्रितम्॥ ३७२७॥



For Private and Personal Use Only

तत्र ऊर्ध्वतः परिमाणमाह—

**अट्ठसयं चक्कीणं, चोवट्ठी[1] चेव वासुदेवाणं।**
**बत्तीसं मंडलिए, सोलस हत्था उ पागतिए॥ ३७२८॥**

**अष्टाधिकं शतं** हस्तानामूर्ध्वत**श्चक्रवर्त्तिनां** प्रासादो भवति। **चतुःषष्टिर्वासुदेवानाम्, द्वात्रिंशद् माण्डलिके** माण्डलिकस्य, **षोडश हस्ताः प्राकृतिके** प्राकृतजनसम्बन्धिनि प्रासादे॥ ३७२८ ॥

**भवणुज्जाणादीणं, एसुस्सेहो य वत्थुविज्जाए।**
**भणितो सिप्पिनिहिम्मि[2] उ, चक्कीमादीण सव्वेसिं॥ ३७२९ ॥**

**शिल्पिनिधौ वास्तुविद्यायां सर्वेषामपि चक्रवर्त्यादीनां** सम्बन्धिनां **भवनोद्यानादीनामेष उत्सेधो भणितः**, ततः षोडश हस्ता ऊर्ध्वतोऽवग्रहस्य परिमाणम्, अधो यावत् पानीयम् तिर्यग् वृतिरिति ॥ ३७२९॥

---

१. चोयट्ठी -पु.प्रे.मु.॥ २. सिप्पनि॰ P. ला.पाठान्तरम्।

**एवं छिन्ने उ ववहारे, परो भणति सारियं।**
**कप्पेमि हं ते सालाइं, ततो[1] णं आह सारितो ।। ३७३० ।।**

**एवम्** उक्तेन प्रकारेण **व्यवहारे छिन्ने परः सागारिकं भणति कल्पयामि** छिनद्मि **अहं तवाऽऽम्रादिवृक्षसत्कं शाखादि।** आदिशब्दात् शाखा-पल्लवादिपरिग्रहः, **तत आह** सागारिकः ॥ ३७३० ॥

**मा मे कप्पेहि सालादिं, दाहं ते फलनिक्कयं।**
**तत्थ छिन्ने अछिन्ने वा, सुत्तसाफल्लमाहियं॥ ३७३१ ॥**

**मा मम** वृक्षस्य **शाखादि कल्पय,** यतस्ते **फलानि निष्क्रयं दास्यामि। तत्र** एतावन्ति फलानि दातव्यानीति छिन्नम्, सामान्यतः फलानि दातव्यानीत्यछिन्नम्। तत्र **छिन्ने अच्छिन्ने वा** यथायोगं **सूत्रद्वयस्य साफल्यमाख्यातम्॥** ३७३१ ॥

अत्र पर आह—

---

१ ततो भणति - पु. प्रे. ॥

**साहूणं वा न कप्पंति, सुत्तमाहु निरत्थयं।**
**गेलन्नऽद्धाण ओमेसु, गहणं तेसि देसियं॥ ३७३२ ॥**

केचिदाहुः-सूत्रद्वयमिदं **निरर्थकम्,** यतः **साधूनामाम्राणि** सचित्तत्वान्न **कल्पन्ते।** आचार्य आह-तेषाम् आम्रफलानां **ग्लानत्वे अध्वनि** शेषभिक्षाया अलाभे **अवमौदर्ये** च **ग्रहणं देशितं** कथितं पूर्वमहर्षिभिः, अतो न निरर्थकमिति ॥ ३७३२॥

**अविरिक्क सारिपिंडो, विरिक्का वि य सारिदिट्ठ न वि कप्पे।**
**अदिट्ठसारिएणं, कप्पंती ताहे घेत्तुं जे॥ ३७३३ ॥**

'**अविरिक्तानि**' अविभक्तानि फलानि **सागारिकपिण्डः,** ततो न कल्पन्ते। **विरिक्तान्यपि** च **सागारिकेण दृष्टानि** [१]**न कल्पते। ततो अदृष्टानि सागारिकेण ग्रहीतुं कल्पन्ते।** "**जे**" इति पादपूरणे॥ ३७३३॥

उपसंहारमाह—

---

१. न वै -मु.पु.प्रे.॥

**एवं अत्तट्ठाए सयं, परूढाण वा वि भणियमिणं।**
**इणमन्नो आरंभो, समणट्ठा वाविए तम्मि॥ ३७३४ ॥**

**एवम्** उक्तेन प्रकारेणाऽऽत्मार्थमारोपितानां **स्वयं वा प्ररूढानाम् इदम्** अनन्तरोक्तं **भणितम्**। साम्प्रतं **तस्मिन्** वृक्षे **श्रमणार्थं वापिते 'अयं'** वक्ष्यमाणोऽन्य **आरम्भः** ॥ ३७३४ ॥

तमेव दर्शयति—

**वल्लिं वा रुक्खं वा, कोई रोएज्ज[१] संजयट्ठाए।**
**तेसि परिभोगकाले, समणाण तहिं कहिं भणियं?॥ ३७३५ ॥**

**वल्लिं वा वृक्षं वा कश्चित् संयतानामर्थाय रोपयेत् तत्र तेषां** फलानां **परिभोगकाले श्रमणानां कथं भणितम्** ? किं कल्पते? किं वा न कल्पते? इत्यर्थः॥ ३७३५ ॥

अत्र सूरिराह—

---

१. रोवेज्ज - ला. ॥

**तस्स कडनिट्ठियादी, चउरो भंगे विभावइत्ताणं।**
**विसमेसु जाण विसमं, नियमा उ समो समग्गहणे॥ ३७३६ ॥**

**तस्य कृतं** तस्य **निष्ठित**मिति प्रथमो भङ्गः१, तस्य कृतमतस्य निष्ठितमिति द्वितीयः२, अतस्य कृतं तस्य निष्ठितमिति तृतीयः३, अतस्य कृतमतस्य निष्ठितमिति चतुर्थः४, तत्र तस्य संयतस्य निमित्तं कृतम् आरोपितं वृक्षादि तथा तस्यैव संयतस्य निमित्तं निष्ठितं-निष्ठां नीतम्, अचित्तीकृतमित्यर्थः, एष प्रथमभङ्गार्थः। एवं शेषाणामपि भङ्गानामर्थः परिभावनीयः। तत्र **तस्य कृतं** तस्य **निष्ठितमित्यादीन् चतुरो भङ्गान् विभाव्य 'विषमयोः'** प्रथम-तृतीययोर्भङ्गयोर्गृह्णतो **'विषमम्'** असंयमं **जानीयात्,** तन्निमित्तं निष्ठानयनात्। **समयोः** द्वितीय-चतुर्थयोर्भङ्गयो**र्ग्रहणे 'समं'** संयमं जानीयात्, अतन्निमित्तं निष्ठितत्वात्॥ ३७३५ ॥

पर आह-ननु श्रमणार्थं स आरोपितस्ततः कथं द्वितीये भङ्गे कल्पते? सूरिराह—

**कामं सो समणट्ठा, वुत्तो तह वि य न होइ सो कम्मं।**
**जं कम्मलक्खणं खलु, इह इं वुत्तं न पस्सामि॥ ३७३७ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**काम**मनुमन्यामहे **स** वृक्षः **श्रमणार्थम्** आरोपित**स्तथाप्यसौ कर्म न भवति।** यतो **यत् कर्मलक्षणं खलु** तीर्थकरगणधरैरुक्तं **तदिह 'इं'** पादपूरणे न पश्यामि॥ ३७३६॥

किं तत् कर्मलक्षणम्? अत आह—

**सच्चित्तभावविकलीकयम्मि दव्वम्मि मग्गणा होइ।**
**का मग्गणा उ दव्वे, सचेयणे फासुभोईणं?॥ ३७३८ ॥**

यत् **सचित्तभावविकलीकृतम्**-अचित्तीकृतं **द्रव्यं** तत्र **प्रासुकभोजिनां मार्गणा भवति,** तत आधाकर्मिकचिन्ताऽपि तत्रैव युक्ता, नान्यत्र। **सचेतने तु द्रव्ये का मार्गणा ?** नैव काचित् सचित्ततया तस्य ग्रहणासम्भवात्, ततो न तदपेक्षया आधाकर्मिकत्वमिति॥ ३७३८॥

तदेवमारोपितरूपकृतनिष्ठितविषये कल्प्याऽकल्प्यविधिरुक्तः, सम्प्रति छिन्नरूपकृत-निष्ठितविषये तमाह—

**संजयहेउं छिन्नं, अत्तट्ठोवक्खडं तु तं कप्पे।**
**अत्तट्ठा छिन्नं पि हु, समणट्ठा निट्ठियमकप्पं॥ ३७३९॥**

गाथा ३७३४-३७४० वल्ली-वृक्षयोः कृतनिष्ठिता-दिस्वरूपम्



For Private and Personal Use Only

अत्रापि भङ्गचतुष्टयम्, तस्य कृतं तस्य निष्ठितम्१, तस्य कृतमतस्य निष्ठितम्२, अतस्य कृतं तस्य निष्ठितम् ३, अतस्य कृतमतस्य निष्ठितम् ४,। अत्र कृतं-छिन्नं, निष्ठितं-पाकादिकरणतो निष्ठां नीतम्। तत्र प्रथमभङ्गे सर्वथा न कल्पते, चतुर्थस्तु भङ्ग एकान्तशुद्धः। द्वितीयभङ्गमधिकृत्य पूर्वार्द्धमाह-**संयतहेतोः** संयतनिमित्तं **छिन्नमात्मार्थम् उपस्कृतं** निष्ठां नीतं **तत् कल्पते**। तृतीयभङ्गमधिकृत्याह-**आत्मार्थं छिन्नमपि श्रमणार्थं निष्ठितमकल्प्यम्** ॥ ३७३९ ॥

सम्प्रति बीजान्युदकं चाधिकृत्याह—

**बीयाणि व वावेज्जा, अगडं व खणेज्ज संजयट्ठाए ।**
**तेसि परिभोगकाले, समणाणं तहि कहं भणियं ? ॥ ३७४० ॥**

**बीजानि** शाल्यादिसत्कानि **वपेत्, अवटं च खानयेत् संयतार्थम्, तेषां परिभोगकाले तत्र श्रमणानां कथं भणितं** कल्प्यमकल्प्यं वा ?॥ ३७४० ॥

सूरिराह—

**दुछडाऽऽणियं च उदयं, जइहेउं निट्ठियं च अत्तट्ठा ।**
**तं कप्पइ अत्तट्ठा, कयं तु जइनिट्ठियमकप्पं ॥ ३७४१ ॥**

अत्रापि प्रागिव भङ्गचतुष्टयम्। अत्राऽऽद्यो भङ्ग एकान्तेनाऽशुद्धः, चरमस्त्वेकान्तशुद्धः। द्वितीयभङ्गमधिकृत्याह-यतिहेतोस्तन्दुला **द्विच्छटी**कृताः, **उदकं वा संयतहेतोरवटादानीतम्,** उभयमपि च **निष्ठितम्** अचित्तीकृत**मात्मार्थं तत् कल्पते** । तृतीयभङ्गमधिकृत्याह-[**आत्मार्थं**] **कृतं** द्विच्छटीकृतास्तन्दुला अवटादानीतं पानीयं **निष्ठितं** तु **यतिनिमित्तं तदकल्प्यमिति** ॥ ३९४१ ॥

पुनरपि पर आह—

**समणाण संजतीण व, दाहामी जो किणेज्ज अट्ठाए ।**
**गावी-महिसीमादी, समणाण तहिं कहिं भणियं? ॥ ३७४२ ॥**

**श्रमणानां संयतीनां** वा दुग्धादि **दास्यामीति** बुद्ध्या तेषा**मर्थाय गो-महिष्यादिकं यः क्रीणीयात् तत्र श्रमणानां कथं** कल्प्यमकल्प्यं वा **भणितम्?** ॥ ३७४२ ॥

सूरिराह—

**संजयहेउं दूढा, न कप्पते कप्पते य सयमट्ठा ।**
**पामिच्चिय कीया वा, जइ वि य समणट्ठया धेणू॥ ३७४३॥**

यद्यपि च **धेनुः** गोरूपा महिषीरूपा वा **श्रमणार्थ**मियम् इत्यात्मीयां धेनुं दत्त्वा परकीया **याचिता क्रीता वा यदि संयतहेतोः दुग्धा** ततो **न कल्पते**। अथ **स्वयम्** आत्मनोऽ**र्थाय** दुग्धा तर्हि कल्पते॥ ३७४३॥

पुनरन्यथा परः प्रश्नयति—

**चेइयदव्वं विभया, करेज्ज कोई नरो सयट्ठाए ।**
**समणं वा सोवहियं, विक्केज्जा संजयट्ठाए ॥ ३७४४ ॥**

**चैत्यद्रव्यं** चौराः समुदायेनापहृत्य तन्मध्ये **कश्चिन्नर** आत्मीयेन **भागेन स्वयम्** आत्मनोऽ**र्थाय** मोदकादि **कुर्यात्,** कृत्वा च संयतानां दद्यात्, यो वा **संयतार्थाय श्रमणं सोपधिकं विक्रीणीयात्** विक्रीय च तत् प्रासुकं वस्त्रादि संयतेभ्यो दद्यात् ॥ ३७४४॥

**एयारिसम्मि दव्वे, समणाणं किन्नु कप्पते घेत्तुं?।**
**चेइयदव्वेण कयं, मोल्लेण व जं सुविहियाणं ॥ ३७४५ ॥**

**तेणपडिच्छा लोए, वि गरहिया उत्तरे किमंग पुण ?।**
**चेइय-जइपडिणीए, जो गिण्हइ सो वि हु तहेव ॥ ३७४६ ॥**

**एतादृशेन द्रव्येण,** गाथायां सप्तमी तृतीयार्थे, यद् आत्मार्थं कृतं तत् **श्रमणानां किन्नु ग्रहीतुं कल्पते?** सूरिराह-**यच्चैत्यद्रव्येण यच्च वा सुविहितानां मूल्येनाऽऽत्मार्थं कृतं** तद् दीयमानं न कल्पते। किं कारणम्? इति चेद्, उच्यते **स्तेनाऽऽनीतस्य प्रतीच्छा** प्रतिग्रहणं **लोकेऽपि गर्हिता, किमङ्ग पुनरुत्तरे?** तत्र सुतरां गर्हिता, यतः **चैत्य-यतिप्रत्यनीके** चैत्य-यतिप्रत्यनीकस्य हस्ताद् **यो गृह्णाति सोऽपि हु** निश्चितं **तथैव** एव ॥ ३७४५॥ ३७४६॥

कस्मात् ? इत्याह—

**हरियाहडिया सा खलु, ससत्तितो उग्गमेहरा गुरुगा ।**
**एवं तु कया भत्ती, न वि हाणी जा विणा तेण ॥ ३७४७ ॥**

**सा खलु** स्तेनानीतप्रतीच्छा **हृताहृतिका** भण्यते, स्तेनैर्हृतस्य [१] तेनाऽऽहरणं हृताहृतिका । यत एवं तस्मात् **स्वशक्तित**श्चैत्यद्रव्यं सोपधिकं वा श्रमणम् **उद्गमयेद्** उत्पादयेत्, **इतरथा** प्रायश्चित्तं चत्वारो **गुरुकाः**। **एवं च** सति **कृता भक्ति**र्भवति प्रवचनस्य, **या** च **तेन विना हानिः** साऽपि **न** भवति ॥ ३७४७ ॥

पुनः परः पृच्छति—

**जा तित्थयराण कया, वंदण-आवरिसणादि पाहुडिया ।**
**भत्तीए सुरवरेहिं, समणाण तहिं कहिं भणियं ? ॥ ३७४८ ॥**

**या तीर्थकराणां सुरवरैर्भक्त्या वन्दनाऽऽवर्षणादिका**, आदिशब्दात् पुष्पवृष्टिप्रकारत्रयादिकरणपरिग्रहः, **प्राभृतिका कृता तत्र श्रमणानां कथं भणितं**? किं तत्र स्थातुं कल्पते? न वा? ॥ ३७४८ ॥

अत्र सूरिराह—

गाथा ३७४१-३७४८ चैत्यद्रव्यादिसत्कम् अकल्प्यम्



---

१. तेन= साधुनाऽऽहरणं ग्रहणम् इत्यर्थः।

For Private and Personal Use Only

**जइ समणाण न कप्पति, एवं एगाणिया जिणवरिंदा ।**
**गणहरमादी समणा, अकप्पिए [१]नेव चिट्ठंति ॥ ३७४९ ॥**

तस्यां प्राभृतिकायां श्रमणानामवस्थातुं **कल्पते** भगवतः प्रवचनातीतत्वात्। अन्यच्च **यदि श्रमणानां न कल्पते** तत **एकाकिनो जिनवरेन्द्रा** भवेयुः,यतो **गणधरारदयः श्रमणा अकल्पिके नैव तिष्ठन्ति,** न चैतदस्ति ॥ ३७४९ ॥

**तम्हा कप्पइ ठाउं, जह सिद्धायणम्मि होइ अविरुद्धं ।**
**जम्हा उ न साहम्मी, सत्था अम्हं ततो कप्पे ॥ ३७५० ॥**

**तस्मात् कल्पते स्थातुम्, यथा सिद्धायतने भवत्यवस्थानमविरुद्धं** तथाऽत्रापीति भावः। **यस्मात् शास्ता** तीर्थकरोऽस्माकं **न साधर्मिकः,** प्रवचनातीतत्वात् **ततः कल्पते** ॥ ३७५० ॥

एतदेवाह—

१. न वि य -पु.प्रे. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**साहम्मियाण अट्ठा, चउव्विहो लिगंतो जह कुडुंबी ।**
**मंगलसासयभत्तीए जं कयं तत्थ आदेसो ॥ ३७५१ ॥**

**साधर्मिकाणामर्थाय** कृतं न कल्पते । स च **चतुर्विधः**- तत्र **लिङ्गतो**ऽसाधर्मिकस्तीर्थ-करः, **यथा** कुटुम्बी ततस्तन्निमित्तं कृतं कल्पते। अन्यच्च भगवतां **मङ्गलनिमित्तं शाश्वतो** मोक्षः,तन्निमित्तं च **भक्त्या यत् क्रियते** समवसरणमायतनं वा **तत्र आदेशः** अनुज्ञाऽवस्थानस्येति भावः ॥ ३७५१ ॥

सम्प्रत्यतिप्रसङ्गनिवारणार्थमाह—

**जइ वि य नाऽऽहाकम्मं, भत्तिकयं तह वि वज्जयंतेहि ।**
**भत्ती खलु होति कया, जिणाण लोगे वि दिट्ठं तु ॥ ३७५२ ॥**

**यद्यपि भक्तिकृत**मायतनादि भगवतां **नाऽऽधाकर्म, तथापि** तद् **वर्जयद्भिः खलु भक्तिर्जिनानां कृता भवति** । इदं तु **लोकेऽपि दृष्टम्** ॥ ३७५२॥

तदेव दर्शयति—



For Private and Personal Use Only

**बंधित्ता कासवतो, वयणं अट्ठपुडसुद्धपोत्तीए ।**
**पत्थिवमुवासते खलु, वित्तिनिमित्तं भया चेव॥ ३७५३ ॥**

**काश्यपः**, कौटुम्बिको **वृत्तिनिमित्तं भयाद्वा पार्थिवमुपास्ते खलु अष्टपुटया शुद्धया पोतिकया वदनं** मुखं **बद्ध्वा** । एवमत्रापि पार्थिवस्थानीयायास्तीर्थकरप्रतिमाया भक्तिनिमित्तं नाऽऽयतनं साधवः प्रविशन्ति॥ ३७५३॥

को दोषः? इत्यत आह—

**दुब्भिगंधपरिस्सावी, तणुरप्पेस[1] ण्हाणिया ।**
**दुहा वाउवहो चेव, तेण ठंति न चेतिए ॥ ३७५४ ॥**

**तिन्नि वा कड्ढए जाव, थुतीतो तिसिलोइया।**
**ताव तत्थ अणुण्णायं, कारणम्मि परेण वि ॥ ३७५५॥**

---

१. तणुपस्सेयण्हा ल्ला. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एषा तनुः** स्नापिताऽपि **दुरभिगन्धप्रस्वेदपरिश्राविणी,** तथा **द्विधा वायुपथः** अधोवायुनिर्गम उच्छ्वास-निःश्वासनिर्गमश्च, **तेन** कारणेन **चैत्ये** चैत्यायतने साधवो **न तिष्ठन्ति** ॥ ३७५४ ॥ अथवा श्रुतस्तवानन्तरं **तिस्रः स्तुतीः त्रिश्लोकिकाः** श्लोकत्रयप्रमाणा **यावत् कर्षति तावत् तत्र** चैत्यायतनेऽवस्थान**मनुज्ञातम् कारणेन** कारणवशात् **परेणाप्य**वस्थानमनुज्ञातमिति ॥ ३७५५ ॥

**सूत्रम्— सत्त-सत्तमिया णं भिक्खुपडिमा एगूणपन्नाए राइंदिएहिं छन्नउएणं भिक्खासएणं अहासुत्तं जाव आणाए अणुपालित्ता भवइ ॥ ३७ ॥**

**अट्ठ-अट्ठमिया णं भिक्खुपडिमा चउसट्ठीए राइंदिएहिं दोहिं य अट्ठासिएहिं भिक्खासएहिं अहासुत्तं जाव आणाए अणुपालित्ता भवइ ॥ ३८ ॥**

**नव-नवमिया णं भिक्खुपडिमा एगासीए राइंदिएहिं चउहिं य पंचुत्तरेहिं भिक्खासएहिं अहासुत्तं जाव आणाए अणुपालित्ता भवइ ॥ ३९ ॥**

**दस-दसमिया णं भिक्खुपडिमा एगेणं राइंदियसएणं अद्धछट्ठेहिं य भिक्खासएहिं जाव आणाए अणुपालित्ता भवइ ॥ ४० ॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"सत्तसत्तमिया णं भिक्खुपडिमा एगूणपण्णाए राइंदिएहिं" इत्यादि। अस्य सम्बन्धप्रतिपादनार्थमाह—

**सागारिय अग्गहणे, अन्नाउंछं फुडं समक्खायं ।**
**सो होयऽभिग्गहो खलु, पडिमा य अभिग्गहो चेव ॥ ३७५६॥**

**अन्नाउंछविसुद्धं, घेत्तव्वं तस्स किं परीमाणं ।**
**कालम्मि य भिक्खासु य?, इति पडिमासुत्तसंबंधो ॥ ३७५७॥**

पूर्वसूत्रेषु सागारिकपिण्डो न ग्राह्य इत्युक्तम्, **सागारिकाऽग्रहणे** सागारिकपिण्डाऽग्रहणे **स्फुटमज्ञातोञ्छं समाख्यातम्।** **स** चाज्ञातोञ्छग्रहः **खलु भवत्यभिग्रहः प्रतिमाऽप्यभिग्रह** इत्यभिग्रहप्रस्तावात् **सागारिक**सूत्रानन्तरं प्रतिमासूत्रस्योपनिपातः ॥ ३७५६॥ अथवा अन्यथा सम्बन्धः- सागारिकपिण्डप्रतिषेधतो**ऽज्ञातोञ्छविशुद्धं ग्रहीतव्य**मित्याख्यातम् **तस्य काले भिक्षासु किं परिमाणम्?** इति प्रश्नावकाशमाशङ्क्य **प्रतिमासूत्र**मुपन्यस्तवान् एष **प्रतिमासूत्रसम्बन्धः** ॥ ३५५७॥



For Private and Personal Use Only

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

सप्त सप्तका दिनानां यस्याः सा **सप्तसप्तकिका** सप्तकशब्दककारस्य मकारः प्राकृतत्वात्। **णं** इति वाक्यालङ्कारे। **भिक्षुप्रतिमा एकोनपञ्चाशता रात्रिन्दिवैरेकेन षण्णवतेन भिक्षाशतेन यथासूत्रं** सूत्राननतिक्रमेण **यावत्**करणात् ''**अहाकप्पं अहामग्गं अहातच्चं अहासम्मं फासिया पालिया ( सोहिया ) तीरिया किट्टिया ( आणाए ) अभिपालिया भवति** '' इति परिग्रहः। तत्र '**यथाकल्पं**' यथाविधि सूत्रोक्तविध्यनतिक्रमेणेत्यर्थः। '**यथामार्गं**' ज्ञान-दर्शन-चारित्राणामविराधनेन ''अहातच्चं'' ति **यथातथ्य**मेकान्ततः सूत्रानुसारेणापादितसत्यम्। अहासम्मं **यथासम्यक्** त्रिविधेनापि योगेनापरिताम्यता सम्यक्करणम्, **स्पर्शिता** सेविता। **पालिता** विराधनारक्षणतः। अत एव **शोधिता** अतीचारलेशेनाप्यकलङ्कनात्। **तीरिता** तीरं नीता पर्यन्तं नीता इत्यर्थः। **कीर्त्तिता** आचार्याणां कथिता यथा- 'प्रतिमा मया समाप्ता'। **आज्ञया** तीर्थकरोपदेशेन **अभिपालिता** भवति।

एवमष्टाष्टकिका-नवनवकिका-दशदशकिकासूत्राण्यपि भावनीयानि, विशेषस्तु पाठसिद्धः

॥ एष सूत्रचतुष्टयसङ्क्षेपार्थः ॥

**अहसुत्त सुत्तदेसा, कप्पो, उ विधीए मग्गनाणादी ।**
**तच्चं तु भवे तत्थं, सम्मं जं अपरितंतेण ॥ ३७५८ ॥**

**फासिय जोगतिगेणं, पालियमविराहि सोहितेमेव ।**
**तीरियमंतं पाविय, किट्टिय गुरुकहण, जिणमाऽऽणा ॥ ३७५९ ॥**

**यथासूत्रमिति सूत्रादेशात्**। यथाकल्पमित्यत्र **कल्पो विधिः**। यथामार्गमित्यत्र **मार्गो ज्ञानादि**। यथातच्चमित्यत्र **तच्चं** नाम **तथ्यम्**। यथा सम्यगिति **सम्यक्** नाम यदपरिताम्यता करणम्॥ **स्पर्शिता योगत्रिकेण** सेविता। **पालिता अविराधिता। शोभिताप्येवमेव,** अविराधनेनैवेत्यर्थः। **तीरिता अन्तं प्रापिता। कीर्त्तिता गुरूणां कथनतः आज्ञा जिनस्य** तीर्थकृतः, द्वितीया षष्ठ्यर्थे प्राकृतत्वात् ॥ ३७६० ॥

**पडिमाओ पुव्वभणिया, पडिवज्जइ को ? ति संघयणमादी।**
**नवरं पुण नाणत्तं, कालच्छेए य भिक्खासु ॥ ३७६० ॥**

**प्रतिमाः** भिक्षुप्रतिमाः **पूर्वम्** आचारदशासु **भणिताः** ताः **कः प्रतिपद्यते ?** तत आह–

**तिसंघयणमादित्ति** आद्येषु त्रिषु संहननेषु अन्यतरसंहननोपेतः प्रतिपद्यते, चतुर्थादिषु तु संहननेषु वर्त्तमानो न प्रतिपद्यते। आदिशब्दात् सोऽपि सूत्रा-ऽर्थ-तदुभयोपेतो गच्छे कृतपरिकर्मा सातिशयः, न निरतिशय इति परिग्रहः। तृतीयं च संहननं याव**दार्यरक्षिता**स्तावदनुवृत्तम्, तत आरतो व्यवच्छिन्नम्। **नवरं पुनर्नानात्वमत्र कालच्छेदे भिक्षासु च** ॥ ३७६० ॥

तत्र कालच्छेदमाह—

**एगूणपन्न चउसट्ठेगासीती सयं च बोधव्वं।**
**सव्वासिं पडिमाणं, कालो एसेत्तितो होइ ॥ ३७६१ ॥**

सप्तसप्तकिकायाः काल एकोनपञ्चाशद् रात्रिन्दिवानि। अष्टाष्टकिकायाश्चतुःषष्टिः, नवनवकिकाया एकाशीतिः, दशदशकिकायाः शतं रात्रिन्दिवानां बोधव्यं, **सर्वासाम्** सर्वासां प्रतिमानामधिकृतसूत्रचतुष्टयोपेतानाम**ेष** एतावान् भवति कालः। कथं पुनः सप्तसप्तकिका भवति? इत्यत आह—

**पढमाए सत्तगा सत्त, पढमे तत्थ सत्तए ।**
**एक्केक्कं गिण्हए भिक्खं, बिइए दोन्नि दोन्नि ऊ ॥ ३७६२ ॥**

**एवमेक्केक्कियं भिक्खं, छुभेज्जेक्केक्क सत्तगे ।**
**गेण्हती अंतिमे जाव, सत्त सत्त दिणे दिणे ॥ ३७६३ ॥**

**प्रथमायां** प्रतिमायां **सप्त सप्तका** भवन्ति। **तत्र प्रथमे सप्तके** प्रतिदिवस**मेकैकां भिक्षां गृह्णाति। द्वितीये** सप्तके प्रतिदिवसे **द्वे द्वे** भिक्षे । **एवं** तृतीयादिषु **सप्तकेष्वे**कैकेषु **एकैकां** भिक्षामधिकां **प्रक्षिपेत्, यावदन्तिमे** सप्तके **दिने दिने सप्त सप्त** भिक्षा **गृह्णाति**। इयमत्र भावना-तृतीये सप्तके प्रतिदिवसं तिस्रस्तिस्रो भिक्षा गृह्णाति, चतुर्थे चतस्रश्चतस्रः, पञ्चमे पञ्च पञ्च, षष्ठे षट् षट्, सप्तमे सप्त सप्तेति ॥ ३७६२ ॥ ३७६३ ॥

अत्रैव प्रकारान्तरमाह—

**अहवा एक्केक्कियं दत्तिं, जा सत्तेक्केक्कसत्तए ।**
**आदेसो अत्थि एसो वि, सिंहविक्कमसन्निभो ॥ ३७६४ ॥**

**अथवा** एष द्वितीयोऽप्यादेशोऽस्ति। यथा एकैकस्मिन् सप्तके प्रत्येकं प्रथमदिनादारभ्य प्रतिदिवस**मेकैकां [ भिक्षां ]** वर्धयेत् **यावत् सप्तमे** दिवसे **सप्त**। इयमत्र भावना-प्रथमे सप्तके प्रथमे दिवसे एकां भिक्षां गृह्णाति, द्वितीये द्वे, तृतीये तिस्रः, चतुर्थे चतस्रः, पञ्चमे पञ्च, षष्ठे

षट्, सप्तमे सप्त। एवं द्वितीये तृतीये चतुर्थे पञ्चमे षष्ठे सप्तमे च सप्तके द्रष्टव्यम्। **एष आदेशः सिंहविक्रमसन्निभः** यथा सिंहो गत्वा पृष्ठतः प्रलोकयते, एवमेषोऽपि सप्तके सप्तके पुनर्मूलतः परावर्त्तते॥ ३७६४॥

गतः कालच्छेदः, सम्प्रति भिक्षापरिमाणमाह—

**छन्नउयं भिक्खसयं**१९६, **अट्ठासीया य दो सया**२८८ **होंति।**
**पुंचुत्तरा य चउरो**४०५, **अद्धच्छट्ठा सया**५५० **चेव ॥ ३७६५॥**

सप्तसप्तकिकायां **भिक्षापरिमाणं षण्णवतं शतम्**१९६, अष्टाष्टकिकाया**मष्टाशीते द्वे शते**२८८ भिक्षाणाम्। नवनवकिकायां **पञ्चोत्तराणि चत्वारि** शतानि४०५, दशदशकिकाया**मर्द्धषष्ठानि शतानि**५५० भिक्षाणामिति ॥ ३७६५॥

सम्प्रत्यस्यैव भिक्षापरिमाणस्याऽऽनयनाय करणमाह—

**उद्दिट्ठवग्गदिवसा, मूलदिणसंजुया दुहा छिन्ना ।**
**मूलेणं संगुणिया, माणं दत्तीण पडिमासु ॥ ३७६६ ॥**

**उद्दिष्टा ये वर्गाः**- सप्तसप्तकिकादयः, **तद्दिवसा मूलदिनसंयुताः** सप्तादिदिनसम्मिश्राः क्रियन्ते, तदनन्तरं **द्विधा छिन्नाः** अर्द्धीक्रियन्त इति भावः, ततः मूलेन उद्दिष्टवर्ग**मूलेन** सप्तादिलक्षणेन सङ्गुण्यन्ते, **सङ्गुणिताः प्रतिमासु दत्तीनां मानं** परिमाणं भवति। तद्यथा-सप्तसप्तकवर्गदिवसा एकोनपञ्चाशत् ४९, ते मूलदिनैः सप्तभिर्युताः क्रियन्ते जाताः षट्पञ्चाशत् ५६, ते अर्द्धीक्रियन्ते, जाता अष्टाविंशतिः२८, सा मूलेन सप्तकेन गुण्यते आगतं षण्णवतं शतम् १९६। तथा अष्टाष्टकवर्गदिवसाः चतुःषष्टिः६४, ते मूलदिनैः अष्टभिः सम्मिश्र्यन्ते जाता द्वासप्ततिः७२, तस्या अर्द्धं क्रियते जाता षट्त्रिंशत् ३६, सा मूलेनाष्टकेन गुण्यते आगते द्वे शते अष्टाशीते २८८। एवं नवनवकिकायां दशदशकिकायां च यथोक्तं भिक्षापरिमाणमानेतव्यम्॥ ३७६६॥

अत्रैव करणान्तरमाह—

**ग[1]च्छुत्तर संवग्गे, उत्तरहीणम्मि पक्खिवे आदिं ।**
**अंतिमधणमादिजुयं, गच्छद्धगुणं तु सव्वधणं॥ ३७६७॥**



---

१. लाडनूंसंस्करणे इतः पूर्वम् एका गाथा अधिका अस्ति, सा चैवम्-
पदगयसु वेयसुत्तरसमाहयं दलियमादिणा सहियं। गच्छगुणं पडिमाण भिक्खामाणं मुणेयव्वं ॥ ३७८७ ॥
अस्य छाया- पदगतेषु वा एषु उत्तरसमहतं दलिकं आदिना सहितम्। गच्छगुणं प्रतिमानां भिक्षामानं मुणितव्यम्॥

**गच्छ उत्तरेणं** संवर्ग्यते स्म **संवर्गः**, गुणित इत्यर्थः, तस्मिन् **उत्तरेण हीने** कृते **आदिं प्रक्षिपेत्,** तत **अन्तिमधन**मागच्छति, **तदन्तिमधनमादियुतं** क्रियते तदनन्तरं **गच्छार्द्धगुणं** ततः **सर्वधन**मागच्छति। तत्र सप्तसप्तकिकायां सप्त आदिः, सप्त उत्तरम् सप्त गच्छः, ततः सप्तकलक्षणो गच्छ उत्तरेण सप्तकलक्षणेन गुण्यते जाता एकोनपञ्चाशत् ४९, सा उत्तरेण सप्तकेन हीना क्रियते, कृत्वा च पुनरादिना सप्तकेनैव युता कर्त्तव्या, इदं करणमन्यत्रापि व्यापकं तत एवमुक्तम्, अन्यथाऽत्रोत्तरहानौ आदिप्रक्षेपे च न कश्चिद् विशेषः,तस्या एव एकोनपञ्चाशतो भावात्, एतद् अन्तिमधनं सप्तमे सप्तके भिक्षापरिमाणमित्यर्थः। एतद् आदिना सप्तकेन युतं क्रियते जाता षट्पञ्चाशत्५६, सा गच्छार्द्धेन गुण्यते, अत्र गच्छः सप्तकः, स विषमत्वादर्द्धं न प्रयच्छति ततो गुण्यो राशिः षट्पञ्चाशल्लक्षणोऽर्द्धीक्रियते जाता अष्टाविंशतिः२८, सा परिपूर्णेन सप्तकलक्षणेन गच्छेन गुण्यते जातं षण्णवतं शतम् १९६। अष्टाष्टकिकायामष्टक आदिः,अष्टक उत्तरम्, अष्टको गच्छः। तत्राष्टकलक्षणो गच्छ उत्तरेणाष्टकेन गुण्यते जाता चतुःषष्टिः६४, सा उत्तरहीना आदियुता क्रियते तथापि सैव चतुःषष्टिः६४, एतद् अष्टमेऽष्टके

भिक्षापरिमाणम्, एतदादिना अष्टकेन युतं क्रियते जाता द्वासप्ततिः७२, सा गच्छार्द्धेन चतुष्केण गुण्यते जाते द्वे शते अष्टाशीत्यके २८८। एवं नवनवकिकायां दशदशकिकायां च भावनीयम्। नवरम् नवनवकिकायां नवक आदिः, नवक उत्तरम् नवको गच्छः। दशदशकिकायां दशक आदिः, दशक उत्तरम्, दशको गच्छः—

**सूत्रम्— दो पडिमाओ पण्णत्ताओ, तं जहा - १. खुड्डिया वा मोयपडिमा, २. महल्लिया वा मोयपडिमा। खुड्डियं णं मोयपडिमं पडिवन्नस्स अणगारस्स कप्पइ पढम[1]-निदाह-कालसमयंसि वा चरिमनिदाहकालसमयंसि वा, बहिया गामस्स वा जाव रायहाणीए वा वणंसि वा वणविदुग्गंसि वा, पव्वयंसि वा पव्वयरविदुग्गंसि वा भोच्चा आरुभइ चोद्दसमेणं पारेइ, अभोच्चा आरुभइ, सोलसमेण पारेइ। जाए जाए मोए आगच्छइ, ताए-ताए आईयव्वे। दिया आगच्छइ आईयव्वे, रत्तिं आगच्छइ नो आईयव्वे। सपाणे मत्ते आगच्छइ नो आईयव्वे, अप्पाणे मत्ते आगच्छइ आईयव्वे। सबीए मत्ते आगच्छइ नो आईयव्वे, अबीए मत्ते आगच्छइ आईयव्वे। ससणिद्धे मत्ते आगच्छइ नो**

सूत्र ४१-४२ गाथा ३७६८-३७६९ मोकप्रतिमा-स्वरूपम्



१. पढमसरयकाल० प्रतिलिपि, आ.प्र.॥

आईयव्वे, असससणिद्धे मत्ते आगच्छइ आईयव्वे । ससरक्खे मत्ते आगच्छइ नो आईयव्वे, अससरक्खे मत्ते आगच्छइ आईयव्वे। जावइए जावइए मोए आगच्छइ तावइए तावइए सव्वे आईयव्वे, तं जहा-अप्पे वा, बहुए वा। एवं खलु एसा खुड्डिया मोयपडिमा अहासुत्तं जाव आणाए अणुपालित्ता भवइ ॥ ४१ ॥

महल्लियं णं मोयपडिमं पडिवन्नस्स अणगारस्स कप्पइ पढमनिदाह कालसमयंसि वा, चरमनिदाहकालसमयंसि वा, बहिया गामस्स वा जाव रायहाणीए वा वणंसि वा वणदुग्गंसि वा पव्वयंसि वा पव्वयदुग्गंसि वा, भोच्चा आरुभइ, सोलसमेणं पारेइ, अभोच्चा आरुभइ, अट्ठारसमेणं पारेइ । जाए जाए मोए आगच्छइ, ताए ताए आईयव्वे। दिया आगच्छइ आईयव्वे, रत्तिं आगच्छइ नो आईयव्वे, जाव एवं खलु एसा महल्लिया मोयपडिमा अहासुत्तं जाव आणाए अणुपालित्ता भवइ ॥ ४२ ॥

"दो पडिमातो " इत्यादि सूत्रद्वयम् । अस्य सम्बन्धमाह—

पडिमाहिगारपगते, हवंति मोयपडिमा इमा दोन्नि।
ता पुण गणम्मि वुत्ता, इमा उ बार्हिं पुरादीणं ॥ ३७६८ ॥

प्रतिमाधिकारः प्रकृतः, तत इमे अपि द्वे मोकप्रतिमे इह भवतः, प्रतिमाप्रस्तावादिमे अपि प्रतिमे अत्रोपन्यस्ते इति भावः। केवलमयं विशेषः-ताः अनन्तरोदिताः प्रतिमा गणे स्थितस्योक्ताः। इमे पुनः पुरादीनां बहिःस्थितस्येति सम्बन्धः ॥ ३७६८ ॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**द्वे प्रतिमे प्रज्ञप्ते । तद्यथा क्षुल्लिका च मोकप्रतिमा महती च मोकप्रतिमा** । मोकः कायिकी, तदव्युत्सर्गप्रधाना प्रतिमा मोकप्रतिमा । तत्र **क्षुल्लिका णं** इति प्राग्वत् **मोकप्रतिमां प्रतिपन्नस्याऽनगारस्य कल्पते** से तस्य **प्रथमनिदाघकालसमये वा चरमनिदाघकालसमये वा बहिर्ग्रामस्य वा, यावत्करणाद्** नगरादिपरिग्रहः, **राजधान्यां वा, [ बहिः ] वने वा** एकजातीयद्रुमसङ्घाते, **वनविदुर्गे** वा नानाजातीयद्रुमसङ्घाते, **पर्वते** प्रतीते, **पर्वतविदुर्गे** अनेकपर्वतसङ्घातरूपे, भुक्त्वा यदि प्रतिमाम् **आरोहति** प्रतिपद्यते तदा **चतुर्दशेन** भक्तेन **पारयति** समापयति, अथाऽ**भुक्त्वा आरोहति** तदा **षोडशकेन** भक्तेन **पारयति,** तेन च जातं **मोकं** कायिकीम् **आपातव्यम्** । [यदा यदा मोक आगच्छति तदा तदा आपातव्यम्] **आगमने च दिवा आगच्छति [ आपातव्यं, रात्रिंम् आगच्छति नापाताव्यं, सप्राणे मात्रके**

**आगच्छति नाऽऽपातव्यम्, अप्राणे मात्रके आगच्छति आपातव्यम् एवं सबीजे मात्रके नापाताव्यम्, अबीजे मात्रके पातव्यं, सस्निग्धे मात्रके नापातव्यम्, अस्निग्धे मात्रके आपातव्यं, सरजस्के मात्रके नापातव्यम् अरजस्के पातव्यम्, यावन् यावान् मोक आगच्छति तावान् तावान् सर्वः आपातव्यः, तद्यथा अल्पो वा बहुर्वा एवं खलु एषा क्षुल्लिका मोकप्रतिमा यथासूत्रं यावत् आज्ञया अनुपाल्य भवति॥]**

एवं महत्या अपि मोकप्रतिमायाः सूत्रं वाच्यम्। विशेषोऽपि पाठसिद्ध एव ॥ सम्प्रति भाष्यप्रपञ्चः। तत्र मोकप्रतिमाशब्दार्थमाह—

**सव्वातो पडिमातो, साधुं मोयंति पावकम्मेहिं ।**
**एएण मोयपडिमा, अहिगारो इहं तु मोएणं ॥ ३७६९॥**

मोचयति पापकर्मभ्यः साधुमिति मोका, उद्गादित्वादच्यपि कत्वम्, सा चासौ प्रतिमा च मोकप्रतिमा । **एतेनान्वर्थेन सर्वा अपि प्रतिमाः साधुं पापकर्मभ्यो मोचयन्ती**ति कृत्वा **मोकप्रतिमाः** प्राप्नुवन्ति, ततो विशेषप्रतिपादनार्थमाह- **इह अधिकारः** प्रयोजनं **मोकेन**। मोकापरित्यागप्रधाना प्रतिमा मोकप्रलिमेति॥ ३७६९॥

सम्प्रति विषमपदव्याख्यानमाह—

**एगदुमो होइ वणं, इगजातीया य जे जहिं रुक्खा ।**

**विवरीयं तु विदुग्गं, एसेव य पव्वए वि गमो ॥ ३७७०॥**

**एकद्रुमः एकजातीया ये वृक्षास्ते यत्र** विद्यन्ते तद् **भवति वनम्, विपरीतं** नानाजातीयद्रुमरूपं [वनं] **विदुर्गम्। एष एव गमः पर्वतेऽपि** द्रष्टव्यः-एकः पर्वतः पर्वतः, नानारूपपर्वतसङ्घातः पर्वतविदुर्गम् ॥ ३७७० ॥

सम्प्रति येन विधिना बहिर्निर्गच्छति तं विधिमाह—

**निसिज्जं चोलपट्टं, कप्पं घेत्तूण मत्तगं चेव ।**

**एगंते पडिवज्जइ, काऊण दिसाण चाऽऽलोयं॥ ३७७१ ॥**

**निषद्यां** सोत्तरां **चोलपट्टं कल्पं मात्रकं च** कायिकीमात्रकं च **गृहीत्वा** ग्रामादेर्बहिर्विनिर्गच्छति, विनिर्गत्यै**कान्ते** प्रतिमां **प्रतिपद्यते,** तत्र कायिकीसमागमे तां मात्रके व्युत्सृज्याऽनापाते असंलोके **दिशां चाऽऽलोकं कृत्वा** आपिबति। यद्यपि स सातिशयोऽतिशयज्ञानेनैव जानाति सागारिकोऽस्ति न वा? इति, तथापि सामाचारी पालिता भवतु इति कृत्वा दिशामालोकं

कृत्वा व्युत्सृजत्यापिबति च ॥ ३७७१ ॥

सम्प्रति कल्पादिग्रहणे प्रयोजनमाह—

**पाउणइ तं पवाए, तत्थ निरोहेण जिज्जए दोसो**
**सिण्हाइपरित्ताणं, व कुणति अत्तुण्हवाते वा ॥ ३७७२ ॥**

तं कल्पं **प्रवाते प्रावृणोति । तत्र** च प्रावरणे कृते वात**निरोधेन** यः प्रवाते वातसम्पर्केणाऽऽपादितो **दोषः** स **जीयते**। यदि वा स कल्पः **सिण्हादिपरित्ताणं** श्लक्ष्णादि-सचित्तरज:परित्राणं **करोति**। अथवा **अत्युष्णे वाते** वाति स प्राव्रियते॥ ३७७२ ॥

मोकमापिबेदित्युक्तम् । तत्र मोकस्वरूपमाह—

**साभावियं च मोयं, जाणइ जं चावि होइ विवरीयं।**
**पाण-बीय-सणिद्ध-सरक्खाधिरायकलियं[1] न पिएज्जा ॥ ३७७३ ॥**

स प्रतिमाप्रतिपन्नो यद् **मोकं स्वाभाविकम्, यच्च भवति विपरीतं** तत् सर्वं **जानाति**। तत्र स्वाभाविकमापिबति, इतरद् विपरीतं **प्राणसंसक्तं बीजसम्मिश्रं सस्निग्धं सरजस्काधि-**

१. कलियं - ला. नास्ति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजकलितं न पिबति ॥ ३७७३ ॥

तत्र प्राणसंसक्तं कथयति—

**किमिकुट्ठे सिया पाणा, ते य उण्हाभितावियां।**
**मोएण सद्धमेज्ज, ण्हु निसिरे ते उ छाहिए॥ ३७७४ ॥**

कृमिसङ्कुलं कोष्ठम्-उदरं कृमिकोष्ठम्। **कृमिकोष्ठे स्युः प्राणाः** कृमिरूपाः **ते चोष्णेनाभितापिताः** सन्तः **मोकेन** कायिक्या **सार्द्धमागच्छेयुः**, ततस्तान् **छायायां निसृजेत्** ॥ ३७७४ ॥

बीजादिप्रतिपादनार्थमाह—

**बीयं तु पोग्गला सुक्का, ससणिद्धा उ चिक्कणा ।**
**पडंति सिथिले देहे, खमणुण्हाभितावियां ॥ ३७७५ ॥**

**बीजं** नाम **शौक्राः पुद्गलाः**। ते च द्विधा चिक्कणा अचिक्कणाश्च। तत्राऽचिक्कणा बीजग्रहणेन

गृहीताः, **चिक्कणाः सस्निग्धा** उच्यन्ते। ते उभयेपि **शिथिले देहे क्षपणेनोष्णेन चाभितापिताः** सन्तः **पतन्ति**॥ ३७७५॥

**पमेहकणियातो वा, सरक्खं पाहु सूरयो।**
**सो उ दोसकरो वुत्तो, तं च कज्जं न साहए ॥ ३७७६॥**

**प्रमेहकणिकाः सरजस्कं** पदैकदेशे पदसमुदायोपचारत् सरजस्काधिराजं **प्राहुः सूरयः**। **स** च सरजस्काधिराज आपीयमानो **दोषकर उक्तः, तच्च कार्यं** रोगविमुक्तिलक्षणं **न साधयति,** ततः सोऽपि न पीयते ॥ ३७७६ ॥

**बहुगी होइ मत्ताउ[१], आइल्लेसु दिणेसु उ ।**
**कमेण हायमाणी उ, अंतिमे होइ वा न वा ॥ ३७७७॥**

**आदिमेषु दिनेषु** कायिकी **मात्रातो बह्वीभवति**। ततः **क्रमेण हीयमाना अन्तिमे** दिने

१. मत्ताओ - ला. ॥

भवति वा न वा ॥ ३७७७॥

**पडिणीयऽणुकंपा वा, मोयं वड्ढंति गुज्झगा केइ ।**
**बीयादिजुतं जं वा, विवरीयं उज्झए सव्वं ॥ ३७७८॥**

**प्रत्यनीका** अनुकम्पन्ते **इत्यनुकम्पा वा केचिद् गुह्यकाः मोकं** कायिकीं **वर्द्धयन्ति, यद्वा बीजादियुतं** कुर्वन्ति। **सर्व**मेतत् स्वाभाविकं न भवति, किन्तु **विपरीतम्,** अतस्त्यजति ॥३७७८॥

सम्प्रति द्रव्यादितो मार्गणामाह—

**दव्वे खेत्ते काले, भावम्मि य होइ सा चउविगप्पा ।**
**दव्वे उ होइ मोयं, खेत्ते गामाइयाण बहिं ॥ ३७७९ ॥**

**काले दिवा व रातो, भावे साभावियं व इयरं वा ।**
**सिद्धाए पडिमाए कम्मविमुक्को हवइ सिद्धो ॥ ३७८०॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**देवो महड्डितो वा वि, रोगातोऽहव मुच्चई ।**
**जायई कणगवण्णो उ, आगते य इमो विही॥ ३७८१ ॥**

**सा** क्षुल्लिका मोकप्रतिमा **चतुर्विकल्पा** चतुराश्रिता भवति। तद्यथा-**द्रव्ये**१ **क्षेत्रे**२ **काले**३ **भावे**४ **च** । तत्र **द्रव्ये भवति मोक**मापातव्यम् १। **क्षेत्रे ग्रामादीनां बहिः** २। **काले दिवा रात्रौ वा** ३। **भावे** तद् मोकं **स्वाभाविकमितरद्वा** । तत्र स्वाभाविकमापिबति, इतरत् त्यजति ४। अस्यां च **प्रतिमायां सिद्धायां** कश्चित् कालं कुर्वन् **कर्मविमुक्तः सिद्धो भवति**। ॥ ३७७९॥ ३७८० ॥

यदि **वा देवो महर्द्धिकः । अथवा** कालकरणाभावे **रोगाद् विमुच्यते,** शरीरेण **कनकवर्णो जायते**। पालितायां प्रतिमायामुपागतस्य **अयं** वक्ष्यमाणो **विधिः** ॥ ३७८१ ॥

तमेवाह—



For Private and Personal Use Only

**उण्होदगे य थोवे, तिभागमद्धे तिभाग थोवे य।**
**महुरगभिन्ना महुरग, एक्केक्कं सत्त दिवसाइं॥ ३७८२ ॥**

उष्णोदकादिकमधिकृतगाथोपन्यस्तमुक्तक्रमेण **एकैकं सप्त दिवसान्** कुर्यादिति गाथा पदयोजना। भावना त्वियम्-**सप्तदिवसान् उष्णोदकेन** ओदनं भुङ्क्ते। **च**शब्दाद् द्वितीयान् सप्त दिवसान् यूषमाण्डेन यापयेत् ॥ ३७८२॥

एतदेवाह—

**ओयणं उसिणोदे णं, दिणे सत्त उ भुंजिउं ।**
**जूसमंडेण वा अन्ने, दिणे जावेइ सत्त उ ॥ ३७८३ ॥**

पाठसिद्धम्। **थोव**त्ति अन्यान् तृतीयान् **सप्त दिवसान् उष्णोदके** स्तोकं मधुरमुल्लणं मिश्रयित्वा तेन सह **भुङ्क्ते**। **तिभागे** त्ति तदनन्तरमन्यान् सप्त दिवसान् मधुरस्योल्लणस्य त्रिभागं द्वौ भागावुष्णोदकस्य मीलयित्वा तेन सह भुङ्क्ते। **अद्धे** इति ततः परमन्यान्

सप्तदिवसानर्द्धमुष्णोदकस्यार्द्धं मधुरोल्लणस्य मिश्रयित्वा तेन सह कूरं भुङ्क्ते। **तिभाग** त्ति तदनन्तरमन्यान् सप्तदिवसान् त्रिभागमुष्णोदकस्य द्वौ भागौ मधुरोल्लणस्य मिश्रयित्वा तेन सह भुङ्क्ते "**थोवे य**" त्ति ततः परमन्यान् सप्त दिवसान् मधुरोल्लणे स्तोकमुष्णोदकं प्रक्षिप्य तेन सह भुङ्क्ते। एवं पञ्च सप्तकान् **मधुरकभिन्नान्** स्तोकोदनान् **मधुरकस**हितान् भुङ्क्ते॥ ३७८३॥

एतदेवाह—

**मधुरोल्लणेण थोवेण, मीसे तइयसत्तए।**
**तिभागऽद्धजुयं चेव, तिभागे थेवमिस्सियं ॥ ३७८४॥**

पूर्वव्याख्यानानुसारेणेयं गाथा स्वयं भावनीया, अधिकार्थाभावात्। तदनन्तरमन्यान् मधुरकेण उल्लणेन सह, उपलक्षणमेतत् अन्यैर्वा यूषप्रकारैस्सह भक्तं भुङ्क्ते। ततः परमन्यान् सप्त सप्तकान् यानि तस्य व्याधेरविरुद्धानि तैर्दध्यादिभिः सह भावयित्वा भुङ्क्ते। तदनन्तरं सर्वप्रचारी भवति ॥ ३७८४॥

एतदेवाह-

**महुरेणं सत्तऽन्ने, भावित्ता उल्लणादिणा ।**
**दहिगादीण भावित्ता, ताहेव सत्तसत्तए ॥ ३७८५॥**

अत्रादिशब्दादन्येषां यूषप्रकाराणां परिग्रहः। व्याख्यातप्रायम्॥ ३७८५॥

साम्प्रतमुपसंहारमाह—

**एवमेसा उ खुड्डीया, पडिमा होइ समाणिया ।**
**भोच्चाऽऽरुहंते चोद्दणं, अभोच्चा सोलसेण तु ॥ ३७८६॥**

**एवमेषा क्षुल्लिका** मोक**प्रतिमा भवति**। सा च **भुक्त्वा आरोहता** प्रतिपद्यमानेन **चतुर्दशकेन समानीता** समाप्तिं नीता भवति, **अभुक्त्वा** प्रतिपद्यमानेन **षोडशकेन। आरुहंते** इत्यत्र सप्तमी तृतीयार्थे प्रतिपत्तव्या ॥ ३७८६॥

सम्प्रति महतीं मोकप्रतिमां व्याख्यातुमाह—

**एमेव महल्ली वि हु, अट्ठारसमेण नवरि निट्ठाति**
**परिहारो अट्ठ दिवसा, न हु रोगि बलिस्स वा एसा ॥ ३७८७॥**

**एवमेव** अनेनैव प्रकारेण **महत्यपि** मोकप्रतिमा द्रष्टव्या। **नवरं** सा **अष्टादशकेन निष्ठां याति परिहारतपोऽष्टौ दिवसान्**। **न च स रोगी** भवति प्रतिमाप्रभावात्। यदि वा **बलिन एषा** प्रतिमा भवति, नेतरस्य ॥ ३७८७॥

**पडिवत्ती पुण तासिं, चरमनिदाघे व पढमसरए वा।**
**संघयण-धितिजुत्तो, फासयती दो वि एयातो ॥ ३७८८॥**

**प्रतिपत्तिः पुनरेतयोः** प्रतिमयोश्चरमनिदाघे **वा प्रथमशरदि वा ।एते च द्वे अपि** प्रतिमे **स्पर्शयति** आद्यसंहननत्रयान्यतमसंहनन**युक्तो धृत्या** च वज्रकुड्यसमानः ॥ ३७८८॥

**सूत्रम्—संखादत्तियस्स भिक्खुस्स पडिग्गहधारिस्स गाहावइकुलं पिंडवायपडियाए अणुपविट्ठस्स जावइयं-जावइयं केइ अंतो पडिग्गहंसि उवइत्ता दलएज्जा तावइयाओ ताओ दत्तिओ वत्तव्वं सिया।**

**तत्थ से केइ छब्बएण वा, दूसएण वा, वालएणं वा अंतो पडिग्गहंसि उवइत्ता दलएज्जा, सव्वा वि णं सा एगा दत्ती वत्तव्वं सिया ।**

तत्थ से बहवे भुंजमाणा सव्वे ते सयं सयं पिण्डं साहणिय अन्तो पडिग्गहंसि उवइत्ता दलएज्जा, सव्वा वि णं सा एगा दत्ती वत्तव्वं सिया ॥ ४३ ॥

संखादत्तियस्स णं भिक्खुस्स पाणिपडिग्गहियस्स गाहावइकुलं पिण्डवाय-पडियाए अणुपविट्ठस्स

जावइयं-जावइयं केइ अन्तो पाणिंसि उवइत्ता, दलएज्जा तावइयाओ ताओ दत्तीओ वत्तव्वं सिया ।

तत्थ से केइ छब्बएण वा, दूसएण वा, वालएण वा अन्तो पाणिंसि उवइत्ता दलएज्जा, सव्वा वि णं सा एगा दत्ती वत्तव्वं सिया ।

तत्थ से बहवे भुंजमाणा सव्वे ते सयं सयं पिण्डं साहणिय अन्तो पाणिंसि उवइत्ता दलएज्जा सव्वा वि णं सा एगा दत्ती वत्तव्वं सिया ॥ ४४ ॥

''संखादत्तियस्स ण''मित्यादिसूत्रद्वयम् । अस्य सम्बन्धमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**स साहियपतिण्णो उ, नीरोगो दुहतो बली।**
**मियं गेण्हेइ सुद्धुंछं, सुत्तस्सेस समुप्पया॥ ३७८९॥**

**'सः'** मोकप्रतिमासाधकः **साधितप्रतिज्ञो नीरोगः द्विधातः** धृत्या संहनेन च **बली** मितं दत्तिसङ्ख्यया भिक्षासङ्ख्यया च परिमितं **शुद्धमुञ्छं गृह्णाति**। ततो दत्तिपरिमाणप्रतिपादनार्थम् अन्यस्य **सूत्रद्वयस्य समुत्पादः** प्रवृत्तिः। गाथायां स्त्रीत्वं प्राकृतत्वात्। एष सूत्रसम्बन्धः॥ ३७८९॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**सङ्ख्या** परिमाणं **दत्तिकायाः**, सूत्रे पुंस्त्वमार्षत्वात्, **यावद् यावत् कश्चिदन्तःपतद्ग्रहे उवइत्ता** अवनम्य **दद्यात्** तत्र **तावत्यो दत्तय इति वक्तव्यं स्यात्**। किमुक्तं भवति? एकस्यामपि भिक्षायामुत्पाटितायां यावतो वारान् विच्छिद्य विच्छिद्य ददाति तावत्यस्तत्र दत्तय इति, **तत्र से** तस्य साधोः **कश्चित् छब्बकेन** वंशदलमयेन **दूष्येण वा** वस्त्रेण **वालकेन वा** गो-महिष्यादिवालकृतेन गालनादिना **अन्तःपतद्ग्रहे अवनम्य दद्यात् सर्वाऽपि ण**मिति



For Private and Personal Use Only

वाक्यालङ्कारे **सा एका दत्तिरिति वक्तव्यं स्यात्, तत्र से** तस्य साधोर्**बहवो भुञ्जाना** भिक्षार्थं साधुमागतं दृष्ट्वा **सर्वे ते स्वीयं स्वीयं पिण्डं संहृत्य** एकं पिण्डं कृत्वा **अन्तः पतद्ग्रहे उवइत्ता** अवनम्य **दद्यात् सर्वाऽपि ण**मिति पूर्ववत् [सा] **एका दत्तिरिति वक्तव्यम्**। एतत् सूत्रं पतद्ग्रहधारिण उक्तम्। सम्प्रति पाणिपतद्ग्रहविषयमाह—

**पाणी**त्या [दि], पाणिपतद्ग्रहस्यापि विषये एवमेव सूत्रं वक्तव्यमिति सूत्रसङ्क्षेपार्थः ॥ सम्प्रति **भाष्य**विस्तरः—

**हत्थेण व मत्तेण व, भिक्खा होइ समुज्जया ।**
**दत्तितो जत्तिए वारे, खिवती होंति तत्तिया ॥ ३७९० ॥**

**हस्तेन वा मात्रेण वा** या **समुद्यता** उत्पाटिता भिक्षा सा **भिक्षे**त्युच्यते । **दत्तयः** पुनस्तामेव भिक्षां **यावतो वारान्** विच्छिद्य विच्छिद्य **क्षिपति तावत्यो भवन्ति** ॥ ३९९० ॥

**अव्वोच्छिन्ननिवाया उ, दत्ती होइ उ वेतरा ।**
**एगाऽणेगासु चत्तारि, विभागा भिक्ख-दत्तिसु ॥ ३९९१ ॥**

**अव्यवच्छिन्ननिपाता तु दत्तिर्भवति। इतरा** भिक्षा च भवति। **भिक्षा दत्तिषु** च **एकानेकासु** विषये **चत्वारो विकल्पाः** ॥ ३७९१ ॥

तानेवाह—

**एगा भिक्खा एगदत्ती१, एगा भिक्खा अणेगदत्तीतो २।**
**णेगातो वि य एगा ३, णेगातो चेव णेगातो ४ ॥ ३७९२ ॥**

**एका भिक्षा एका दत्ति**रिति प्रथमो विकल्पः १। **एका भिक्षा अनेका दत्तय** इति द्वितीयः२। **अनेका** भिक्षा **एका** दत्तिरिति तृतीयः ३। **अनेका** भिक्षा **अनेका** दत्तय इति चतुर्थः ४। तत्र प्रथमभङ्ग एवम्-दायकेन अव्यवच्छिन्ना भिक्षा दत्ता सा एका भिक्षा एका च दत्तिः१। द्वितीयभङ्गे सैवैका भिक्षा व्यवच्छिद्य व्यवच्छिद्य दत्ता २। तृतीयभङ्गे सूत्रमिदम्-"तत्थ से बहवो भुंजमाणा इत्यादि जाव सा एगा दत्ती वत्तव्वं सिया"। अस्येयं भावना-

केचित् पथिकाः कर्मकरा वा एकत्रावकाशे पृथक् पृथग् उपस्कृत्य भुञ्जते, तेषामेकः परिवेषकः, साधुना च तत्र भिक्षार्थमागत्य धर्मलाभः समुद्घुष्टः, ततः स परिवेषक आत्मीयाद्

ददामीति व्यवसितः, ततस्तैरपि शेषकैः स भण्यते-प्रत्येकं प्रत्येकमस्मदीयमध्यादपि साधवे भिक्षां देहि, ततस्तेन परिवेषकेण सर्वेषां सत्काद् गृहीत्वा एकत्र सम्मील्याऽव्यवच्छिन्नं दत्तम्, एवमनेका भिक्षा एका दत्तिरित्युपपद्यते ३। चतुर्थो भङ्गोऽप्येवमेव, नवरम् व्यवच्छिन्नं दानमिति॥ अत्र दत्तिष्वेकानेकदायकभिक्षाभेदतोऽष्टौ भङ्गाः तानुपदिदर्शयिषुः प्रथमत एकानेकदायक-भिक्षाविषयां चतुर्भङ्गीमाह-

**एमेव एगऽणेगे, दायग-भिक्खासु होइ चउभंगो ।**
**एगो एगं देती१,एगो णेगाउ२ णेग एगं च३ ।**
**णेगा य अणेगातो४, पाणीसु पडिग्गहधरेसु ॥ ३७९३ ॥**[1]

**एवमेव** अनेनैव प्रकारेण **एकस्मिन्नेकस्मिंश्च दायके** एकानेक**भिक्षासु** च **चतुर्भङ्गी भवति**। गाथायां पुंस्त्वं प्राकृतत्वात्। तामेव चतुर्भङ्गीमाह- **एको** दायक **एकां** भिक्षां **ददाति**१ **एकोऽनेकाः**२ **अनेके एकाम्**३ **अनेके अनेकाः**४ । एते चत्वारो भङ्गाः **पाणिषु** पाणिभोजिषु

१. षड्चरणोऽयं छन्दः इति ला. टिप्पणे ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पतद्ग्रहधरेषु** च द्रष्टव्याः ॥ ३७९३ ॥

अत्र यथा दत्तिष्वष्टौ भङ्गास्तथा दर्शयति—

**एगो एगं एक्कसि१, एगो णेगा य बहुसो वारे२ ।**
**एगो णेगा एक्कसि३, एगो णेगा य बहुसो उ४॥ ३७९४ ॥**

**एको** दायकः **एकां** भिक्षामे**कवारं** ददाति१, **एको** दायक **एकां** भिक्षां **बहुशो वारान्** विच्छिद्य विच्छिद्य ददाति२, **एको** दायकोऽ**नेका** भिक्षा **एकवार**मव्यवच्छेदेन ददाति३, **एको** दायको **अनेका** भिक्षा **बहुशो** वारान् विच्छिद्य विच्छिद्य ददाति४॥ ३७९४ ॥

एवमेकं दायकमधिकृत्य एकानेकभिक्षासु दत्तिविषयासु चतुर्भङ्ग्यभिहिता। साम्प्रतमनेकान् दायकानधिकृत्य एकानेकभिक्षासु चतुर्भङ्गीमाह—

**णेगा एगं एक्कसि** ५, **णेगा एगं च णेगसो वारे** ६।
**णेगा णेगा एक्कसि** ७, **णेगा णेगा य बहुवारे** ८ ॥ **३७९५** ॥



For Private and Personal Use Only

**अनेके** दायका **एकां** भिक्षा**मेकवार**मव्यवच्छेदेन ददति५। **अनेके** दायका **एकां** भिक्षा**मनेकशो वारान्** विच्छिद्य विच्छिद्य ददति६। **अनेके** दायका **अनेका** भिक्षा एकत्र सम्पिण्ड्य **एकवारं** ददति७। **अनेके** दायका **अनेका** भिक्षा विच्छिद्य विच्छिद्य **बहून् वारान्** ददति८ ॥ ३७९५ ॥

**पाणिपडिग्गहियस्स वि, एसेव कमो भवे निरवसेसो ।**
**गणवासे निरवेक्खो, सो पुण सपडिग्गहो भइतो ॥ ३७९६ ॥**

**पाणिपतद्ग्रहिकस्यापि एष एव** अनन्तरोदितः **क्रमो भवति निरवशेषो** ज्ञातव्यः । स च पाणिपतद्ग्रहभोजी **गणवासे निरपेक्षः, स पुनः सपतद्ग्रहः भजितः**, विकल्पितः कदाचिद् भवति कदाचिन्नेति ततस्तस्य पाणिपतद्ग्रहभजिता॥ ३७९६ ॥

**सूत्रम्— तिविहे उवहडे पण्णत्ते, तं जहा- सुद्धोवहडे १, फलिहोवहडे २, संसट्ठोवहडे३ ॥ ४५ ॥**

'तिविहोवहडे पन्नत्ते, तं जहा,' इत्यादि। अस्य सम्बन्धप्रतिपादनार्थमाह—

**दोण्हेगतरे पाते, गेण्हति उ अभिग्गही तिहोवहडं ।**
**दुविहं एगविहं वा, अभिहडसुत्तस्स संबंधो ॥ ३७९७ ॥**

अनन्तरसूत्र**द्वये** पतद्ग्रहधारी पाणिपतद्ग्रहिकश्चोक्तः । **तयोश्च** पाणिपतद्ग्रह**योरन्यतरस्मिन् पात्रे** अभिगृह्णातीत्याभिग्रहिकः **अभिग्रही गृह्णाति । उपहृतमपि त्रिविधं द्विविधमेकविधं वा।** प्रस्तावादत्रो**पहृतसूत्र**रूपोपक्षेपः । एषोऽ**भ्याहृतसूत्रस्य सम्बन्धः** ॥ ३७९७ ॥

सूत्राक्षरसंस्कारस्त्वेवम्—

**त्रिविधमुपहृतं प्रज्ञप्तम्। तद्यथा शुद्धोपहृतं फलितोपहृतं संसृष्टोपहृतं च ॥**

अमीषां पदानां व्याख्यानं **भाष्य**कृत् करिष्यति । अधुना **भाष्य**प्रपञ्चः-

**सुद्धे१संसट्ठे२या, फलितोवहडे३य तिविहमेक्केक्कं ।**
**तिन्नेग दुगा तिन्नि उ, तिगसंजोगो भवे एक्को ॥ ३७९८॥**

उपहृतशब्दः प्रत्येकमभिसम्बध्यते । **त्रिविधमुपहृतं** सूत्रेऽभिहितम् । तद्यथा-**शुद्धोपहृतं१,**

**संसृष्टोपहृतं** २, **फलितोपहृतं ३ च । एकैकमु**पहृतं **पुनस्त्रिविधम्**- यदवगृह्णाति १ यच्च संहरति २ यच्चाऽऽस्ये प्रक्षिपति ३। एतदनन्तरसूत्रे वक्ष्यते। **अत्रैकक**संयोगे **त्रयो** भङ्गाः, तद्यथा- शुद्धोपहृतं वा गृह्णाति १ फलितोपहृतं वा गृह्णाति २ संसृष्टोपहृतं वा गृह्णाति ३। **द्विक**संयोगेऽपि **त्रयः**, तद्यथा-

शुद्धोपहृतं फलितोपहृतं च १ शुद्धोपहृतं संसृष्टोपहृतं च २ फलितोपहृतं संसृष्टोपहृतं च ३। **त्रिकसंयोगे एकः**-शुद्धोपहृतं संसृष्टोपहृतं फलितोपहृतं च गृह्णाति १। सर्वसङ्ख्यया सप्तभङ्गाः। एतेषामेकतरमभिगृह्णात्यभिग्रही ॥ ३७९८॥

सम्प्रति शुद्धादिपदानामर्थमाचष्टे—

**शुद्धं तु अलेवकडं, अहवण सुद्धोदणो भवे सुद्धं।**
**संसट्ठं आदत्तं, लेवाडमलेवडं चेव ॥ ३७९९ ॥**

**फलियं पहेणयादी, वंजणभक्खेहिं वा विरइयं तु।**
**भोत्तुमणस्सोपहियं, पंचमपिंडेसणा एसा ॥ ३८००॥**

यद् **अलेपकृतं** काञ्जिकेन पानीयेन वा सम्मिश्रीकृतं तत् **शुद्धम्। अथवा शुद्धोदनो** व्यञ्जनरहितो **भवति शुद्धम्,** तदपि नियमादलेपकृतम्। **संसृष्टं** नाम भोक्तुकामेन **आत्तं** गृहीतम्। किमुक्तं भवति? यत् स्थाले परिवेषितम् तद्ग्रहणाय हस्तः प्रक्षिप्तो न तावदद्यापि मुखे प्रक्षिपति, अत्रान्तरे साधुरागतो भिक्षार्थम् तद् **लेपकृतमलेपकृतं** वा संसृष्टमित्युच्यते। **फलितं** नाम यद् **व्यञ्जनैर्भक्ष्यैर्वा** नानाप्रकारै**र्विरचितं प्रहेणकादि,** प्रहेणकं लाभनकम्। आदिशब्दात् सरजस्कादीनां दानाय कल्पितं परिगृह्यते । उपहृतशब्दस्यार्थमाह-यद् **भोक्तुमनस उपहृतं** तदुपहृतमित्युच्यते । **एषा च पञ्चमी पिण्डैषणा** ॥ ३७९९॥ ३८००॥

**सुद्धग्गहणेणं पुण, होइ चउत्थी वि एसणा गहिया ।**
**संसट्ठे उ विभासा, फलियं नियमा उ लेवकडं ॥ ३८०१॥**



**शुद्धग्रहणेन चतुर्थ्यप्येषणा** अल्पलेपकृतानामिका **गृहीता** [इति]द्रष्टव्यम्। **संसृष्टे विभाषा** कदाचित् तु लेपकृतं कदाचिन्नेति । **फलितं** तु **नियमाल्लेपकृत**मेवेति ॥

**सूत्रम्— तिविहे उग्गहिए पण्णत्ते जं च ओगिण्हति १जं च साहरति२ जं च**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**आसगंसि पक्खिवति ३। एगे पुण एवमाहंसु, दुविहे ओग्गहिए पण्णत्ते, तं जहा- १. जं च ओगिण्हइ, २. जं च आसगंसि[१] पक्खिवति॥ ४६॥**

अस्य सम्बन्धमाह—

**पगया अभिग्गहा खलु, शुद्धयरा ते य जोगवुड्ढीए।**
**इति उवहडसुत्तातो, तिविहं दुविहं व पग्गहियं॥ ३८०२॥**

**प्रकृताः खल्वनन्तरसूत्रे** शुद्धोपहतादिष्व**भिग्रहाः। ते चा**भिग्रहाः **शुद्धतरा** भवन्ति **योगवृद्ध्या** उत्तरोत्तरयोगवृद्धिकरणेन। **इति** अस्मात् कारणा**दुपहतसूत्रा**दनन्तरं **त्रिविधं द्विविधं वा प्रगृहीत**मुक्तम् ॥ ३८०२ ॥

अनेन सम्बन्धेनाऽऽयातस्यास्य व्याख्या—

**त्रिविधमवगृहीतं प्रज्ञप्तम् यदवगृह्णाति १ यच्च संहरति २ यच्च आस्यके प्रक्षिपति ३, एके एवमाहुः।** एके पुनरेवमाहुः:- **द्विविधमवगृहीतं प्रज्ञप्तम् यदवगृह्णाति यच्च**

**१. टीकानुसारमत्र- साहरइ- पाठः सम्भाव्यते॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**संहृतमिति**। एष सूत्राक्षरसंस्कारः॥ सम्प्रति **भाष्य**विस्तरः—

**पग्गहियं१ साहरियं२, पक्खिप्पंतं च आसए तह य३।**
**तिविहेयं दुविहं पुण, पग्गहियं१ चेव साहरियं२ ॥ ३८०३ ॥**

यत् **प्रगृहीतं** १ यच्च **संहृतं** २ यच्चाऽऽस्ये **प्रक्षिप्यमाणम्** ३, एतम् **त्रिविध**मवगृहीतम्। **द्विविधं पुनरवगृहीत**मादेशान्तरेणेदम्-**प्रगृहीतं**१ **संहृतं**२ च॥ ३८०३॥

अथाऽऽदेशस्य किं लक्षणम्? अत आह—

**बहुसुतमाइण्णं न य, बाहियमण्णेहि जुगपहाणेहिं।**
**आदेसो सो उ भवे, अहवा वि नयंतरविकप्पो॥ ३८०४ ॥**

यद् **बहुश्रुतैराचीर्णम्, न चान्यैयुर्गप्रधानैर्बाधितं स भवति** नाम **आदेशः। अथवा नयान्तरविकल्प** आदेशः । तद्वशात् सूत्रमेवमुपन्यस्तमिति॥ ३८०४॥

साम्प्रतमवगृहीतादिपदव्याख्यानार्थमाह—



For Private and Personal Use Only

**साहीरमाणं गहियं, दिज्जंतं जं च होति पायोग्गं ।**
**पक्खेवए दुगंछा, आदेसो कुडमुहादीसु॥ ३८०५ ॥**

इह अनानुपूर्व्या ग्रहणं बन्धानुलोमतः, तत एवं द्रष्टव्यम्-**गृहीतं** नाम यद् **दीयमानं यच्च भवति प्रायोग्यं** १ संहृतं नाम **संह्रियमाणम्** २ आस्ये प्रक्षिप्यमाणं प्रतीतम् ३। अत्राह- ''ननु जं च आसगंसि पक्खिवइ'' इत्यस्यायमर्थः- यद् आस्यके मुखे **प्रक्षिपति,** तच्चोच्छिष्टमिति लोके **जुगुप्सा,** ततः कथं तद् गृह्यते? सूरिराह **आदेसो कुडमुहादीसु** कुटः-घटः तस्य यद् मुखं तदादिषु आदिशब्दात् पिठरमुखादिपरिग्रहः, तत्र आदेशः व्याख्यानम् २। किमुक्तं भवति? पिठरमुखादीन्यधिकृत्य ''जं च आसगंसि पक्खिवति'' इति सूत्रं व्याख्येयम्, अतो न कश्चिद् दोषः ॥ ३८५० ॥



अथोपहतसूत्रस्यावगृहीतसूत्रस्य च परस्परं कः प्रतिविशेषः? तत आह—

**उग्गहियम्मि विसेसो, पंचमपिंडेसणातो छट्ठीए ।**
**तं पि य हु अलेवकडं, नियमा पुव्वुद्धडं चेव॥ ३८०६ ॥**

उपहतसूत्रे पञ्चमी पिण्डैषणा उक्ता,**अवगृहीते** अवगृहीतसूत्रे पुनरस्मिन् अयं **विशेषः**, यत् **पञ्चमपिण्डैषणातः** परा या **षष्ठी** पिण्डैषणा तस्या अभिधानमिति। **तदपि हु** निश्चित**मलेपकृतं नियमाच्च पूर्वोद्धृत**मिति ॥ ३८०६ ॥

सम्प्रति ''दिज्जंतं जं च होइ पायोग्ग''मित्यस्य व्याख्यामाह—

**भुंजमाणस्स उक्खित्तं, पडिसिद्धं तं च तेण उ ।**
**जहण्णोवहडं तं तू, हत्थस्स परियत्तणे ॥ ३८०७ ॥**

परिवेषकः पिठरिकायां कूरं गृहीत्वा दक्षिणहस्तेन तलं प्रेर्य यस्य दातुकामस्तस्य भाजने क्षिपामि इत्यध्यवसितः, तच्च तथा **भुञ्जानस्योत्क्षिप्तम्। तेन** भुञ्जानेन **प्रतिषिद्धं** पर्याप्तम् मा मह्यं देहि अस्मिन् देशकाले साधुना तत्र प्राप्तेन धर्मलाभितम्, ततः परिवेषको ब्रूते-'साधो! धारय पतद्ग्रहम्,' साधुना पात्रं धारितं तत्र तेन प्रक्षिप्तम्, इदं **हस्तस्य** हस्तमात्रस्य **परिवर्त्तनात्**, गाथायां सप्तमी पञ्चम्यर्थे **जघन्यमुपहृतं** भवति। एतेन दीयमानम् इति व्याख्यातम्। यच्च भवति प्रायोग्यमित्यनेन शुद्ध-संसृष्टयोः प्रागुक्तयोरन्यतरद् गृहीतम्॥ ३८०७॥

तदेवं 'जं च ओगिण्हति' इति व्याख्यातम्। सम्प्रति "जं च साहारियं" इति व्याख्यानाय यत् "साहरिये"ति गाथाशकलमुक्तं तद् भावयति—

**अह साहीरमाणं तु, वड्ढेउं जो उ दावए।**
**दलेज्ज अचलितो तत्तो, छट्ठा एसा वि एसणा ॥ ३८०८॥**

**अथ वर्द्धयितुं** परिवेषयितुं **संह्रियमाणं यो दापयेत्,** तस्य वचनतः स परिवेषकस्**तस्मात्** स्थानाद् मनागप्य**चलितो दद्यात्,** एतत् संह्रियमाणमुच्यते। **एषाऽपि षष्ठी एषणा** द्रष्टव्या। "जं च आसगंसि पक्खिवइ" इत्यस्य व्याख्यानमाह—

**भुत्तसेसं तु जं भूयो, छुभंती पिठरे दए ।**
**संवद्धंती व अन्नस्स, आसगम्मि पकासए॥ ३८०९॥**

प्रह्लादननिमित्तं कलिञ्जादिभाजने विशाले उत्ताने च क्षिप्तम् ततो भोक्तुमुपविष्टानां दत्त्वा यद् **भुक्तशेषं** तद् **भूयः पिठरे क्षिपन्ती** साधवे **दद्यात्।** यदि वा **अन्यस्य** भाजने **प्रकाशके** प्रकाशे **आस्यके** तस्य मुखे **संवर्द्धयन्ती** परिवेषयन्ती दद्यात् ॥

*॥ इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां नवम उद्देशकः समाप्तः ॥ छ ॥*

*नवमे उद्देशके ग्रन्थाग्रं ८०९ ॥ छ ॥*



KIRIT GRAPHICS
09898490091